ओ३म्

# पारिभाषिकः




आचार्यप्रद्युम्नः

पारिभाषिकः





**दिव्य प्रकाशन**
**पतंजलि योगपीठ**
महर्षि दयानन्द ग्राम, दिल्ली-हरिद्वार राष्ट्रीय राजमार्ग,
निकट बहादराबाद, हरिद्वार-249405, उत्तराखण्ड, भारत
फोन : 01334.244107, 246737 फैक्स : 01334-24805,240664
ई-मेल : divyayoga@rediffmail.com, वेबसाइट : www.divyayoga.com

ओ३म्

# पारिभाषिकः

( स्वस्ति पथ अर्थात् श्रेय मार्ग )

सम्पादक—

**आचार्यः प्रद्युम्नः**

प्रकाशक :

**दिव्य प्रकाशन**

पतंजलि योगपीठ

हरिद्वार–249405 (उत्तराखण्ड)

# पारिभाषिकः

**संस्करण :** प्रथम संस्करण
कार्तिक मास, वि०सं०-२०७४ (दिसम्बर २०१७)
**प्रतियाँ :** २,०००

**© सर्वाधिकार सुरक्षित : प्रकाशकाधीन**

**प्रकाशक : दिव्य प्रकाशन**
पतंजलि योगपीठ
महर्षि दयानन्द ग्राम, दिल्ली-हरिद्वार राष्ट्रीय राजमार्ग-58,
निकट बहादराबाद, हरिद्वार-249402 (उत्तराखण्ड)
फोन : 01334-240008, 244107, 246737
फैक्स : 01334-244805, 240664
ईमेल : divyaprakashan@divyayoga.com
वैबसाइट : www.divyayoga.com

**मूल्य :** 100/- रुपये

**प्राप्ति स्थान :**
१. पतंजलि योगपीठ
महर्षि दयानन्द ग्राम, दिल्ली हरिद्वार राष्ट्रीय राजमार्ग
निकट बहादराबाद, हरिद्वार 249405 (उत्तराखण्ड)

**मुद्रक :**
**ऋषि ऑफसैट प्रिन्टर्स**
अशोका टॉकीज़ के सामने, वेद मन्दिर,
दूरभाष : 9760284597, 9837120375
ईमेल : rishioffset@gmail.com

# विषयसूचिः


| | | |
|---|---|---|
| १. | कृतज्ञताज्ञापनम् | (४) |
| २. | प्राक्कथनम् | (५) |
| ३. | भूमिका | (१०) |
| ४. | परिभाषापाठः | (१७) |
| ५. | संक्षेपविवरणम् | (२४) |
| ६. | पारिभाषिकः | १ |
| ७. | प्रथमं परिशिष्टम्<br>(यथोद्देशकार्यकालविषयको गुह्याभिप्रायः) | १३६ |
| ८. | द्वितीयं परिशिष्टम्<br>(कानिचिद् विशिष्टवचनानि) | १४० |
| ९. | तृतीयं परिशिष्टम्<br>(परिभाषा–वर्णानुक्रमणी) | १४४ |

।।ओ३म्।।

## कृतज्ञता-ज्ञापनम्

अहैतुकी कृपा यस्य विद्यते सर्वजन्तुषु।
भक्तानां क्लेशहर्ता यस्तस्मै कृपात्मने नमः।।१।।

यत्कृतसत्यप्रकाशात् सद्धर्मे सम्प्रचारिते लोके।
सत्पथमेत्य कृतार्थस्तमृषिमीडे दयानन्दम्।।२।।

ऋषि-दर्शित-सन्मार्गे येनाहं श्रद्धया विनीय धृतः।
एटागुरुकुलमूलं[1] तं दण्डिस्वामिनं वन्दे।।३।।

श्रीविश्वदेवाद् गुरुवर्यतो यज्ज्ञानं मया व्याकरणस्य लब्धम्।
एटास्थ आचार्यकुलेऽतिभक्त्या तं श्रद्धयाहं प्रणतः स्मरामि।।४।।

अथ झज्जरगुरुकुलमागत्य च यस्माद् गुरुतरं ज्ञानम्।
सद्गुरुवेदानन्दात् सम्प्राप्तं तं मुदा वन्दे।।५।।

येनाध्यात्मरसिकगुरुणा मे विहिता योगमार्गरतिः।
नूरगढे कृतवसतिं सोमानन्दं मुनिं नौमि।।६।।

यया यथाकालं सहजेन ज्ञानेन कृतसदुपदेशैः।
कर्तव्येषु धृतस्तां दैवतमूर्तिं नतो जननीम्।।७।।

आचार्यविजयपालस्य विद्यावारिधिपदाङ्कस्य।
दूरस्थोऽप्यदूरस्थोऽन्तेवासित्वं सदा कुर्वन्।।८।।

शास्त्ररहस्यं विन्दन् सततं ज्ञानार्जनप्रसितः।
उपकारभारनम्रस्तस्मै कृतवेदितां वच्मि।।९।।

---

१. एटागुरुकुलसंस्थापक-स्वामिब्रह्मानन्द-दण्डि-महाभागम्।

# प्राक्कथनम्

वैयाकरणनिकाये परिभाषाशब्दो योगरूढ्या विशिष्टमर्थम् अभिदधाति। येन सूत्रेण वाक्येन वा अनियमप्रसङ्गे नियमो विधीयते, तत् सूत्रं वाक्यं वा परिभाषेति प्रख्यायते। अत एव 'अनियमप्रसङ्गे नियमकारिणी परिभाषा' इत्याहुरभियुक्ताः। सूत्राणाम् अर्थप्रतिपादने, तत्प्रवृत्तौ वा, प्रयोगसाधनप्रक्रियायां वा भवन्ति बहुविधानि सन्देहस्थानानि, तत्र परिभाषोपतिष्ठते, अन्यतरस्मिन् पक्षे नियमं विधाय सन्देहं निवर्तयति। परिभाषाया इदं वैशिष्ट्यमभिसमीक्ष्यैव महाभाष्यकारः पतञ्जलिराह– "परिभाषा पुनरेकदेशस्था सर्वं शास्त्रमभिज्वलयति प्रदीपवत्" (म० भा० २.१.१) इति। नागेशः खल्वपि तत्रैव प्राचीनकारिकामुद्धरति–

**एकदेशस्थिता शास्त्रभवने याति दीपताम्**
**परितो व्यापृतां भाषां परिभाषां प्रचक्षते॥** इति।

न्यासकृच्च तत्रैव 'परितो व्यापृता भाषा परिभाषा' इत्याह। पदमञ्जरीकारः खल्वपि तत्रैवावोचत्– "परितः सर्वत्र पूर्वत्र परत्र व्यवहिते चानन्तरे च भाष्यते कार्यमनयेति करणे 'गुरोश्च हलः' (अ० ३.३.१०३) इत्यकारप्रत्ययः" इति।

**परिभाषापाठाः–** परिभाषाश्चेमा द्विविधाः– सूत्ररूपाः स्वतन्त्रवाक्यरूपाश्च। तत्र सूत्ररूपाः पाणिनीयादिसूत्रेषु पठ्यन्ते। स्वतन्त्रवाक्यरूपास्तु परिभाषापाठेषु संगृह्यन्ते। सम्प्रत्युपलभ्यमानानां परिभाषापाठानां संकलनं का० वा० अभ्यङ्करमहाभागेन सम्पादितं 'परिभाषासंग्रह'नामकं वर्त्तते। तत्र संकलितेषु अष्टादशसु परिभाषापाठेषु पाणिनीयतन्त्रसम्बद्धाः सन्ति दशैव, कातन्त्रीयाश्चत्वारः, शाकटायन-चान्द्र-जैनेन्द्र-हैम-सम्बद्धाश्च प्रत्येकमेक एवेति व्यज्ञापयत्सम्पादकः। पाणिनीयैर्वैयाकरणैः प्रायेण पञ्च परिभाषापाठाः समाश्रीयन्त इति महामहोपाध्यायो युधिष्ठिरो मीमांसकः स्वकीये 'संस्कृत व्याकरण शास्त्र का इतिहास'नामके ग्रन्थे प्रत्यपादयत्। तथाहि–

१. **प्रथमः पाठः–** परिभाषासंग्रहे परिभाषासूचननाम्ना संकलितोऽयं पाठो वृत्तियुतो व्याडिकृत इत्यातिष्ठतेऽभ्यङ्करः, अस्य वृत्तिमपि व्याडिरेव व्यरचयत्। अत्र ९३ परिभाषाः संगृह्यन्ते।

**२. द्वितीयः पाठः–** अयमपि परिभाषासंग्रहे संकलितः। अत्र १४० परिभाषाः संगृह्यन्ते। अयं च 'इति व्याडिरचिताः पाणिनीयपरिभाषाः समाप्ताः' इति पुष्पिकया समाप्यते।

**३. तृतीयः पाठः–** अयं पाठः पुरुषोत्तमदेवेन स्वकीयायां परिभाषावृत्तौ समाश्रीयते। अत्र १२० परिभाषाः संगृह्यन्ते।

उपर्युक्ते परिभाषापाठत्रये संगृहीतानां परिभाषाणां पाठक्रमसंख्याकृते भेदे सत्यपि, त्रयाणां मूलमेकमेवेति श्रीमीमांसका अन्वमिमत, यतस्त्रिष्वपि परिभाषापाठेषु प्रथमा परिभाषा 'अर्थवद्ग्रहणे नानर्थकस्य' इति तुल्यैव पठ्यते।

**४. चतुर्थः पाठः–** सीरदेवः स्वकीयायां बृहत्परिभाषावृत्तौ पाठम् इममाशिश्रियत्। अस्मिन् पाठे १३० परिभाषाः संगृह्यन्ते। तत्र पुरस्तात् ९९ परिभाषा ज्ञापकसिद्धाः, कात्यायनादिवचनानि चानुकृष्यन्ते, ततः ३१ परिभाषा न्यायमूलाः संकल्यन्ते। अयं पाठोऽष्टाध्यायीक्रममनुरुणद्धि।

**५ पञ्चमः पाठः–** अयं पाठो नागेशेन परिभाषेन्दुशेखर आश्रीयते। अत्र १२२ परिभाषाः संगृह्यन्ते। नीलकण्ठ–हरिभास्करशेषाद्रिप्रभृतय आधुनिकव्याख्याकर्तारोऽपीममेव परिभाषापाठं समाश्रयन्ति। तत्र तत्र परिभाषाणां क्रमस्य संख्यायाश्च भेदोऽपि दृश्यते। महर्षिदयानन्दोऽपि इममेव परिभाषापाठमाधृत्य 'पारिभाषिक' इतिनाम्ना हिन्दीव्याख्यानग्रन्थं प्रणिनाय।

## परिभाषाणां प्रवक्तारो व्याख्याकाराश्च

एतासां परिभाषाणां प्रवक्तृत्वविषये कुशकाशावलम्बनन्यायेन किञ्चिदेवोदटङ्क मीमांसकपादैः पूर्वोक्ते स्वकीये ग्रन्थे। तत्र काशकृत्स्न–व्याडि–पाणिनय एव प्रवक्तृत्वेनोदलिख्यन्त। ततोऽपि प्राचीनतरं परिभाषाणां मूलमिन्द्रादितन्त्रमिति विद्वांसोऽनुमिमते।

पाणिनीयतन्त्रे प्रसिद्धानां परिभाषाणां विंशतिं व्याख्यातॄन् उल्लिखन्ति ऐतिह्यविदः। तत्र व्याडिकृतं परिभाषासूचनम्, पुरुषोत्तमदेवकृता लघुपरिभाषावृत्तिः, सीरदेवकृता बृहत्परिभाषावृत्तिः, नीलकण्ठकृता परिभाषावृत्तिः, हरिभास्करकृतः परिभाषाभास्करः, नागेशकृतः परिभाषेन्दुशेखरः, शेषाद्रिकृतः परिभाषाभास्कर इत्येते परिभाषाव्याख्याग्रन्थाः सम्प्रति मुद्रिता उपलभ्यन्ते। महर्षिदयानन्दकृतः पारिभाषिको नाम ग्रन्थोऽपि हिन्दीव्याख्योपेतो मुद्रित उपलभ्यते।

**परिभाषाभेदाः**

परिभाषाः प्रायेण त्रिधा विभज्यन्ते–

**१. ज्ञापकसिद्धाः–** आचार्याणां प्रवृत्तिविशेषात् तेषां गूढाभिप्राया ज्ञाप्यन्ते। इमे गूढाभिप्राया एव परिभाषारूपेण प्रख्याप्यन्ते आचार्यान्तरैराविष्कृता तद्यथा– प्रत्याहारसूत्रेषु द्विर्णकारानुबन्धकरणं व्यर्थं सद् व्याख्यानतो विशेषप्रतिपत्तिं ज्ञापयति।

**२. वाचनिक्यः–** वार्त्तिककारस्य वा महाभाष्यकारस्य वा प्रयोजनविशेषसिद्ध्यर्थं यद् वचनं तदपि परिभाषारूपेण संगृह्यते। तद्यथा– यस्मिन् विधिस्तदादावल्ग्रहणे।

**३. न्यायमूलाः–** लोके प्रथिता न्याया अपि केचन परिभाषात्वेन गृह्यन्ते। सीरदेव एतादृशीरेकत्रिंशत् परिभाषा अन्ते संकलय्य विवरयिष्यन्नाह– 'अतः परं न्यायमूलाः परिभाषाः' इति। तन्मतेन 'गौणमुख्ययोः०' (परि० १००) इत्यारभ्य 'समासकृत्तद्धितेषु०' (परि० १३०) इति तावत् न्यायमूलाः परिभाषाः।

**प्रयोजनविशेषदृष्ट्या परिभाषाविभागाः**

परिभाषाभिर्विविधानि प्रयोजनानि साध्यन्ते। यतोऽनियमप्रसङ्गे नियमकारिणी परिभाषेति परिभाषाया लक्षणम्, अतो यावद्विधा अनियमप्रसङ्गास्तावद्विधा नियमकारिण्य इति शक्यते वक्तुम्। एतद् दृष्ट्वा परिभाषाणां प्रमुखा वर्गाः प्रदर्श्यन्ते–

**१. ग्रहणनियमार्थाः-** विधिसूत्रेषु सामान्यतो ग्रहणानि भवन्ति। परिभाषा तत्रोपस्थाय, सूत्रेणैकवाक्यतामनुभूय तं सामान्यविधिं विशेषे अवस्थापयति। तद्यथा- 'वनो र च' (अ०- ४.१.७) इति वन्नन्तात् प्रातिपदिकात् ङीप् सन्नियोगेन रो विधीयते। सोऽर्थवत इव वन्नन्ताद् भवति–धीवन्–धीवरी, 'अर्थवद्ग्रहणे नानर्थकस्य' इति परिभाषोपस्थानात्। अनर्थकाद् वन्नन्तात् तु न भवति–अतिश्वन् अतिशुनी। सम्पूर्णानां परिभाषाणां चतुर्थोंऽशो ग्रहणनिय- मार्थाभिर्व्याप्यते।

**२. बलीयस्त्वनियमार्थाः–** बहवो विधयः खलेकपोतन्यायेन चेद् युगपद् प्राप्नुयुस्तर्हि तेषां पौर्वापर्यव्यवस्थापनार्थं काचित् परिभाषा बलीयस्त्वं नियमयति। तद्यथा– 'पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः' इति परिभाषा पूर्वादीनां विधीनां प्रवृत्तिक्रममवधारयति। एवं विंशतिदेशीयाः परिभाषा बलीयस्त्वं नियमयन्ति।

**३. प्रयोगसाधुत्वनियमार्थाः–** काश्चन परिभाषाः प्रयोगाणां साधुत्वनिर्वाहार्थमुपादीयन्ते, अतिप्रसङ्गाय तु न प्रकल्पन्ते। तद्यथा– 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति परिभाषा 'शतानि' इत्यादि प्रयोगाणां साधुत्वमवधारयति, 'कष्टाय' इत्यादिषु तु नातिप्रसजति। तथैव 'सन्नियोगशिष्टानामन्यतराभावे उभयोरप्यभावः', 'पूर्वत्रासिद्धीयमद्विर्वचने' इत्येवमादयोऽपि परिभाषाः प्रयोगसाधुत्वम् अवधारयन्ति।

**४. विकल्पविधायिन्यः–** क्वचित् सूत्रोपदिष्टस्य विधेर्नित्यत्वेऽपि परिभाषा विकल्पं विदधाति। प्रायेण दश परिभाषा एतादृश्यः परिभाषापाठेषु संगृह्यन्ते। तद्यथा– 'सर्वो द्वन्द्वो विभाषैकवद् भवति', 'सर्वे विधयश्छन्दसि विकल्प्यन्ते', 'समासान्तविधिरनित्यः' इति।

**५. कार्यिनियमार्थाः–** सूत्रेषु कार्यिनिर्देशाः सामान्येन क्रियन्ते, परिभाषाभिस्तु ते विशेषेष्ववधार्यन्ते। तद्यथा– 'सृजिदृशोर्झल्यमकिति' (अ० ६.१.५७) इति सामान्येन विहितेऽपि 'धातोः कार्यमुच्यमानं तत्प्रत्यय एव भवति' इति परिभाषावशात् 'स्रष्टा, द्रष्टा' इत्यत्रैव 'अम्' भवति, न तु 'रज्जुसृड्भ्याम्', 'देवदृग्भ्याम्' इत्यत्र। तथैव 'अनन्त्यविकारे अन्त्यसदेशस्य', 'नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे' इत्यादयः।

**६. अतिदेशविधायिन्यः–** काश्चन परिभाषा अतिदेशान् विदधति। तद्यथा 'व्यपदेशिवदेकस्मिन्' इति परिभाषाबलात् 'एकाचो द्वे प्रथमस्य' (अ० ६.१.१) इति विहितं द्विर्वचनं 'पपाच' इत्यत्रेव 'इयाय' इत्यत्रापि भवति। एवमेव 'व्यपदेशिवद्भावोऽप्रातिपदिकेन', 'प्रकृतिवदनुकरणं भवति', 'एकदेशविकृतमनन्यवद् भवति' इत्यादयः परिभाषा आतिदेशिक्यः।

**७. अनुबन्धविषयिण्यः–** काश्चन परिभाषा अनुबन्धान् व्यवस्थापयन्ति। तद्यथा– 'एकान्ता अनुबन्धाः', 'अनेकान्ता अनुबन्धाः', 'नानुबन्धकृतम् अनेकाल्त्वम्' इत्यादयः।

**८. प्रकीर्णविषयाः–** पूर्वोक्तप्रकारेषु याः परिभाषा नान्तर्भूतास्ताः प्रधानतोऽग्रोल्लिखितान् विषयान् नियमयन्ति- लिङ्ग-वचन-वासरूपविधि -साहचर्य-वाक्यपरिसमाप्ति-स्वर-संज्ञापरिभाषा-कार्यिनिमित्तभेद-प्रत्ययार्थ-प्रत्ययलक्षण-लाघवगौरवादीन् अनुवृत्ति-आन्तर्य-आनन्तर्य-आदेशादींश्च।

**प्रस्तुतं परिभाषाविवरणम्–** महर्षिदयानन्दसरस्वतीनिर्दिष्टं पाठविधि-

मनुसरत्सु महाविद्यालयेषु प्रधानं वेदाङ्गं व्याकरणमधीयतेऽध्याप्यते च। तत्राष्टाध्याय्याः प्रथमावृत्तेरनन्तरं छात्राः परिभाषा अधीयते। तदर्थं महर्षिदयानन्दरचितो हिन्दीविवरणयुतो ग्रन्थः 'पारिभाषिको' नाम समाश्रीयते। तस्मिन् ग्रन्थे लोकभाषया विवृता अपि परिभाषा न सुतरां हृदयङ्गमा भवन्ति, यतस्तत्र भाषा पुरातनी दुश्श्लिष्टत्वाद् दुरवग्रहा च। अपि च कतिपयेषु स्थलेषु परिभाषाभिप्रायो विपरीत इव प्रतीयते। उदाहरणान्यपि कानिचिदन्याय्यानि प्रदर्श्यन्ते। एतत् सर्वमभिसमीक्ष्य, कश्चिद् देवगिरा गुम्फितो विवरणग्रन्थ एवंविधः स्याद् यत्र महाभाष्यशैल्या परिभाषा विवृताः स्युरिति चिराद् मेऽभिलाष आसीत्। यद्यपि पुरुषोत्तमदेव- सीरदेवयोः परिभाषावृत्ती निपुणं परिभाषा विवृणुतः, तथापि ते समासशैल्या विरचिते इत्यधीतप्रथमावृत्तिमात्रान् कोमलमतीन् छात्रान् न तथोपकुर्यातां यथा कश्चिद् व्यासशैल्या सरलया संस्कृतभाषया निबद्धो ग्रन्थः।

कतिपयेभ्यो वर्षेभ्यः पूर्वमस्मदीयेनैकेनान्तेवासिना परिभाषा व्याख्याताः, परन्तु क्लिष्टत्वात् तद्व्याख्यानं नारोचत मे। अथ परारी ममैवान्यतमोऽन्तेवासी खानपुरस्थस्य आर्षगुरुकुलस्याचार्यः श्रीयुतः प्रद्युम्नः स्वपत्रे 'स्वामिदयानन्दकृतपारिभाषिकस्य संस्कृतानुवादे प्रवृत्तः' इत्युदलिखत्। अहं च पूर्वोक्तं स्वाभिलाषमुत्तरपत्रे प्राकटयम्। सोऽपि तमूरीकृत्य यथासम्भवं प्रायतत। सर्वं कार्यं साधुतया सम्पाद्य ममैव पार्श्वे संशोधन-मुद्रण-प्रकाशनार्थं प्राहिणोत्।

अथ प्रकाशितेऽस्मिन् ग्रन्थे स्वकीयमेव चिराभिलाषं मूर्त्तरूपं प्राप्नुवन्तं दर्शं-दर्शं मोदते नश्चेतः। तदर्थं प्रेष्ठं श्रेष्ठं स्वान्तेवासिनं श्रीयुतं प्रद्युम्नाचार्यं प्रियाशीर्वादशतैः समर्धयामि।

अस्य ग्रन्थस्य मुद्रणपत्रसंशोधनादीनि सर्वाणि कार्याणि ममैव अपरैरन्तेवासिभिः सम्पादितानि। तत्र श्रीप्रदीपः, ब्र॰ वेदमुनिः, ब्र॰ पाण्डुरङ्गः, ब्र॰ सिद्धार्थः (पूर्वछात्रः खानपुरस्थस्यार्षगुरुकुलस्य) विशेषत उल्लेखनीयाः सन्ति, येषां साहाय्यं विनैतत्कार्यं सम्पादयितुं नापीपरम्। तानेतान् सर्वान् स्वाशीर्वचोभिः संवर्धयामितमाम्।

**विद्वद्विधेयः**
**विजयपालो विद्यावारिधिः**

ओ३म्

# भूमिका

**य आर्यभाषामय-पारिभाषिकः श्रीमद्दयानन्दयतीन्द्रनिर्मितः।**
**तस्यावलम्बात्तदभिन्ननामकः कृतो मया संस्कृतवाग्विगुम्फितः॥१॥**

**नायं हि भाषान्तरमात्ररूपः परन्तु तद्ग्रन्थसमाश्रयेण।**
**ततो विशेषस्य च सन्निवेशाद् रूपान्तरापन्न इव प्रणीतः॥२॥**

**सुखावबोधाय तु बालमेधसां मनोविनोदाय तथा विपश्चिताम्।**
**मम प्रयासो विबुधैर्विबुध्यतां निर्भ्रान्तसिद्धान्तनिवेदनार्थिनः॥३॥**

व्याकरणशास्त्रस्याऽध्येतॄणामध्यापयितॄणां च पुरतः व्याकरणे परिभाषाणां स्थानं महत्त्वं वा न तिरोहितमिवाऽस्ति। परिभाषाणां ज्ञानेन हि कस्यापि शाब्दिकस्य विशिष्टमविशिष्टं वा व्याकरणज्ञानम् अतिसरलतया-ऽनुमातुं शक्यते। **'लक्ष्यलक्षणे व्याकरणम्'** इति कात्यायनीयं वचनमनुसृत्य लक्ष्याणां लक्षणानाञ्च येषामपरोक्षम् अवितथञ्च ज्ञानं भवति ते हि वस्तुतः 'वैयाकरणः' इति पदवीं धारयितुमर्हन्ति। यथाऽन्यत्र नान्तरेण साधनं साध्य-सिद्धिर्भवति तथेहापि साधनभूतलक्षणज्ञानं विना साध्यस्थानिलक्ष्यज्ञानमपि न कदाचिद् भवितुमर्हति।

यदा हि सर्वस्यापि लोकस्य मातृभाषारूपेण संस्कृतवाग् विलसति स्म, तदा त्वन्तरेणापि लक्षणज्ञानं वृद्धव्यवहारपरम्परयैव लक्ष्यज्ञानं भवति स्मेति कदाचिद् मन्तुं शक्यते; परं साम्प्रतिके काले तु व्याकरणज्ञानायत्तम् [१](=लक्षणज्ञानायत्तम्) एव लक्ष्यज्ञानं तिष्ठतीति नात्र कश्चित् संदेहावकाशः। शक्तिग्रहस्योपायेषु व्याकरणज्ञानं हि प्राथम्येनोपनिबद्धमस्ति। तथा चोक्तम्—

**शक्तिग्रहं व्याकरणोपमान-कोषाप्तवाक्याद् व्यवहारतश्च।**
**वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥**

---

१. 'समुदायेषु हि प्रवृत्ताः शब्दा अवयवेष्वपि वर्त्तन्ते' इति न्यायेन लक्ष्यलक्षणसमुदायेऽपि प्रयुक्तो व्याकरणशब्दस्तदवयवे लक्षणेऽपि प्रयुक्तो भवति।

व्याकरणप्रयोजनप्रदर्शनावसरे पतञ्जलिरप्याह पस्पशायाम्–

'ब्राह्मणेन (=ज्ञानार्थिना) अवश्यं शब्दा ज्ञेयाः। न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्या ज्ञातुम्।' अत एव व्याकरणस्य 'शब्दसंस्कारस्मृतिः' इत्यपरनामधेयम्। एवञ्च लक्ष्यसंस्काराय (=शब्दसंस्काराय) व्याकरणमिति सुनिर्णीतं भवति। तच्च लक्ष्यज्ञानं प्रकृति-प्रत्यय-विकार-आगमरूप-विभागकल्पनया साध्यते। एतच्च सर्वं सूत्रप्रणाल्याऽवबोध्यते।

संज्ञा-परिभाषा-विधि-नियम-अतिदेश-अधिकार-निषेधाख्यानि सप्तविधानि सूत्राणि भवन्ति। सम्यग् जानीयुर्यया सा संज्ञा; यथा– 'वृद्धिरादैच्' (अ० १.१.१) इत्यादि। परितः सर्वतो भाष्यन्ते नियमा याभिस्ताः परिभाषाः; यथा- 'इको गुणवृद्धी' (अ० १.१.३)इत्यादि। यो विधीयते स विधिर्विधानं वा; यथा- 'सिचि वृद्धिः परस्मैपदेषु' (अ० ७.२.१) इत्यादि। निषिध्यन्ते निवार्यन्ते कार्याणि यैस्ते निषेधाः ; यथा- 'न धातुलोप आर्धधातुके' (अ० १.१.४) इत्यादि। नियम्यन्ते निश्चीयन्ते प्रयोगा यैस्ते नियमाः ; यथा- 'अनुदात्तङित आत्मनेपदम्' (अ० १.३.१२) इत्यादि। अतिदिश्यन्ते तुल्यतया विधीयन्ते कार्याणि यैस्तेऽतिदेशाः ; यथा– 'आद्यन्तवदेकस्मिन्' (अ० १.१.२०) इत्यादि। अधिक्रियन्ते पदार्था यैस्ते अधिकाराः ; यथा- कारके' (अ० १.४.२३) इत्यादि।

तत्र लक्ष्यसंस्कारवेलायां यत्र क्वचन सूत्रेषु संदेहा उपतिष्ठन्ते तान् निरसयितुमेताः परिभाषा भवन्ति। 'परितो व्यापृतां भाषां परिभाषां प्रचक्षते' इति व्युत्पत्त्यनुसारेण यानि वचनानि शास्त्रे पौनः पुन्येन व्यापकरूपेण विधि वाक्यानां सहायिभावेनोपयुज्यन्ते, स्वयमविधायकान्यपि तथाभूतानि वचनानि 'परिभाषा' इत्यनेन शब्देन निर्दिश्यन्ते। 'अनियमे नियमकारिणी परिभाषा भवति' एतदपि लक्षणं क्रियते। यथा- 'निर्दिश्यमानस्यादेशा भवन्ति' (परि० १३) इति विधीयमानानामादेशानां स्थानी नियम्यते- यथादेशा निर्दिश्यमानस्य एव स्थाने भवन्ति न त्वधिकस्य। तथा च 'इको गुणवृद्धी' इत्यनेन गुणवृद्धी इक एव स्थाने भवतो न त्वनिक इति नियमः क्रियते। 'लिङ्गवती परिभाषा भवति' एतदप्युच्यते। यथा 'असिद्धं बहिरङ्गमन्तरङ्गे'

(परि० ४४) इत्यन्तरङ्गलिङ्गेयं परिभाषा, गुणवृद्धिलिङ्गा च 'इको गुणवृद्धी इति परिभाषा।

**परिभाषाणां भेदाः–**

**'परिभाषाश्च खलु त्रिविधाः'** इति तद्विदः। तासां स्वरूपादिकमधस्तान्निर्दिश्यते–

**१. न्यायसिद्धाः–** लोके हि दृश्यत एतद् यज्जनसमुदाये केचन न्यायाः प्रथिता भवन्ति। 'नीयन्तेऽनेनेति न्यायः' इति व्युत्पत्त्या कस्याञ्चित् सुनिश्चितदिशि येन जनो वा जनसमूहो वा नीयते, येन वा यथा गन्तुं मनुजानां सहजप्रवृत्तिर्भवति यद्वा येन नियमेन किञ्चिदिष्टं प्रति नीयत इष्टं वा प्राप्यते स न्याय इति भण्यते। तदेवं लोकविश्रुता अनिष्टनिवारका इष्टप्रापका सर्वसुखदायका नियमा एव वा न्यायशब्देनोच्यन्त इत्यायातम्। तद्यथा– कश्चिद् उपजीवक उपजीव्यं विरुणद्धि चेत् कथं तस्याप्यस्तित्वमवतिष्ठेत ! अत एव लोके क्वचित् कदाचिदेवं भवति चेन्न साधु मन्यते। अयमेवाऽस्ति सर्वजनप्रसिद्धः प्रतिजनविश्वासगतो वा धर्मो व्यवहारो वा यो हि 'लौकिकन्यायः' इति शब्देनाम्नायते। अन्यच्च यथा सर्वोऽपि जनः प्रातरुत्थाय शौचस्नानादीनि स्वात्मसम्बन्धीनि कार्याणि करोति न तु झटिति शय्योत्थायमेव परकार्येषु प्रवृत्तो भवतीति। एवंभूताश्च ये केचन नियमा लोके सर्वबोधबोध्या भवन्ति ते तथैव शास्त्रेऽप्याश्रीयन्ते। अर्थात् तत्तल्लोकनियमानुगुणा शास्त्रेऽपि तत्तत्कार्याणां सूत्राणां वा प्रवृत्तिर्भवति। यदा च लोकन्यायसिद्धा एवार्थाः परिभाषारूपेणाऽनूद्यन्ते तदा ताः परिभाषा 'न्यायसिद्धाः' इत्युच्यन्ते। एवञ्च लोकानुगुणस्य शास्त्रीयार्थस्यापि लोकेनैव सिद्धत्वात् तदर्थं शास्त्रकारा न शास्त्रं विदधतीति नाभियुक्तैर्न्यायागता परिभाषा वचनरूपेण पठिता मन्यन्ते। अस्मिंश्च ग्रन्थके एवंभूताः परिभाषा बह्व्यः सन्ति यथाऽवसरं हि तासां सर्वासां निर्देशः कृतोऽस्ति। उदाहरणमात्रन्त्विह प्रस्तूयते– सन्निपातलक्षणविधिः (परि० ७५), असिद्धं बहिरङ्गमन्तरङ्गे (परि० ४४) 'सहचरितासहचरितयोः'० (परि० ९१) इत्यादि।

**२. ज्ञापकसिद्धाः**– यत्र हि लोकप्रचलितैर्न्यायैः शास्त्रकार्यस्य निर्वाहो न भवति, परं शास्त्रेण (सूत्रेण) शास्त्रैकदेशेन (सूत्रैकदेशेन) वा केचन नियमा व्यञ्जनावृत्त्या ध्वनिता भवन्ति– ता एव सन्ति ज्ञापकसिद्धाः परिभाषाः। उक्तं हि भाष्यकृताऽष्टमे– "इहेङ्गितेन चेष्टितेन निमिषितेन महता वा सूत्रनिबन्धनेनाऽऽचार्याणामभिप्रायो लक्ष्यते (म० भा० ८.२.३)।" अर्थात् आचार्येण न केवलमभिधयैव सर्वम् अभिहितम् अपितु लक्षणया व्यञ्जनयाऽपीति कृत्वा सूत्रैः सूत्रपदैर्वा साक्षादनुक्ता अपि विषया ज्ञायन्ते लक्ष्यन्ते च। आचार्यमनोगतानां भावानां छायायामेव तत्तत्सूत्रं सूत्रपदं वा सार्थकतां भजते, इतरथा हि स्पष्टमेव तत्सर्वं सूत्रजातमनर्थकं स्यात्। तदेवमिमा ज्ञापकसिद्धपरिभाषा अपि न शाब्दिकैरपूर्वाः स्वीक्रियन्ते, अपित्वाचार्यप्रोक्ता एवेति। एवंविधानामपि परिभाषाणां बाहुल्यं सम्प्राप्स्यतेऽत्र ग्रन्थे। कथं चेमा ज्ञापिता भवन्तीति दिक् तु 'नानुबन्धकृतमनेकाल्त्वम्' (परि० ६) 'नानुबन्धकृतमसारूप्यम्' (परि० ८) इत्यादौ सम्यङ्निर्दिष्टेति तत एवावधार्यम्।

**३. वाचनिक्यः**– उपर्युक्ताद् न्यायाज्ज्ञापकाद् वा व्यतिरिक्ता या परिभाषा भवन्ति ता हि 'वाचनिक्यः' इति निगद्यते। यथाऽऽचार्येण अष्टाध्याय्यां 'तस्मिन्निति निर्दिष्टे०' (अ० १.१.६५), 'तस्मादित्युत्तरस्य' (अ० १.१.६६), 'आद्यन्तौ टकितौ' (अ० १.१.४५) इत्येवमादयो वाचनिक्यः परिभाषा उपनिबद्धाः सन्ति, तथेहापि ग्रन्थे भाष्यकृता पतञ्जलिना वार्तिककृता कात्यायनेन वा वचनरूपेणैव पठिताः परिभाषा अवलोकयितुं शक्यन्ते। तद्यथा– 'यस्मिन् विधिस्तदादावल्ग्रहणे' (परि० ३४) 'पूर्वपरनित्यान्तरङ्गापवादानाम्०' (परि० ३९) इति।

## अस्य लघुग्रन्थस्य प्रेरकहेतवः

यद्यपि नागेशभट्टप्रभृतीनां वैयाकरणानां परिभाषाव्याख्यानानि समुपलभ्यन्ते तथापि तान्यधीयाना विद्वांसोऽपि काठिन्यात् खेदायन्ते किमुत बालमतयश्छात्रा इति कृत्वा परिभाषाणां सरलव्याख्यानस्य आवश्यकताऽनुभूता। वर्षैकपूर्वं पूज्याचार्यं संगन्तुं बहालगढस्य विद्यालयम् अहमगाम्। शुद्धेन बुद्धेन वेदमुनिनाम्ना ब्रह्मचारिणा पारिभाषिकविषये किञ्चित् चर्चा प्रचालिता

यदस्माकमाचार्यमहाभागाः पारिभाषिकस्य संस्कृतव्याख्यानं त्विच्छन्ति परं न तेभ्यः क्लिष्टं संस्कृतं रोचते। अलम्! वाक्यमिदं ममावचेतनमनस्यास्थितम्। शनैः शनैश्च संस्कारेण अनेन मम चित्ते निमज्जनोन्मज्जनं कर्तुमारब्धम्। कालक्रमेण मदीया अन्तेवासिनो ब्र० प्रवीण-अभयदेव-विजयेन्द्राः पारिभाषिकमध्येतुम् उपातिष्ठन्त। तैरपि सहजया वाचा मम प्रसुप्तः संस्कारः प्रबोधितो यदस्य पारिभाषिकस्य संस्कृतव्याख्यानं स्याच्चेदस्माकमन्येषाञ्च व्याकरणाऽध्ययनार्थिछात्राणामध्ययनाऽध्यापने महत्सौविध्यं स्यादिति। एवञ्चैते मम पटवो बटवोऽपि कर्मण्यस्मिन् निमित्ततामभजन्त। अपरञ्चाऽहमेकान्ते तिष्ठामीत्यतो ममोर्जापि किमपि विशिष्टमिष्टं कार्यं कांक्षति स्म। ममाक्षिलक्ष्यीभूताश्च सदैव मदीया हितैषिणः श्री स्वामी सर्वानन्दमहाभागः, स्वामी ओमानन्दमहाराजः, पूज्य स्वामी सत्यपतिमहाभागः, कालवावास्तव्यः आचार्यबलदेवः, आचार्य विजयपालो योगार्थी (गुरुकुल झज्जर), स्वामी ब्रह्मदेवः (कर्नाटक), आचार्ययाज्ञवल्क्यः (झाला), पं० रूपचन्द्रदीपकः (लखनऊ) प्रभृतयोऽपि सततं मां स्वमौनवाचा किमपि रचनात्मकं कार्यं कर्तुं कथयन्त इव प्रत्ययासन्त। तदेवं शीर्घं निर्णीय कार्यमारब्धम्। अथाद्यत्वे यस्य परमतपस्विनो महाविदुषो रेवलीस्थपाणिनिमहाविद्यालयमधितिष्ठत आचार्यविजयपालस्य गर्भे निवसामि, तं गुरुचरणमसुसूचं यन्मम मनोरञ्जनाय पारिभाषिकसंस्कृतलेखनविचारः समजनि। तैश्च 'शुभस्य शीघ्रम्' इत्याशीर्वचः प्रेषयद्भिर्निरदेशि यत् संस्कृतं नितरां सरलं स्यात्, अधिकः संक्षेपश्च न भवेत्। अधीतप्रथमावृत्तयोऽप्यस्माकं छात्रा अवगन्तुं प्रभवेयुस्तथाविधं व्याख्यानं स्यात्। अथ च यथासाध्यं सन्धिरहितमेव स्यादिति। स्वीयाचार्याज्ञां पूरयितुं कियानहं सफल्यभूवम् इत्यत्र त्वध्येतार एव प्रमाणम्।

## अस्य ग्रन्थस्य योजना

यतोऽयं परिभाषाणां व्याख्यानो ग्रन्थोऽस्ति तस्मात् पारिभाषिको वेदितव्यः। यान्यष्टाध्यायीस्थानि परिभाषासूत्राणि सन्ति तेषां व्याख्यानमिह नास्ति। या हि महाभाष्यस्थाः परिभाषाः सन्ति तेषामेवात्र विधीयते; 'परितो व्यापृतां भाषां परिभाषां प्रचक्षते' इति पूर्वमेवोक्तम् 'परितः' इति वैदिकेन लौकिकेन शास्त्रीयव्यवहारेण च यस्याभिसम्बन्धो भवति अर्थाद् इमे त्रयोऽपि

व्यवहारा यया सिद्धा भवन्ति सा 'परिभाषा' इत्युच्यते। परिभाषाणामिदमेव मुख्यं तात्पर्यं भवति यद् दोषाश्च नाम निवृत्ताः स्युर्व्यवस्था च कृता भवेत्। एतदेव अभिसमीक्ष्य ग्रन्थोऽयं विरचितो यद् व्याकरणस्य वृद्धि-सन्धि -इत्यादिषु प्रकरणेषु ये ये संदेहा जायन्ते ते ते ह्येतासां परिभाषाणां पठनपाठनेनाऽवश्यमेवाऽपगता भवेयुरिति बहुप्रयोजनोऽयं ग्रन्थः।

अस्मिन् पारिभाषिके ग्रन्थे सर्वत्र प्रथमं तावत् परिभाषाणां भूमिका निर्मीयते, तत्रैव च तत्तत्परिभाषासम्बन्धि लक्ष्यम् अर्थाद् उदाहरणमपि दीयते, तदनु च मूलपरिभाषा प्रस्तूयते, तदग्रे च तस्याः परिभाषायाः स्पष्टं व्याख्यानं विधीयते।

अत्र हि मूलपरिभाषायाः अग्रे या संख्या दृश्यते सा हि तस्य अष्टाध्यायीसूत्रस्यास्ति, यत्र सूत्रे हि महाभाष्ये सा परिभाषा व्याख्यातास्ति। परिभाषायाश्च पूर्वं या संख्याऽस्ति सा ह्यस्य ग्रन्थस्य क्रमिकसंख्येति।

## कृतज्ञताप्रकाशः

कियदपि लघुतरं कर्म स्यात् पुनरपि तत्सम्पादने बहूनां सहयोगोऽपेक्ष्यत इति नाविदितमेतद् विचारवताम्। सर्वप्रथमं तावद् विद्याविनयसम्पन्नः कदाचिन्मम छात्रचरोऽपि सम्प्रति जयपुरनगरस्थिते दादूमहाविद्यालये प्राध्यापकपदमलंकुर्वाणो डॉ॰ विजयपालः प्रचेता भूरिशो धन्यवादानर्हति यो हि धनेन च विद्यया चापि यथाकालं मामुपकरोति। तस्याऽनिशं सर्वविधं माङ्गल्यं कामये। अथ च मम प्रियान्तेवासिना ब्र॰ सिद्धार्थेनाऽस्य ग्रन्थस्य प्राकाश्यतामुपनेतुं यद् विशेषेण प्रयतितम्, यथाऽऽवश्यकं च संशोधनं विधायाऽस्य सौन्दर्यं विवर्धितम्, तन्मेऽवश्यं प्रशंसनीयम्। स्वजीवने स हि सदैव धर्मशीलोऽनूचानश्च स्यादिति भगवन्तं भूतनाथं प्रार्थये। मम प्रियभ्रातरः श्रीयुता आचार्याः- प्रदीपः, वेदमुनिः, पाण्डुरङ्गः, ब्र॰ वेदव्रतश्च सश्रद्धम् ईक्ष्यवाचनादिकं विधाय सत्परामर्शैश्च ग्रन्थमिमं विभूष्य तैर्मयि महदुपकृतमित्यहं मन्ये।

इह खानपुरगुरुकुले सेवाकर्मणि निरताय निष्कामकर्मणः साक्षान्मूर्त्तरूपाय के॰ ईश्वरभट्टाय स्वप्रेमपूरपूरितं हृदयमेव समर्पयामि,

यस्य महता सहयोगेनाहं स्वीयमेकान्तरुचिं पूरयामि किञ्च स्वप्रकृत्यनुरूपं च कार्यं कर्तुमपि प्रभवो भवामि। गुरुकुलस्य बाह्यव्यवस्थां कर्तृभ्यः श्रीबालकृष्णार्य-ओम्प्रकाशयादव-धर्मवीरसिंह-प्रभृतिभ्योऽपि भूरिशो धन्यवादाः प्रदीयन्ते; ये मह्यं सर्वथा स्वातन्त्र्यं प्रदाय सदा-सर्वदा सहयोगपरायणा एव तिष्ठन्ति। स्वामी त्यागानन्दमहाभागः क्रान्तिकार्यपि सन् मद्वचनात् शान्तिधर्ममवधार्य स्वमौनभावेन मां सहयोगयतीति धन्यवादार्हः। सर्वथा सावधानतया कृतेऽपि प्रयासे क्वचिदल्पज्ञत्वात् प्रमादाद्वा दोषाः स्युश्चेत् तान् निर्दिशन्तु सद्भावयुता विपश्चितः।

अन्ते च ये परिदृष्टा अपरिदृष्टा वा सहयोगिनोऽसहयोगिनो वा सन्ति तान् सर्वान् प्रति यतिधर्माश्रयमाणः कार्तज्ञ्यं विनिवेदयामि।

अथ कथनमेतदनावश्यकं यदाचार्यविजयपालस्य विद्यावारिधेः आशीर्वचस एवेदं सुमधुरं फलमिति तं महान्तं देवं प्रणम्य विरमामि।

माघ शु॰ पूर्णिमा २०५६ विदुषां विनेयः
(फरवरी १९.२००० ई॰) **प्रद्युम्नः**
आर्ष गुरुकुल खानपुर
नारनौल हरयाणा

# परिभाषा–पाठः


| क्र०सं० | सूत्र | पृष्ठ सं० |
|---|---|---|
| १. | व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्।। | १ |
| २. | कार्यकालं संज्ञापरिभाषम्।। | ४ |
| ३. | यथोद्देशं संज्ञापरिभाषम्।। | ४ |
| ४. | अनेकान्ता अनुबन्धाः।। | ७ |
| ५. | एकान्ता अनुबन्धाः।। | ८ |
| ६. | नानुबन्धकृतमनेकाल्त्वम्।। | ९ |
| ७. | नानुबन्धकृतमनेजन्तत्वम्।। | १० |
| ८. | नानुबन्धकृतमसारूप्यम्।। | ११ |
| ९. | कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः।। | १३ |
| १०. | उभयगतिरिह भवति।। | १३ |
| ११. | कार्यमनुभवन् हि कार्यी निमित्तत्वेन नाश्रीयते।। | १५ |
| १२. | अर्थवत आगमस्तद्गुणीभूतोऽर्थवद्ग्रहणेन गृह्यते।। | १६ |
| १३. | निर्दिश्यमानस्यादेशा भवन्ति।। | १८ |
| १४. | यत्रानेकविधमान्तर्यं तत्र स्थानत एवान्तर्यं बलीयः।। | १८ |
| १५. | अर्थवद्ग्रहणे नानर्थकस्य।। | २० |
| १६. | गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः।। | २१ |
| १७. | अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति।। | २३ |
| १८. | एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः।। | २५ |
| १९. | एकयोगनिर्दिष्टानामप्येकदेशानुवृत्तिर्भवति।। | २५ |
| २०. | भाव्यमानेन सवर्णानां ग्रहणं न।। | २६ |

| | | |
|---|---|---|
| २१. | भवत्युकारेण भाव्यमानेन सवर्णानां ग्रहणम्॥ | २७ |
| २२. | वर्णाश्रये नास्ति प्रत्ययलक्षणम्॥ | २८ |
| २३. | उणादयोऽव्युत्पन्नानि प्रातिपदिकानि॥ | २९ |
| २४. | प्रत्ययग्रहणे यस्मात् स प्रत्ययो विहितस्तदादेः तदन्तस्य च ग्रहणं भवति॥ | ३० |
| २५. | प्रत्ययग्रहणे चापञ्चम्याः॥ | ३१ |
| २६. | उत्तरपदाधिकारे प्रत्ययग्रहणे स्वरूपग्रहणं द्रष्टव्यम्॥ | ३२ |
| २७. | अस्त्रीप्रत्ययेनानुपसर्जनेन॥ | ३३ |
| २८. | संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्न भवति॥ | ३४ |
| २९. | कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवति॥ | ३६ |
| ३०. | पदाङ्गाधिकारे तस्य तदन्तस्य च॥ | ३७ |
| ३१. | व्यपदेशिवदेकस्मिन्॥ | ३९ |
| ३२. | ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते॥ | ४० |
| ३३. | व्यपदेशिवद्भावोऽप्रातिपदिकेन॥ | ४० |
| ३४. | यस्मिन् विधिस्तदादावल्ग्रहणे॥ | ४१ |
| ३५. | सर्वो द्वन्द्वो विभाषैकवद् भवति॥ | ४२ |
| ३६. | वाच्छन्दसि सर्वे विधयो भवन्ति॥ | ४३ |
| ३७. | प्रकृतिवदनुकरणं भवति॥ | ४३ |
| ३८. | एकदेशविकृतमनन्यवद् भवति॥ | ४४ |
| ३९. | पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः॥ | ४५ |
| ४०. | पुनः प्रसङ्गविज्ञानात् सिद्धम्॥ | ४७ |
| ४१. | सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव॥ | ४८ |
| ४२. | विकरणेभ्यो नियमो बलीयान्॥ | ४९ |
| ४३. | शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति॥ | ५० |
| ४४. | असिद्धं बहिरङ्गमन्तरङ्गे॥ | ५२ |

४५. असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे॥ ५२
४६. नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः॥ ५४
४७. अन्तरङ्गानपि विधीन् बाधित्वा
बहिरङ्गो लुग् भवति॥ ५५
४८. पूर्वोत्तरपदयोस्तावत् कार्यं भवति नैकादेशः॥ ५७
४९. अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब् बाधते॥ ५८
५०. वार्णादाङ्गं बलीयो भवति॥ ५९
५१. **येन नाप्राप्ते यो विधिरारभ्यते स तस्य**
बाधको भवति॥ ६०
५२. पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते
न परान्॥ ६२
५३. मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्॥ ६३
५४. अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा॥ ६३
५५. न चापवादविषये उत्सर्गोऽभिनिविशते। ६५
५६. पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः। ६५
५७. प्रकल्प्य चापवादविषयमुत्सर्गः प्रवर्तते॥ ६५
५८. अभ्यासविकारेष्वपवादा उत्सर्गान्न बाधन्ते॥ ६६
५९. ताच्छीलिकेषु सर्व एव तृजादयो वाऽसरूपेण
न भवन्ति॥ ६७
६०. क्तल्युट्तुमुन्खलर्थेषु वाऽसरूपविधिर्नास्ति॥ ६८
६१. लादेशेषु वाऽसरूपविधिर्न भवति॥ ६८
६२. उभयनिर्देशे विप्रतिषेधात् पञ्चमीनिर्देशः॥ ६९
६३. प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं
भवति॥ ६९
६४. विभक्तौ लिङ्गविशिष्टग्रहणं न॥ ७१
६५. सूत्रे लिङ्गवचनमतन्त्रम्॥ ७२
६६. नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः॥ ७३
६७. गतिकारकोपपदानां कृद्भिः सह समासवचनं

| | | |
|---|---|---|
| | प्राक् सुबुत्पत्तेः॥ | ७५ |
| ६८. | साम्प्रतिकाऽभावे भूतपूर्वगतिः॥ | ७८ |
| ६९. | भवति हि बहुव्रीहौ तद्गुणसंविज्ञानमपि॥ | ७९ |
| ७०. | हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवद् भवति॥ | ८१ |
| ७१. | अननुबन्धकग्रहणे न सानुबन्धकस्य ग्रहणम्॥ | ८२ |
| ७२. | तदनुबन्धकग्रहणे नातदनुबन्धकस्य ग्रहणम्॥ | ८२ |
| ७३. | क्वचित् स्वार्थिका अपि प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते॥ | ८४ |
| ७४. | विभाषा समासान्तो भवति॥ | ८४ |
| ७५. | सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य॥ | ८५ |
| ७६. | सन्नियोगशिष्टानामन्यतराऽभावे उभयोरप्यभावः॥ | ८७ |
| ७७. | ताच्छीलिके णेऽण्कृतानि भवन्ति॥ | ८८ |
| ७८. | धातोः कार्यमुच्यमानं तत्प्रत्यये भवति॥ | ८९ |
| ७९. | तदेकदेशभूतस्तद्ग्रहणेन गृह्यते॥ | ९० |
| ८०. | लुग्विकरणाऽलुग्विकरणयोरलुग्विकरणस्यैव ग्रहणम्॥ | ९१ |
| ८१. | प्रकृतिग्रहणे ण्यधिकस्यापि कुत्वं भवति॥ | ९२ |
| ८२. | अङ्गवृत्ते पुनर्वृत्तावविधिः॥ | ९३ |
| ८३. | उपपदविभक्तेः कारकविभक्तिर्बलीयसी॥ | ९४ |
| ८४. | अनन्त्यविकारेऽन्त्यसदेशस्य कार्यं भवति॥ | ९५ |
| ८५. | नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे॥ | ९६ |
| ८६. | प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः॥ | ९७ |
| ८७. | अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी॥ | ९८ |
| ८८. | व्यवस्थितविभाषयाऽपि कार्याणि क्रियन्ते॥ | ९९ |
| ८९. | सामान्यातिदेशे विशेषाऽनतिदेशः॥ | १०१ |
| ९०. | प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम्॥ | १०१ |
| ९१. | सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम्॥ | १०२ |
| ९२. | लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्॥ | १०३ |

९३. गामादाग्रहणेष्वविशेषः।। १०४
९४. प्रत्यवयवं वाक्यपरिसमाप्तिः।। १०५
९५. समुदाये वाक्यपरिसमाप्तिः।। १०६
९६. भेदका उदात्तादयः।। १०७
९७. अभेदका गुणाः।। १०८
९८. बाधकान्येव निपातनानि।। १०९
९९. प्रतिषेधाश्च बलीयांसो भवन्ति।। १०९
१००. सर्वविधिभ्यो लोपविधिर्बलीयान्।। ११०
१०१. अनिर्दिष्टार्थाश्च प्रत्ययाः स्वार्थे भवन्ति।। ११०
१०२. योगविभागादिष्टसिद्धिः।। १११
१०३. पर्यायशब्दानां लाघवगौरवचर्चा नाद्रियते।। १११
१०४. ज्ञापकसिद्धं न सर्वत्र।। ११२
१०५. पूर्वत्रासिद्धीयमद्विर्वचने।। ११३
१०६. एकस्या आकृतेश्चरितः प्रयोगो द्वितीयस्याः तृतीयस्याश्च न भवति।। ११३
१०७. सम्प्रसारणं सम्प्रसारणाश्रयं च कार्यं बलीयो भवति।। ११४
१०८. गुणवचनानां हि शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति।। ११५
१०९. सापेक्षमसमर्थं भवति।। ११६
११०. उभयत आश्रये नान्तादिवत्।। ११६
१११. आगमा अनुदात्ता भवन्ति।। ११७
११२. अवयवे कृतं लिङ्गं तस्य समुदायस्य विशेषकं भवति यं समुदायं सोऽवयवो न व्यभिचरति।। ११८
११३. वर्णग्रहणे जातिग्रहणम्।। ११९
११४. अकृतव्यूहाः पाणिनीयाः।। ११९
११५. निमित्तापाये नैमित्तिकस्याप्यपायः।। १२१
११६. अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम्।। १२२
११७. गणकार्यमनित्यम्।। १२२
११८. आगमशास्त्रमनित्यम्।। १२२

१११९. नञ्घटितम् अनित्यम्॥ १२३

१२०. संज्ञापूर्वको विधिरनित्यः॥ १२३

१२१. आतिदेशिकमनित्यम्॥ १२४

१२२. सर्वविधिभ्य इड्विधिर्बलवान्॥ १२४

१२३. प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम्॥ १२४

१२४. शितपा शपानुबन्धेन निर्दिष्टं यद्गणेन च।
यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि॥ १२४

१२५. चानुकृष्टं नोत्तरत्र॥ १२५

१२६. क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते॥ १२६

१२७. अपवादो यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यते। १२६

१२८. उपजनिष्यमाणनिमित्तोऽप्यपवाद उपसञ्जात-
निमित्तमप्युत्सर्गं बाधते॥ १२७
अथवा–
उपसञ्जातनिमित्तोऽप्युत्सर्ग
उपजनिष्यमाणनिमित्तेनापवादेन बाध्यते॥ १२७

१२९. यो ह्यनादिष्टादचः पूर्वस्तस्य विधिं प्रति
स्थानिवत्॥ १२७

१३०. औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणम्॥ १२८

१३१. वर्त्स्यत्प्रवृत्त्येह कार्याणि क्रियन्ते॥ १२८

१३२. पर्जन्यवदिह लक्षणप्रवृत्तिः॥ १२८

१३३. गर्भवट्टाबादयो भवन्ति॥ १२९

१३४. विधौ परिभाषोपतिष्ठते नानुवादे॥ १२९

१३५. पूर्वत्रासिद्धीये न स्थानिवत्॥ १२९

१३६. णौ कृतं स्थानिवत्॥ १२९

१३७. इतरेतराश्रयाण्यपि कार्याणि शास्त्रे प्रकल्पन्ते॥ १३०

१३८. विधिविधानविधिभाजां त्रयाणां सन्निधाने
तदन्तविधिर्भवति॥ १३०

१३९. असति संभवे बाधनं भवति।
अस्ति च संभवो यदुभयं स्यात्॥ १३१

१४०. सत्यपि संभवे बाधनं भवति॥ १३१
१४१. क्वचिद् विकृतिरपि प्रकृतिं गृह्णाति॥ १३१
१४२. क्रियाविशेषणानां कर्मत्वं नपुंसकलिङ्गता च॥ १३१
१४३. श्रुतानुमितयोः श्रौतः सम्बन्धो बलीयान्॥ १३१
१४४. विधिनियमसम्भवे विधिरेव ज्यायान्॥ १३२
१४५. संदेहे बहुवचनं प्रयोक्तव्यम्॥ १३२
१४६. अर्थवशाद् विभक्तिविपरिणामः॥ १३२
१४७. अगत्या हि खलु परिभाषाश्चाश्रीयन्ते॥ १३२
१४८. पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण॥ १३२
१४९. अन्ये तु पूर्वं धातुरुपसर्गेण युज्यते पश्चात् साधनेनेत्याहुः॥ १३३
१५०. लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिः॥ १३३
१५१. समासकृत्तद्धितेषु भावप्रत्ययेन सम्बन्धाभिधानमन्यत्र रूढि-अभिन्नरूप-अव्यभिचरितसम्बन्धेभ्यः॥ १३३
१५२. अव्यक्ते गुणसंदेहे नपुंसकलिङ्गं प्रयोजयेत्॥ १३४
१५३. निमित्तिकार्यं न तन्निमित्तस्य॥ १३४
१५४. परार्थाभिधानं वृत्तिः॥ १३४
१५५. यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यम्॥ १३४
१५६. यस्य च लक्षणान्तरेण निमित्तं विहन्यते तदप्यनित्यम्॥ १३४
१५७. स्वरभिन्नस्य प्राप्नुवन् विधिरनित्यो भवति॥ १३५
१५८. स्वरविधौ व्यञ्जनमविद्यमानवत्॥ १३५

# संक्षेपाणां विवरणम्

| | |
|---|---|
| अ० | अष्टाध्यायी (पाणिनीया - रामलाल कपूर ट्रस्ट रेवली) |
| अदा० | अदादिर्गणः (पाणिनीयधातुपाठस्थः रालाकट्र० रेवली) |
| उ० | उणादिकोषः |
| कण्ड्वा० | कण्ड्वादिर्गणः (पाणिनीयधातुपाठस्थः रालाकट्र० रेवली) |
| क्र्या० | क्र्यादिर्गणः (पाणिनीयधातुपाठस्थः रालाकट्र० रेवली) |
| कु०सु० | कुमारसम्भवम् |
| जुहो० | जुहोत्यादिर्गणः (पाणिनीयधातुपाठस्थः रालाकट्र० रेवली) |
| तना० | तनादिर्गणः (पाणिनीयधातुपाठस्थः रालाकट्र० रेवली) |
| तु० | तुलना |
| तुदा० | तुदादिर्गणः (पाणिनीयधातुपाठस्थः रालाकट्र० रेवली) |
| दिवा० | दिवादिर्गणः (पाणिनीयधातुपाठस्थः रालाकट्र० रेवली) |
| द्र०/द्रष्ट० | द्रष्टव्यम् |
| निरु० | निरुक्तम् |
| परि० | परिभाषा (प्रकृतग्रन्थस्था) |
| परिभा० | परिभाषेन्दुशेखरः (परिभाषासंग्रहः भण्डारकर) |
| प्रत्या० | प्रत्याहारसूत्राणि |
| भ्वादि० | भ्वादिर्गणः (पाणिनीय-धातुपाठस्थः रालाकट्र० रेवली) |
| भट्टि० | भट्टिकाव्यम् |
| भा०वा० | भाष्यवार्त्तिकम् |
| मनु० | मनुस्मृतिः |
| म०भा० | महाभाष्यम् |
| मीमा० | मीमांसा दर्शनम् |
| रुधा० | रुधादिर्गणः (पाणिनीय-धातुपाठस्थः रालाकट्र० रेवली) |
| वा० | वार्त्तिकम् |
| श० ब्रा० | शतपथब्राह्मणम् |
| स्वा० | स्वादिर्गणः (पाणिनीय-धातुपाठस्थः रालाकट्र० रेवली) |

## स्वराङ्कन-विवरणम्

| | |
|---|---|
| + | उदात्तः |
| − | अनुदात्तः |

ओ३म्

# अथ पारिभाषिकः

पाणिनीयव्याकरणस्याष्टाध्याय्याः प्रत्याहारसूत्रे 'अइउण्' 'लण्' (अ॰ प्रत्या॰ १,६) इत्यत्र सूत्रद्वयेऽपि लोपभावी हल् णकारो द्विः पठितः। अनेन च णकारेण 'अण्' इति 'इण्' इति च प्रत्याहारद्वयं निर्मीयते। एवञ्च येषु सूत्रेषु अणप्रत्याहारस्य इणप्रत्याहारस्य वा निर्देशोऽस्ति, तत्र संदेहो जायते क्व नु पूर्वेण णकारेण 'अण्' वा 'इण्' वा प्रत्याहारो ग्राह्यः क्व च परेणेत्येवमादिकं सन्देहम् अपाकर्तुं भवत्येषा **ज्ञापकसिद्धा परिभाषा–**

## १. व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्॥

(म॰ भा॰ प्रत्या॰ ६– लण् सूत्रे)

यत्र सूत्रे वार्तिकादौ च क्वचित् सन्देहः स्यात् तत्र व्याख्यानेन विशेषस्य निश्चयो विधेयः, न तु सन्देहमात्रेण सूत्रादिकमेवान्यथा मन्तव्यम्। यतो हि पदार्थानां साधारणधर्मं गृहीत्वा सन्देहो जायते, यदा तु तत्र कस्यचिद् विशेषस्य धर्मस्य निश्चयो भवति तदा सन्देहो निवर्तते। तदेवं सति सन्देहेऽभियुक्तैरुक्तेन षड्विधेन व्याख्यानेन विशेषार्थस्यावधारणं कर्तव्यम्। तद्यथा–

**पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना।**
**आक्षेपोऽथ समाधानं व्याख्यानं षड्विधं भवेत्॥**

१. पदच्छेदः, २. पदार्थोक्तिः, ३. विग्रहः, ४. वाक्ययोजना= अन्वयः, ५. आक्षेपः= पूर्वपक्षः, ६. समाधानम्= उत्तरपक्ष इति।

एवञ्चात्र चत्वारि इमानि अणग्रहणानि पूर्वेण णकारेण– 'उरण् रपरः' (अ॰ १.१.५०), 'ढ्रलोपे पूर्वस्य॰ (अ॰ ६.३.११०), 'केऽणः' (अ॰ ७.४.१३), 'अणोऽप्रगृह्यस्यानुनासिकः' (अ॰ ८.४.५६) इति।

'अणुदित् सवर्णस्य चाप्रत्ययः' (अ॰ १.१.६८) इत्येकं परेण। इण्ग्रहणानि तु सर्वाण्येव परेणेति।

तत्र कथं कृत्वा विशेषार्थस्य निश्चयः क्रियत इति दिङ्मात्रम् अधस्तात् प्रस्तूयते–

**पूर्वपक्षः–** 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' (अ० ६.३.११०) इत्यत्र 'अण्' इति प्रत्याहारः पूर्वेण वा णकारेण गृह्यते परेण वेति सन्देहः?

**समाधानम्–** पूर्वेणैव णकारेणेति निश्चप्रचमेतद्। कुतः? परेण णकारेण गृहीतः स्याच्चेदत्र 'अणः' इत्येतस्य ग्रहणमेव व्यर्थं स्यात्। यतो हि 'अचश्च' (अ० १.२.२८) इति सूत्रेण ह्रस्वो दीर्घः प्लुतश्च अच एव स्थाने भवन्तीति कृत्वा 'अचः' इत्युपस्थितं स्यादेव; पुनरपि यद् अण्ग्रहणं करोति, तस्य एतदेव प्रयोजनं यद् 'ढ्रलोपे॰' इत्येवमादिकेषु सूत्रेषु पूर्वेणैव णकारेण प्रत्याहारोऽयं ग्रहीतव्य इति।

**पूर्वपक्षः–** 'अणुदित् सवर्णस्य चाप्रत्ययः' (अ० १.१.६८) इत्येतस्मिन् सूत्रे अण्प्रत्याहारः पूर्वेण वा णकारेण परेण वा इति जिज्ञासा।

**समाधानम्–** एतत्सूत्रस्थोऽयम् अण्प्रत्याहारः परेणैव णकारेणेति नास्ति कश्चित् सन्देहः। कथम्? सूत्रकारस्य 'उॠत्' (अ० ७.४.७) इति स्वीयं वचनमेवात्र ज्ञापकम्। तथा हि अस्मिन् सूत्रे ऋकारस्य तपरकरणे एतत् प्रयोजनं यद् 'अचीकृतत्' इत्येवमादिषु प्रयोगेषु 'कॄत् णिच् चङ् त्' इति स्थितौ ॠकारस्य स्थाने ह्रस्व एव ऋकारादेशो यथा स्यात् 'स्थानेऽन्तरतमः' (अ० १.१.४९) इति परिभाषया प्रमाणकृतान्तर्येण 'अणुदित्॰' (अ० १.१.६८) इति ग्राहकशास्त्रसाहाय्येन दीर्घस्य दीर्घादेशो मा भूदिति। दीर्घस्य दीर्घवचने प्रयोजनं नास्तीति कृत्वा ह्रस्व एव भविष्यतीति इति चेत्; न 'उपधायाश्च' (अ० ७.१.१०१) इति इत्त्ववारणरूपप्रयोजनस्य सत्त्वात्। एवञ्च दीर्घॠकारस्य स्थाने प्राप्तं दीर्घादेशविधानं वारयितुमेव तपरकरणमिति सिद्धम्। परं यदि पूर्वणकारेणाण्ग्रहणं स्यात् तर्हि पूर्वस्मिन्नणि ऋकारस्यासमावेशाद् ऋकारस्य सवर्णग्रहणं प्राप्तमेव न भवति, तत् किं सवर्णनिवृत्त्यर्थेन ऋकारस्य तपरकरणेन? कृतन्तु ज्ञापयति यद् 'अणुदित्॰' (अ० १.१.६८) इत्यस्मिन् सूत्रे परेण णकारेणाण् गृह्यते। तथा तु सति 'उॠत्' (अ० ७.४.७) इत्यत्र ऋकारस्य तपरकरणं सार्थकं भवति, इतरथा हि सवर्णग्राहकतया दीर्घस्थानिनो दीर्घ एवादेशः स्यादिति। एवञ्च 'उॠत्' इत्यत्र तपरकरणरूपलिङ्गेन अणुदित्सूत्रस्थस्य अण्प्रत्याहारस्य विशेषार्थस्य निश्चयो जातः।

**पूर्वपक्षः–** 'इण्कोः' (अ० ८.३.५७) इत्यादिषु येषु सूत्रेषु इण्प्रत्याहारः पठ्यते, तत्र पूर्वेण वा णकारेण परेण वा ग्रहणं कार्यम्?

**समाधानम्–** इह तु सर्वत्रापि असंदिग्धं परेणैव णकारेण इण्प्रत्याहारो

ग्राह्यः। कथम्? पूर्वेण हि णकारेण इण्ग्रहणे सति 'इ-उ' इति वर्णद्वयं गृहीतं भवति। परं यत्र क्वचिदनयोर्द्वयोरपि वर्णयोः कार्यं भवति, तत्र 'इ-उ' इत्येतयोर्विभक्त्या सह सन्धिं विधाय 'य्वोः' इत्येवं स्वरूपेण निर्दिशति यथा- 'अचिश्नुधातुभ्रुवां य्वोरियङुवङौ' (अ० ६.४.७७) इति। तेन ज्ञापयत्याचार्यः सर्वाणीण्ग्रहणानि परेणैव णकारेणेति।

'य्वोः' इति निर्देशापेक्षया 'इणः' इति निर्देशे मात्रागौरवमपि नास्ति, अपितु अर्धमात्राया लाघवमेवास्ति। तद् यथा 'इणः' इति ग्रहणे 'इ' इत्यस्य एका मात्रा, 'ण्' इत्यस्यार्धमात्रा, एकमात्राकारस्य, अर्धमात्रा च विसर्गस्य, सर्वासां योगस्तिस्रो मात्राः। 'य्वोः' इति ग्रहणे च 'य्' इत्यस्यार्धमात्रा, 'व्' इत्यस्याप्यर्धमात्रा, द्वे मात्रे ओकारस्य, अर्धमात्रा च विसर्गस्य, सर्वासां च योगः सार्धत्रिमात्रो भवति। एवञ्च 'इ-उ' इत्येतयोर्निर्देशे कर्तव्ये य्वोरित्येतदपेक्षया 'इणः' इत्येवंपरे निर्देशे लाघवं भवति। पुनरपि 'इ-उ' इतिनिर्देश्ये स्थले इण्प्रत्याहारं न पठति, अनेन एतन्निश्चीयते सर्वत्र परेणैव णकारेण इण्प्रत्याहारः साध्यते इति।

इयं परिभाषा 'लण्' (प्रत्याहारसूत्र- ६) इत्यत्र भाष्यकारेण ज्ञापिता। तदुक्तं- "किं पुनरयं वर्णोत्सत्ताविव णकारः सन्देहहेतुरनुबद्धोऽपि पुनरनुबध्यते। यस्मादनेन अण्ग्रहणेषु इण्ग्रहणेषु च सन्देहः किं पूर्वेण णकारेण परेण वेति। एवं तर्हि एतज्ज्ञापयत्याचार्यः- भवत्येषा परिभाषा- 'व्याख्यानतो विशेषप्रतिपत्तिः ........०"। एवञ्चान्यत्रापि यत्र क्वचित् शिष्टवचनेषु संदेहः स्यात् तत्र व्याख्यानेन विशेषमन्विष्य सत्यविषयो निश्चेतव्यः, किन्तु तद्वचनं व्यर्थमेवेति ज्ञात्वा न हातव्यम्। संदिग्धेषु लौकिकव्यवहारेषु चापि विशेषव्याख्यानेनैव निर्णयः क्रियते इति प्रतिदिनमस्माकमनुभव इति॥१॥

---

सार्वधातुकार्धधातुकयोः (अ० ७.३.८४) इति गुणकार्यस्य कालः। तदत्र 'अलोऽन्त्यस्य', 'इको गुणवृद्धी', 'येन विधिस्तदन्तस्य', 'षष्ठी स्थानेयोगा', 'स्थानेऽन्तरतमः' (अ० १.१.५१; ३; ७१; ४८; ४९) इति पञ्चानां परिभाषाणामपि विधिसूत्रेण (सार्वधातुकार्ध०- अ० ७.३.८४) सह परिभाषाबुद्ध्या एकवाक्यता यथा स्यादिति कार्यकालपक्षः। अथ च 'दण्डिनः' इत्यत्र 'दण्डिन्+शस्'

इत्येतस्यां स्थितौ 'स्वादिष्वसर्वनाम॰' (अ॰ १.४.१७) इति पदसंज्ञां बाधित्वा[१] 'यचि भम्' (अ॰ १.४.१८) इति भसंज्ञा यथा स्यादिति यथोद्देशपक्षोऽप्यस्ति। केवले कार्यकालपक्षे समाश्रीयमाणे हि संज्ञायाः कार्येण सह प्रतिबद्धत्वात् प्रकृते च भसंज्ञककार्यस्य अभावाद् भसंज्ञा न प्रवर्तेत; अथ च 'न लोपः प्रातिपदि॰' (अ॰ ८.२.७) इति नलोपरूपपदकार्यस्य विद्यमानत्वात् सामान्यविहिता पदसंज्ञा एव स्यात्, ततश्चानिष्टो नलोपः प्रसज्येत। तदेतत् सर्वमक्षिलक्ष्यीकृत्य अत्र शास्त्रे मतद्वयमपि स्वीकृतम्। यथालक्ष्यं ह्युभयोरप्याश्रयणं क्रियते इति भावः। तच्चेदं मतद्वयस्य प्रतिपादकं **ज्ञापकसिद्धं परिभाषाद्वयम्–**

**२. कार्यकालं संज्ञापरिभाषम्।।**

**३. यथोद्देशं संज्ञापरिभाषम्।।** ( म॰ भा॰ १.१.११)

कार्यस्य कालः कार्यकालः, कार्यकालः कालोऽस्य तत् कार्यकालम्– 'षष्ठीतत्पुरुषगर्भ–उत्तरपदलोपिबहुव्रीहिः'। कार्येण काल्यते स्वसन्निधिं प्राप्यत इति वा कार्यकालः। संज्ञा च परिभाषा च तत् संज्ञापरिभाषम्–समाहारद्वन्द्वे 'ह्रस्वो नपुंसके॰' (अ॰ १.२.४७) इति नपुंसकह्रस्वत्वम्। उद्देशम्= उपदेशदेशम्= प्रथमोच्चारणकालमनतिक्रम्य यथोद्देशम्–अव्ययीभावः। इह व्याकरणे कार्यकालपक्षे संज्ञानां परिभाषाणाञ्च स एव कालोऽस्ति यः कार्यस्य कालः, कार्यवेलायां ता उपस्थिता भवन्ति। तदेव तासां स्थानं भवतीति यावत्। यथोद्देशपक्षे तु यथा कश्चिद् दीप एकस्मिन् स्थाने स्थापितः सन् सर्वं गृहं स्वप्रकाशेन प्रकाशयति तथा परिभाषा अपि एकस्मिन् देशे स्थिताः सत्यः शास्त्रस्य तद्–तद्–विषयं प्रकाशयन्ति। यथोद्देशपक्षेण चैतत् प्रयोजनमस्ति– यस्मिन् स्थाने यस्याः संज्ञायाः परिभाषाया वोच्चारणं कृतम्, तदेव तस्याः स्थानमवगन्तव्यम्।

अद्यतनेन नापितदृष्टान्तेनायं विषयोऽवगन्तुं शक्यते। द्विविधा हि खलु नापिता भवन्ति, एके स्वस्मिन् स्थाने एव तिष्ठन्ति। यैरपि मुण्डनं कारयितव्यं भवति, ते तत्रैवागत्य नापितसेवां गृह्णन्ति। अयमस्ति यथोद्देशपक्षः। अपरे पुनर्नापिता गृहं गृहं प्रति गत्वा स्वीयं कार्यं कुर्वन्ति। अयमेवास्ति कार्यकालपक्षः।

---

१. यथोद्देशपक्षे उच्चारणदेश एव संज्ञानां देशो भवति। ततश्च 'आ कडारादेका संज्ञा' (अ॰१.४.१) इति नियमाद् अनवकाशया भसंज्ञया पदसंज्ञा बाध्यते।

एतयोर्द्वयोरपि पक्षयोरयं भेदोऽस्ति यत् कार्यकालपक्षे संज्ञापरिभाषस्य दृष्टावसिद्धप्रकरणस्थानि (त्रिपादिस्थानि) अपि सूत्राणि असिद्धवद् न भवन्ति। यथोद्देशपक्षे तु असिद्धवदेव भवन्ति।

कार्यकालं संज्ञापरिभाषमिति कथं ज्ञायते? उच्यते– अमुना इति शब्दरूपे साध्ये अदस्+टा इति स्थिते 'त्यदादीनामः' (अ॰ ७.२.१०२) इत्यत्त्वे (अद अ+आ) 'अतो गुणे' (अ॰ ६.१.९४) इति पररूपे (अद+आ) 'अदसोऽसेर्दादु दो मः' (अ॰ ८.२.८०) इति मुत्वे (अमु+आ) 'आङो नास्त्रियाम्' (अ॰ ७.३.११९) इति नाभावे च कृते (अमु+ना) मुत्वस्यासिद्धत्वात् 'सुपि च' (अ॰ ७.३.१०२) इति दीर्घत्वं प्राप्नोति। तद्वारणाय 'न मु ने' (अ॰ ८.२.३) इति ने परतो मुत्वस्यासिद्धत्वं निषिध्यते। अर्थात् सिद्धत्वमुच्यते। अत्रेयं शङ्का जायते यद् 'आङो नास्त्रियाम्' (अ॰ ७.३.११९) इति नाभावेपि कर्तव्ये मुत्वस्यासिद्धत्वात् नाभाव एव तावन्न प्राप्नोति। अतो नाभावः परो नैव लभ्यते। तत्कथं 'न मु ने' (अ॰ ८.२.३) इति ने परतो मुत्वस्य सिद्धत्वं शिष्यते? उच्यते– ने परतो मुत्वस्य सिद्धत्वं शासद् ज्ञापयत्याचार्यो नाभावेपि कर्तव्ये मुत्वं सिद्धमेवेति। अन्यथा नाभावस्याभावे सति ने परतो मुत्वस्य सिद्धत्वकथनं व्यर्थमेव स्याद्। न च व्यर्थं सूत्रं प्रणीयते। अथवा 'न मु ने' (अ॰ ८.२.३) इति सूत्रं द्विरावर्तते। तत्रैकस्मिन् सूत्रे ने इति विषयसप्तमीमाश्रित्य ने कर्तव्ये मुत्वं नासिद्धं भवतीति सूत्रार्थः क्रियते। द्वितीये सूत्रे तु ने इति परसप्तमीमाश्रित्य ने परतो मुत्वमसिद्धं न भवतीति सूत्रार्थः कल्प्यते। तथापि यदि संज्ञापरिभाषं यथोद्देशमेव स्यात्तर्हि नाभावे कर्तव्ये मुत्वस्य सिद्धत्वे उच्यमानेऽपि 'शेषो घ्यसखि' (अ॰ १.४.७) इति संज्ञासूत्रं प्रति मुत्वस्य असिद्धत्वाद् घिसंज्ञा नैव प्राप्नोति। असत्यां घिसंज्ञायां कुतो घिसंज्ञाश्रयो नाभावो भवेत्। ततो ने कर्तव्ये ने परतो वा मुत्वस्य सिद्धत्वकथनं निरर्थकमेव स्यात्। न चैवं भवितुमर्हति। यतो महता प्रयत्नेन प्रणीतानि सूत्राणि आचार्यप्रवरेण अतोऽवसीयते कार्यकालपक्षोऽपि विद्यते इति। तथा सति संज्ञासूत्रं 'शेषो घ्यसखि' (अ॰ १.४.७) नाभावं विदधता विधिसूत्रेण 'आङो नास्त्रियाम्' (अ॰ ७.३.११९) इत्यनेन सहैकवाक्यतामापन्नं भवति कार्यस्यैव कालः संज्ञासूत्रस्यापि इति। तथा सति ने कर्तव्ये यदि मुत्वस्य सिद्धत्वमुच्यते तदा घिसंज्ञायामपि सिद्धत्वमुक्तमेव भवति। एवं सति 'न मु ने' (अ॰ ८.२.३) इति सूत्रं सार्थक्यं भजते।

अथेदानीं परिभाषाणामपि कार्यकालपक्षोऽस्तीति ज्ञाप्यते। कथम्?

उच्यते– अस्ति हि असिद्धप्रकरणे 'मातृपितृभ्यां स्वसा' (अ० ८.३.८४) इति सूत्रमेकम्। तेन च मातृपितृशब्दाभ्यां परस्य स्वसृशब्दस्य सकारस्य स्थाने मूर्धन्यादेशो विधीयते। यदि परिभाषाणां केवलो यथोद्देशपक्षः स्यात्तदा 'तस्मादित्युत्तरस्य' (अ० १.१.६६) 'आदेः परस्य' (अ० १.१.५३) इति परिभाषाद्वयं प्रति प्रकृतं मूर्धन्यादेशसूत्रमसिद्धमिति कृत्वा न तत्र परिभाषाद्वयं स्थानिनियमनं कुर्यात्। ततः सन्देहो भवति यतः स्वसृशब्दे द्वौ सकारौ स्तः तत्र मूर्धन्यादेशेः किं पूर्वस्य स्यादुत परस्योत द्वयोरिति? तत्राचार्यप्रवृत्तिर्ज्ञापयति अस्ति परिभाषाणामपि कार्यकालपक्ष इति यदयं 'पितृष्वसुश्छण्' (अ० ४.१.१३२) 'मातृष्वसुश्च' (अ० ४.१.१३४) इति सूत्रद्वये मातृपितृशब्दाभ्यामुत्तरस्य स्वसृशब्दस्यादेः सकारस्य मूर्धन्यादेशं कृत्वा प्रयुङ्क्ते। कथं कृत्वा ज्ञापकम्? श्रूयताम्– कार्यकालपक्षे हि सति प्रकृतपरिभाषाद्वयं तत्र तत्र उपस्थितं भवति यत्र यत्र पञ्चमीनिर्देशेन कार्यं विधीयते। तथा च मूर्धन्यादेशं विदधता 'मातृपितृभ्यां स्वसा' (अ० ८.३.८४) इति असिद्धसूत्रेण सह तस्य परिभाषाद्वयस्यैककालता भवतीति नास्त्यसिद्धत्वप्रसङ्गः। एवमसिद्धप्रकरणेऽपि परिभाषाणां व्यापारात् अनियमप्रसङ्गे नियमो भवति। प्रकृते च सूत्रे मातृपितृभ्याम् इति पञ्चमीनिर्देशाद् उक्तपरिभाषाद्वयोपस्थानात् स्वसृशब्दस्यादेरेव सकारस्य मूर्धन्यादेशो भवति न परस्य न च द्वयोरित्यलमतिविस्तरेण।

पुनर्यथोद्देशमस्तीति कथं ज्ञायते? 'षपूर्वहन्धृतराज्ञामणि' (अ० ६.४.१३५) इत्यत्र 'राज्ञाम्' इति यद् निर्दिशति तेन ज्ञायते। कथम्? 'राजन्+आम् इत्यत्र पदसंज्ञा भसंज्ञा च प्राप्यते। 'आ कडारादेका संज्ञा' (अ० १.४.१) इति परिभाषामनुसृत्यानवकाशां भसञ्ज्ञां विधाय, तन्निमित्तकमल्लोपं कृत्वा राज्ञामिति निर्दिशति आचार्यः। तच्च पौर्वापर्यं तदैव भवितुमर्हति यदा यथापाठम् अर्थात् संज्ञा- परिभाषयोः सूत्रयोरुच्चारणदेशोऽनुक्रियते। अतः स्पष्टं यथोद्देशमस्तीति।

अधुना परिभाषाणां यथोद्देशपक्षः साध्यते। 'याडापः' (अ० ७.३.११३) इत्यत्र 'घेर्ङिति' (अ० ७.३.१११) इत्यतो ङितीत्यनुवर्त्तते। तत आबन्तादङ्गाद् ङिति परतो याडागमो भवतीति सूत्रार्थः सम्पद्यते। तत्र आप इति पञ्चमीनिर्देशात् 'तस्मादित्युत्तरस्य' (अ० १.१.६६) इति उत्तरस्य (परस्य) कार्यं प्राप्नोति। तथा ङितीति सप्तमीनिर्देशात् 'तस्मिन्निति निर्दिष्टे पूर्वस्य' (अ० १.१.६५) इति पूर्वस्य कार्यं प्राप्नोति। द्वयोः परिभाषयोर्विरुद्धकथनात् सन्देहो भवति कस्य वा याडागमः स्यादिति। एषा स्थितिः केवलकार्यकाल- पक्षाश्रयेण समुद्भवति।

यतः कार्यकालपक्षे परिभाषाणां विधिवाक्येन सह एकवाक्यतामापन्नानां सर्वेषां सह समानकालत्वात् 'विप्रतिषेधे परं कार्यम्' (अ० १.४.२) इति व्यवस्था न भवति। एवं सति 'स्वमज्ञातिध- नाख्यायाम्' (अ० १.१.३४) इति सूत्रे आख्यायामिति शब्दं प्रयुञ्जान आचार्यो ज्ञापयति परिभाषाणां यथोद्देशपक्षोप्यस्तीति। कथं ज्ञायते? उच्यते– आख्यायते अनया इति करणसाधने आङ्पूर्वात् ख्याञ् प्रकथने इति धातोरातश्चोपसर्गे (अ० ३.३.१०६) इति अङ्प्रत्यये कृते (आ ख्याञ्+अङ्) 'आतो लोप इटि च' (अ० ६.४.६४) इति धातोराकारस्य लोपे कृते (आख्य्+अ) 'अजाद्यतष्टाप्' (अ० ४.१.४) इति टापि सति (आख्य्+अ+आ) आख्याशब्दः सिद्ध्यति। ततः आख्याशब्दात् सप्तम्येकवचने (आख्या+ङि) 'ङेराम्नद्याम्नीभ्यः' (अ० ७.३.११६) इति ङेः स्थाने आमि कृते (आख्या+आम्) 'याडापः' (अ० ७.३.११३) इति याट् प्राप्नोति। ङितीति सप्तमीनिर्देशात् पूर्वस्य याट् स्यात् तथा आप इति पञ्चमीनिर्देशादुत्तरस्य स्याद्। तत्र यथोद्देशपक्षाश्रयणेन 'विप्रतिषेधे परं कार्यम्' (अ० १.४.२) इति परत्वात् पञ्चमीनिर्देशानुसारं ङेर्याडागमं कृत्वा 'आख्यायाम्' इति यदयं प्रयुङ्क्ते ततो ज्ञायते परिभाषाणां यथोद्देशपक्षोऽपि अस्तीति।।२,३।।

---

'दाधाघ्वदाप्' (अ० १.१.१९) इत्यस्मिन् सूत्रे 'अदाप्' इति वचनेन 'दाप् लवने' (अदा० ५२) धातोरेव निषेधः प्राप्नोति न तु 'दैप् शोधने' (भ्वादि० ६५८) इत्येतस्यापि। एवञ्च 'दैप् शोधने' धातोर्घुसंज्ञा स्यादेव; ततश्च 'अवदातं मुखम्' इत्यत्र 'अच उपसर्गात्तः' (अ० ७.४.४७) इत्यजन्ताद् उपसर्गाद् उत्तरस्य घुसंज्ञकस्य धातोः विधीयमानस्तकारादेशः प्रसज्येत, तथा च 'अवत्तं मुखम्' इत्यनिष्टं रूपं स्यात्। एतस्मात् कारणाद् दैप्धातोः घुसंज्ञा नेष्यते। एवंविधानि प्रयोजनानि सम्मुखीकृत्यैव उच्यते एषा **ज्ञापकसिद्धा परिभाषा–**

## ४. अनेकान्ता अनुबन्धाः।। (म० भा० १.१.२०)

प्–ञ्–ङ्–क् इत्येवमादयोऽनुबन्धाः[१] यैर्धात्वादिभिः सह सम्बद्धाः संयुक्ताः वा भवन्ति, न ते तेषाम् एकान्ताः= अवयवा मन्यन्ते, अपितु

---

१. इत्संज्ञायोग्यत्वमनुबन्धत्वम्।

तेऽनुबन्धास्तेभ्यो धात्वादिभ्यः पृथगेव भवन्ति। अनेन हि 'दैप्' इत्येतं धातुम् एजन्तं मत्वा आकारादेशं विधाय[१] दाप्रूपत्वाद् 'अदाप्' इति निषेधेन घुसंज्ञा प्रतिषिद्धा भवति। एवञ्च 'अवदातम् मुखम्' इत्यत्र न कश्चिद् दोषो जायते।

'उदीचां माङो व्यतीहारे' (अ० ३.४.१९) इत्यत्र आचार्यो यत् कृतात्त्वं 'मेङ् प्रणिदाने' (भ्वा० ६८८) इति धातुं माङ्रूपेण पठति तेन ज्ञाप्यते यद् 'अनेकान्ता अनुबन्धा' इति। एकान्तपक्षे हि अकृते ङकारानुबन्धलोपे एकारान्तत्वाभावाद् आत्त्वमेव[१] न प्रसज्येत॥४॥

---

यदीमेऽनुबन्धाः येन सह पठिताः सन्ति न तस्याऽवयवा भवन्ति चेत् शास्त्रे कित्-शित्-ङित् इत्येवमादयो निर्देशा नोपपद्येरन्। कथम्? क् इद् यस्य स किद् भवति, यदि च स तस्यावयव एव न स्यात् तर्हि किदित्यादिनिर्देशः कथं सम्भाव्येत? एतदर्थमेषा **ज्ञापकसिद्धा परिभाषा–**

## ५. एकान्ता अनुबन्धाः॥ (म० भा० १.३.९)

अनुबन्धा येन सह पठिता भवन्ति तस्य हि तेऽवयवा अपि स्वीक्रियन्ते। एवञ्च कृत्वा कित्-शित्प्रभृतयो निर्देशा उपपद्यन्ते एव।

अनेकान्तपक्षे तु कित्-शित् इत्येवमादौ बहुव्रीहिसमासस्य आश्रयणात् तस्य चान्यपदार्थप्रधानत्वात् तल्लभ्यप्रत्ययेन (क्त, शप्, इत्यादिप्रत्ययेन) सह ककाराद्यनुबन्धस्य मुख्यः सम्बन्धो न स्याद्। एकान्तपक्षे तु तस्मिन् सम्बन्धे न काचिद् बाधेति।

'काश्यादिभ्यष्ठञ्ञिठौ' (अ० ४.२.११५) इत्यत्र 'ठञ्ञिठौ' इति प्रत्ययद्वयमध्ये 'ञ्' इति अनुबन्धद्वयपठनेन ज्ञाप्यत एतद्- 'एकान्ता अनुबन्धा' इति। अनेकान्तत्वे हि देहलीदीपकन्यायेन यथा एक एव देहलीस्थो दीपक कस्यचिदेकस्यैव प्रकोष्ठस्य अनवयवत्वाद् उभावपि प्रकोष्ठौ प्रकाशयति, तथैव ह्येक एव मध्यपठितो ञकार उभयत्रापि उपकारी स्यादेव। तदेवं द्वितीयं ञकारं पठन्नाचार्य इमां परिभाषां ज्ञापयति॥५॥

---

१. 'आदेच उपदेशेऽशिति' (अ० ६.१.४४)।

एवञ्चाऽनुबन्धेषु ह्येकान्तोऽनेकान्तश्चोभावपि पक्षौ स्वीक्रियेते। उभयत्रापि च प्रयोजनं प्रदर्शितम्। तत्र एकान्तपक्षे केचन दोषाः समुद्भवन्ति येषां परिहाराय अग्रिमास्तिस्रः परिभाषाः सन्तीति।

**तत्र च प्रथमस्तावद् दोषः–** 'अनेकालशित्०' (अ० १.१.५४) इति सूत्रेण अनेकाल् य आदेशः शिच्च स सर्वस्यापि स्थाने भवति। तदत्र 'इदम इश्' (अ० ५.३.३) इति 'इश्' आदेशः, 'अष्टाभ्य औश्' (अ० ७.१.२१) इति च 'औश्' आदेशः शकारसहितत्वाद् अनेकालेवास्ति, एवं विधेषु चान्यत्रापि सर्वेषु सन्दर्भेषु 'एकान्ता अनुबन्धाः' इत्यनुपदमेवोक्तं सिद्धान्तमास्थाय अनेकाल्त्वादेव सर्वादेशः सेत्स्यति। एवञ्च 'अनेकाल् सर्वस्य' इत्येतावदेव सूत्रं सुवचम्; अनर्थकं शिद्ग्रहणम्। किमेतदाचार्येण नावबुद्धम्? शान्तं पापम्! कथं नामाचार्येण नावबुद्धं स्यात्। परम् उपर्युक्तया प्रक्रियया तु शिद्ग्रहणं स्पष्टमेव व्यर्थं प्रतिभाति। तदेवं व्यर्थं सदपि शिद्ग्रहणं कुर्वन्नाचार्यो व्यञ्जनया वृत्त्या ज्ञापयत्येतां **ज्ञापकसिद्धां परिभाषाम्–**

## ६. नानुबन्धकृतमनेकाल्त्वम्।। (म० भा० १.१.५५)

अनुबन्धेन कृतमनुबन्धकृतम्। अनुबन्धकृतं यदनेकाल् भवेत् तद्धि न अनेकाल् मन्तव्यम्, किं तर्हि? एकालेव। यद्धि अनुबन्धरहितम् अनेकाल् भवति तदेवाऽनेकाल् स्वीक्रियते इह शास्त्रे। अनेन किमायातम्? अनेन ह्येतदायातं यद् 'इश्' इत्येवमादय आदेशाः शित्त्वान्नानेकालो भवन्ति। किन्तर्हि? एकाल एव। एवञ्च सत्यां ह्यस्यां परिभाषायां शिद्ग्रहणं सार्थकं सत् स्वार्थे चरितार्थतामभजत्। अन्यत्र चेदं फलं यद्–अर्वणस्त्रसावनञः (अ० ६.४.१२७) इति सूत्रेण 'अर्वन्' इत्येतस्य शब्दस्य 'तृ' इत्ययमादेशो विधीयते, स चेद् ऋकारानुबन्धसहितत्वाद् अनेकाल् मन्येत तर्ह्यनिष्टः सर्वादेशः आपद्येत, अन्त्यस्य तु इष्यते; अनुबन्धकृतोऽयमनेकाल् इति कृत्वा सर्वादेशो न भवति, इत्येवमादीनि बहूनि प्रयोजनानि सन्ति।

**इदमत्रावधेयम्–** ज्ञापकमेतद् एकान्तपक्ष एव। अनेकान्तपक्षे तु शकारानुबन्धेन न शिद् अनेकाल् भवेदिति सर्वादेशार्थमेव शिद्ग्रहणं भवति, न तु ज्ञापकार्थम्। सति हि प्रयोजने न ज्ञापकं भवति। असत्येव प्रयोजने आचार्यस्य मनोगतं निस्सार्यते इति।।६।।

**तत्र तावद् द्वितीयो दोषः–** सम्प्रति सत्यामपि षष्ठ्यां परिभाषायाम् अनुबन्धानामेकान्तपक्षे 'दैप् शोधने' (भ्वादि॰ ६५८) इत्यस्य धातोः प्रथम एव पकारलोपो जातः। सति च पकारलोपे 'आदेच उपदेशे॰' (अ॰ ६.१.४४) इत्याकारादेशे कृते 'दाधा घ्वदाप्' (अ॰ १.१.१९) इत्यत्रादाप् इति विहितो घुसंज्ञाप्रतिषेधो न प्रवर्तेत। कथञ्चित् पकारलोपः पूर्वन्न क्रियेत तदापि दोषस्तदवस्थ एव। कथम्? अनुबन्धानाम् एकान्तपक्षे दैप्धातुरेजन्तो नास्ति, ततश्चाकारादेशाभावे दाप् इति रूपन्न लब्धं स्यात्, एवञ्च 'अदाप्' इति सूत्रोक्तः प्रतिषेधः 'दाप् लवने' (अदा॰ ५२) इत्यत्रैव चरितार्थो भवेत् न तु 'दैप् शोधने' (भ्वादि॰ ६५८) इत्यत्र। ततश्च घुसंज्ञायां सत्यां 'अवदातं मुखम्' इत्यत्र 'अच उपसर्गात्तः' (अ॰ ७.४.४७) इति तत्त्वे सति 'अवत्तं मुखम्' इत्यनिष्टं रूपमापद्येत। तदर्थं भवत्येषा **ज्ञापकसिद्धा परिभाषा–**

**७. नानुबन्धकृतमनेजन्तत्वम्॥** (म॰ भा॰ ३.४.१९)

अनुबन्धेन ह्येजन्तता न व्याहन्यते इति। अनुबन्धे सत्यपि धातुरेजन्त एव स्वीक्रियते इति यावत्।

'उदीचां माङो व्यतीहारे' (अ॰ ३.४.१९) इत्यस्मिन् सूत्रे 'मेङ् प्रणिदाने' (भ्वा॰ ६८८) इति धातोः कृतात्त्वनिर्देशोऽ**स्या ज्ञापकम्**[१]। तदत्र अकृताकारादेशम् 'उदीचां मेङः' इत्येवं रूपनिर्देशं कुर्याच्चेद् व्यतीहारग्रहणं न करणीयं भवति, मेङः स्वत एव व्यतीहारार्थत्वाद्। कृताकारादेशे 'माङ्' इत्येवंरूपे निर्देशे तु 'माङ् माने' (जुहो॰ ६, दिवा॰ ३३) इत्यस्य व्यावृत्त्यर्थं व्यतीहारग्रहणप्रयोजनं स्पष्टमेव। तदेवं 'उदीचां मेङः' इति लघीयसा न्यासेन सिद्धे 'उदीचां माङो व्यतीहारे' इति आत्त्वं विधाय यद् गरीयांसं यत्नमारभते तज्ज्ञापयत्याचार्यः– अवस्थिते एवाऽनुबन्धे आकारादेशः प्रवर्तते। एवञ्च 'मेङ्' इत्यस्याम् अवस्थायामेव 'माङ्' इति जातम्। अनेन ह्येतत् फलितम्सत्यपि ह्यनुबन्धे एजन्तत्वस्य व्याघातो न भवति, तस्माद् 'मेङ्' इत्यत्र सत्येव ङकारानुबन्धे एज्निमित्तक आकारादेशोऽभूदिति।

सर्वत्र ज्ञापकसिद्धपरिभाषाणां फलद्वयं भवति– स्वार्थं परार्थञ्च।

---

१. अनेकान्तपक्षस्वीकारे तु इदं सामान्यापेक्षज्ञापकत्वेन अनेकान्तत्वमेव ज्ञापयति, यस्मिन् ज्ञापिते सति प्रकृतप्रसङ्गः स्वत एव सिध्यति। परं एकान्तपक्षाङ्गीकारे तु विशेषापेक्षत्वेन एकान्तत्वापवादभूतायाः प्रकृतपरिभाषाया ज्ञापकाय प्रभवति।

प्रकृते च सत्यां ह्यस्यां परिभाषायाम् 'उदीचां माङो व्यतीहारे' इति गरीयान् अपि यत्नः सार्थको जात इति इयमेव परिभाषायाः स्वार्थे चरितार्थता। अन्यत्र चेदं फलं यद् दैप्धातोरपि वर्तमाने एव पकारानुबन्धे एजन्ततामङ्गीकृत्य आकारादेशः प्रवृत्तः। एवञ्च घुसंज्ञाविधायकसूत्रेण 'अदाप्' इति निषेधस्य प्रवृत्तौ सत्यां घुसंज्ञाप्रतिषेधे सति 'अवदातं मुखम्' इतीष्टः प्रयोगः सुसिद्धः।।७।।

---

**तत्र तावत् तृतीयो दोषः–** अनुबन्धानामेकान्तपक्षे ह्ययमपि दोषः समापद्यते यद् अण्–क इत्येवमादिषु प्रत्ययेषु ण्–क् इत्याद्यनुबन्धानाम् आसञ्जनात् स्फुटमेव भिन्नरूपा इमे प्रत्यया भवन्तीति, ततश्च 'वाऽसरूपो-ऽस्त्रियाम्' (अ० ३.१.९४) इति नियमेनाऽपवादभूता अप्यसरूपप्रत्यया उत्सर्गाणां विकल्पेन बाधकाः स्युः। अनेकान्तपक्षे तु नास्य दोषस्यावसरः, अण्–क इत्यादीनां विगतानुबन्धानां सारूप्यात् सरूपापवादानाम् उत्सर्गान् प्रति नित्यबाधकत्वात् सर्वम् इष्टं सिध्यति। तदेवम् एकान्तपक्षे एव 'कर्मण्यण्-(अ० ३.२.१) इत्युत्सर्गविषये 'आतोऽनुपसर्गे कः' (अ० ३.२.२) इत्यपवादस्य नित्यबाधकत्वम् अप्राप्तम्। एवञ्च यथा 'गोदः, कम्बलदः' इत्यादिषु 'अणः' अपवादः 'कः' भवति तथाऽस्यापवादस्य विषये उत्सर्गस्याऽणोऽपि प्रवृत्तिः स्यात्। तच्च नेष्यते, एतदर्थं भवत्येषा **ज्ञापकसिद्धा परिभाषा–**

## ८. नानुबन्धकृतमसारूप्यम्।। (म० भा० ३.१.९४)

अनुबन्धेन कृतम् असारूप्यं न। येषु प्रत्ययेषु अनुबन्धमात्रकृतो भेदोऽस्ति, ते ह्यनुबन्धेन हेतुना भिन्नरूपा अपि दृश्यमाना असरूपा न भवन्ति। किं तर्हि? सरूपा एव।

'ददातिदधात्योर्विभाषा' (अ० ३.१.१३९) इत्येतस्मिन् सूत्रे विभाषाग्रहणस्य एतत् प्रयोजनं यत् शप्रत्ययाऽभावपक्षे 'श्याद्व्यधा०' (अ० ३.१.१४१) इत्याकारान्तलक्षणः उत्सर्गरूपो णप्रत्ययोऽपि यथा स्यात्। परम् अण्–क प्रत्ययवद् ण–श प्रत्ययावपि ह्यनुबन्धेनासरूपावेव स्तः। असरूपेषु च प्रत्ययेषु 'वाऽसरूपोऽस्त्रियाम्' (अ० ३.१.९४) इति परिभाषासूत्रेण उत्सर्गापवादविकल्पः स्यादेव। पुनर्विभाषाग्रहणं व्यर्थं सञ्ज्ञापयति यदनुबन्धमात्रभेदेनाऽसारूप्यन्न भवति। किं तर्हि? सारूप्यमेव। एवं हि ण–श प्रत्ययौ नासरूपौ स्तः, येन

'वाऽसरूपो॰' (अ॰ ३.१.९४) इत्यधिकारेण परिभाषया[१] वा विकल्पो भवेदिति। तदेवम् अनया परिभाषया विभाषाग्रहणं स्वार्थे चरितार्थं सत् सार्थक्यमावहति, अन्यत्र चेदं फलमस्ति यत् 'गोदः, कम्बलदः' इत्यादौ क-अण् इत्येतयोरनुबन्ध-रहितयोः सारूप्यात् 'वाऽसरूपो॰' (अ॰ ३.१.९४) इति सूत्रस्य विषयाभावात् कप्रत्ययापवादविषये उत्सर्गस्याऽणः प्रवृत्तिर्न भवति, किन्तु कप्रत्ययोऽणं नित्यमेव बाधते।

तथा 'विभाषा कृवृषोः' (अ॰ ३.१.१२०) इति क्यपो विकल्पविधानमपि प्रकृतां परिभाषां ज्ञापयति।

'ऋहलोर्ण्यत्' (अ॰ ३.१.१२४) इति ण्यति प्राप्ते 'विभाषा कृवृषोः' (अ॰ ३.१.१२०) इति क्यप् (अपवादः) विकल्पेन विधीयते द्वयोर्ण्यत्क्यपोरुत्सर्गापवादयोः समावेशो यथा स्यादिति। यदि अनुबन्ध-कृतमसारूप्यं स्वीक्रियेत ततो ण्यत्क्यपोरसारूप्याद् अन्तरेणापि विकल्पविधानं 'वासरूपोऽस्त्रियाम्' (अ॰ ३.१.९४) इत्येव द्वयोर्ण्यत्क्यपोः समावेशः स्याद्। एवं सिद्धे सति यत् पुनर्विकल्पं शास्ति तज्ज्ञापयत्याचार्यः परिभाषैषास्तीति। अस्यां तु सत्याम् अनुबन्धरहितयोर्ण्यत्क्यपोः सारूप्याद् 'वासरूपोऽस्त्रियाम्' (अ॰ ३.१.९४) इति विकल्पो न स्यादिति विकल्पविधानं सार्थकं भवति।।८।।

---

अर्थप्रत्यायनार्थं शब्दः प्रयुज्यते। सोऽर्थोऽपि कृत्रिमाकृत्रिमभेदेन द्विविधः। अल्पजनसमुदाये प्रसिद्धोऽर्थो कृत्रिमः। लोकप्रसिद्धार्थोऽकृत्रिमः। तद्यथा व्याकरणशास्त्रे वृद्धिरादैच्सूत्रेणादैचां वर्णानां वृद्धिसंज्ञा परिभाषितेत्यतो वृद्धिशब्दस्यादैज्वर्णरूपोऽर्थः वैयाकरणनिकाये एव प्रसिद्धो न तु सर्वत्र लोके इति कृत्वा कृत्रिम उच्यते। अथ तस्यैव वृद्धिशब्दस्योपचयार्थो लोके सर्वत्र प्रसिद्ध इति कृत्वा अकृत्रिम उच्यते। अनेनैव प्रकारेण संज्ञापि द्विविधा कृत्रिमाकृत्रिमभेदेन। तद्यथा आदैज्वर्णरूपस्य वृद्धिसंज्ञा व्याकरणशास्त्रे एव प्रसिद्धा न तु सर्वत्र लोके इति कृत्रिमा उच्यते। उपचयार्थस्य वृद्धिसंज्ञा सर्वत्र लोके प्रसिद्धा इति अकृत्रिमा उच्यते।

एवं सति व्याकरणशास्त्रे यासां वृद्ध्यादिसंज्ञानां कृत्रिमाकृत्रिमार्थौ

१. 'वाऽसरूपो॰' इति परिभाषासूत्रम् अधिकारसूत्रं वोभयमपि मन्तुं शक्यते।

स्तस्तत्र सन्देहो भवति किं कृत्रिमार्थो ग्राह्य उत अकृत्रिम इति। तदर्थं भवत्येषा **लौकिकन्यायसिद्धा परिभाषा–**

## ९. कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः।। (म० भा० १.१.२३)

इह व्याकरणे यत्र क्वचित् कृत्रिमेऽकृत्रिमे च उभयोरप्यर्थयोः कार्यं संभाव्यते तत्र कृत्रिमे एवार्थे कार्येण भवितव्यं न तु अकृत्रिमे। एवं च कृत्वा वृद्धिशब्देनादैज्वर्णा धातुशब्देन भूवादयः कृत्रिमा अर्था गृह्यन्ते न तु उपचयसुवर्णादयः अकृत्रिमा अर्थाः। एवं सर्वत्र ज्ञेयम्।

तथा च लोकेऽपि यदि यस्य कस्यचिद् बालकस्य नामकरणसंस्कारावसरे गोपालक इति नाम निजनामरूपेण सङ्केतितो भवति तदा गोपालकशब्दस्य तद्बालकरूपोऽर्थः कृत्रिम इत्युच्यते यतो अल्पसमुदाये प्रसिद्धः सोऽर्थः। परं तस्यैव गोपालकशब्दस्य गोपालनसंलग्नमनुष्यरूपोऽर्थः सर्वत्र लोके प्रसिद्ध इति अकृत्रिमः स्वाभाविकोऽर्थः उच्यते।

यदि गोपालकमानयेति उच्यते तदा यस्य बालकस्य गोपालक इति निजनामास्ति स एव आनीयते।।।९।।

---

अथ पूर्वोक्तपरिभाषायां स्वीकृतायां सत्यां तत्र तत्र दोषो भवति यत्र यत्र कृत्रिमेण अर्थेन न किञ्चित् प्रयोजनमस्ति यथा– 'कर्त्तरि कर्मव्यतिहारे' (अ० १.३.१४) इति। इह सूत्रे हि कृत्रिमार्थः कर्मसंज्ञया (कर्मशब्देन) गृह्येत चेद्– 'देवदत्तस्य धान्यं व्यतिलुनन्ति' (देवदत्तस्य स्वभूतं धान्यं लवनक्रियया भृतिरूपेणान्ये स्वीकुर्वन्ति) इत्यत्र कर्तुरीप्सिततमस्य धान्यरूप-कर्मणो व्यतिहारार्थकस्य विद्यमानत्वाद् आत्मनेपदेन भवितव्यम्, तच्च नेष्यते, परस्मैपदमेव तु इष्यते, तस्माद् एवंविधेषु प्रसङ्गेषु दोषानपाकर्तुं भवत्येषा **ज्ञापकसिद्धा परिभाषा–**

## १०. उभयगतिरिह भवति।। (म० भा० १.१.२३)

इह व्याकरणशास्त्रे उभयगतिरर्थात् क्वचित्कृत्रिमार्थे क्वचिदकृत्रिमार्थे कार्यबोधो भवति।

कथं ज्ञायतेऽस्त्येषेति। 'संख्याया अतिशदन्तायाः कन्' (अ० ५.१.२२) इत्यत्र 'अतिशदन्तायाः' इति निषेधेन। कथं कृत्वा ज्ञापकम्? तथा हि

'बहुगणवतुडति संख्या' (अ० १.१.२२) इति सूत्रेण कृत्रिमार्था बहुशब्दः, गणशब्दः, वतिप्रत्ययान्तः, डतिप्रत्ययान्तश्च परिभाषिताः। न च तत्र त्यन्तो वा शदन्तो वास्ति। यदि संख्याशब्दस्य कृत्रिमार्थ एव गृह्येत तर्हि 'अतिशदन्तायाः' इति प्रतिषेधो निरर्थको भवति। अतः प्रतिषेध एव ज्ञापयति भवत्यत्र व्याकरणे उभयोरपि कृत्रिमाऽकृत्रिमार्थयोर्ग्रहणमिति। तथा सति विंशत्यादयस्त्यन्ताः त्रिंशदादयः शदन्ताश्च संख्यासंज्ञाया लौकिका अर्थाः सन्तीति कृत्वा तेभ्यः कन्प्रत्ययो मा भूदिति प्रतिषेध उच्यमानः सार्थको भवति।

अन्यत्र च प्रयोजनमस्ति- 'कर्मणि द्वितीया' (अ० २.३.२) इत्यत्र 'कर्तुरीप्सिततमम्०' (अ० १.४.४९) इति सूत्रोक्तः कृत्रिमार्थ ईप्सिततमकारकं गृह्यते, 'कर्त्तरि कर्मव्यतीहारे' (अ० १.३.१४) इत्यत्र च कर्मशब्देनाकृत्रिमस्य क्रियारूपस्यार्थस्य ग्रहणं भवति। तथा हि 'कृषिवला व्यतिलुनते' इति क्रियाया व्यतिहारत्वादात्मनेपदं जातम् अथ च 'देवदत्तस्य धान्यं व्यतिलुनन्ति' इत्यत्र कृत्रिमकर्मणो व्यतिहाररूपत्वाद् 'शेषात् कर्त्तरि०' (अ० १.३.७८) इति परस्मैपदमेव अभूत् 'कर्त्तरि कर्मव्य०' (अ० १.३.१४) इति आत्मनेपदन्नाभूत्। अन्यत्रापि 'कर्तृकरणयोस्तृतीया' (अ० २.३.१८) इति करणशब्देन 'साधकतमं करणम्' (अ० १.४.४२) इति सूत्रोक्तस्य साधकतमस्य कारकस्य कृत्रिमस्य अर्थस्य ग्रहणात् 'रथेन गच्छति' इत्यत्र तृतीयाविभक्तिर्जाता, अथ च 'शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे' (अ० ३.१.१७) इत्यत्र करणशब्देन अकृत्रिमस्य क्रियारूपस्यार्थस्य ग्रहणात् 'शब्दं करोति शब्दायते' इत्यादौ करोत्यर्थे क्यङ्प्रत्ययः सिद्धो भवतीत्येवमाद्यनेकं प्रयोजनमस्ति।।१०।।

---

अध्येता, शयिता- इत्येवमादिषु प्रयोगेषु तृच्प्रत्ययस्याङित्त्वे अपि 'इङ्- शीङ्' इत्येतयोर्धात्वोर्ङित्वाद् गुणनिषेधेन भवितव्यम्। अनुबन्धानाम् एकान्तपक्षे हि उभावपि धातू ङितौ स्तः, परम् अनेकान्तपक्षे तु अनुबन्धानां धातोरवयवत्वाऽभावात् पृथग्भूता एव तिष्ठन्ति। ततश्च 'सार्वधातुकार्ध०' (अ० ७.३.८४) इति प्राप्तस्य गुणस्य 'क्ङिति च' (अ० १.१.५) इति निषेधे कर्तव्ये सति इगन्तः कार्यी लब्धः। तदेवम्प्रकारकं दोषजातं समाधातुं भवतीयं **ज्ञापकसिद्धा परिभाषा–**

## ११. कार्यमनुभवन् हि कार्यी निमित्तत्वेन नाश्रीयते॥

कार्यभाजः कार्यिणो निमित्तपदेनाश्रयणं न क्रियते। यत् कार्यभाक् तत् कार्यं प्रति निमित्तं न भवतीत्यर्थः। यदेव कार्यि= कार्याधिकरणं तदेव निमित्तं न भवतीति यावत्।

शीङ्धातुर्ङकारानुबन्धेन सह पठितः 'अनुदात्तङित आत्मनेपदम्' (अ० १.३.१२) इत्यात्मनेपदं यथा स्यादिति। परं शीङः तृजादिषु प्रत्ययेषु परतः 'सार्वधातुकार्धधातुकयोः' (अ० ७.३.८४) इति प्राप्तस्य गुणस्य 'क्ङिति च' (अ० १.१.५) इति निषेधः प्रसज्यते। यतः सार्वधातुकार्धधातुकयोरिति विधीयमानो गुणो यथा परतः सार्वधातुकार्धधातुकमपेक्षते तथा पूर्वत्र इगन्ताङ्गमपि अपेक्षते। न चान्यतराभावे गुणो भवितुमर्हति उभयोरपि निमित्तत्वात्। ततश्च शीङः अङ्गस्य प्राप्यमाणस्य गुणस्य ङिन्निमित्ततास्तीति कृत्वा 'क्ङिति च' (अ० १.१.५) इति गुणनिषेधः प्राप्नोति। एवं सति ईदृशेषु स्थलेषु गुणनिषेधो न भवतीत्याचार्यप्रवृत्त्या ज्ञायते। तथा हि 'स्थण्डिलाच्छयितरि व्रते' (अ० ४.२.१४) इत्यत्र शयितरि इति तृचि परतः शीङो गुणं कृत्वा निर्दिशति। यदि कार्यभाजः शीङोऽपि तृचा सह गुणं प्रति निमित्तत्वं स्यात् ततः शीङो ङित्त्वात् तन्निमित्तकगुणोऽपि ङिन्निमित्तक इति 'क्ङिति च' (अ० १.१.५) इति निषेधाद् गुणो नाभविष्यत्। तदेवं गुणं विधाय शयितरि इति निर्दिशन्नाचार्यः प्रकृतां परिभाषां ज्ञापयति।

**पूर्वपक्षः–** यदि हि 'कार्यी निमित्तत्वेन नाश्रीयते' ऊर्णुधातोः सनि प्रत्यये 'ऊर्णु+स' इडागमे च कृते 'ऊर्णु+इस' इति स्थिते द्विर्वचनात् परत्वाद् गुणेऽवादेशे च 'ऊर्णव्+इस' इति जाते 'पुनः प्रसङ्गविज्ञानात् सिद्धम्' (परि० ४०) इति नियमेन 'सन्यङोः' (अ० ६.१.९) इति द्विर्वचने विधातव्ये 'द्विर्वचनेऽचि' (अ० १.१.५८) इति स्थानिवद्भावे कर्तव्ये सन्नन्तस्य कार्यित्वात् कार्यिणश्च निमित्तत्वेनाऽनाश्रयणात् स्थानिवद्भावो न स्यात्। ततश्च 'अजादेर्द्वितीयस्य' (अ० ६.१.२) इति 'नव्'[1] इत्येतस्यैव द्विर्वचनं स्यात्– तथा च सति अभ्यासस्य 'सन्यतः' (अ० ७.४.७९) इति इत्त्वे 'ऊर्णिनविषति' इत्यनिष्टं रूपमापद्येत, इष्यते च स्थानिवद्भावेन 'नु' इत्येतस्य द्विर्वचनं यथा स्यात् तथा च सति

१. 'निमित्ताऽपाये नैमित्तिकस्याप्यपायः' इति न्यायेन णत्वरहितस्य 'नव्' इत्येतस्य द्विर्वचनं स्यादित्युच्यते।

'ऊर्णुनविषति' इति इष्टं रूपं सिद्धं भवितुमर्हति।

**समाधानम्–** एवं विधं दोषप्रसङ्गमवलोक्यैव हि परिभाषायां 'कार्यमनुभवन् कार्यी' इत्युक्तम्। अर्थात् तदेव कार्यि निमित्तरूपेण नाश्रीयते यत् कार्यमनुभवति। कार्यम् अननुभवन् तु कार्यी निमित्तत्वेन आश्रीयते= आश्रयितुं शक्यते इत्यर्थः। एवञ्च 'ऊर्णव्+इस' इत्यत्र सन्नन्तस्य कार्यित्वेऽपि 'द्विर्वचनेऽचि' (अ० १.१.५८) इति प्रवृत्तिवेलायां 'इस' इत्येतस्य निमित्तताऽऽ-श्रीयते, तस्माच्च पृथग्भूतस्य नव्शब्दस्य द्विर्वचनं कर्तुमिष्यते। एतस्मात् कारणाद् एवं विधेषु प्रसङ्गेषु नानया परिभाषया काचिद् बाधोपस्थाप्यते। यत्र हि कार्यी निमित्तञ्च एकमेव भवति, तत्रैवाऽस्याः परिभाषायाः स्वीकृतत्वात्। तद्यथा– ऋधातोः सनि इटि[१] गुणे च कृते 'अर्+इस' इति स्थिते 'द्विर्वचनेऽचि (अ० १.१.५८) इति द्विर्वचने कर्तव्येऽजादेशः प्रकृतपरिभाषाबलाद् न स्थानिवद् भवति। अत्र हि 'इ' इत्येतद् अजादेशस्य निमित्तरूपेणाश्रीयते द्विर्वचनरूपं कार्यं कर्तुमपि तस्यैवाश्रयणं क्रियते इति न भवति स्थानिवद्भावः। तथा च सति 'रिस् रिस्' इत्येव द्विरुच्यते 'अरिरिषति' इति इष्टं रूपं सिद्धं भवतीति विभावनीयं सुधीभिः॥११॥

---

'प्रणिदापयति, प्रणिधापयति' इत्यादिषु प्रयोगेषु 'दाधा घ्वदाप्' (अ० १.१.१९) इति दारूपस्य धारूपस्य च प्रोक्ता घुसंज्ञा णिचि प्रत्यये 'अर्तिह्रीव्ली०' (अ० ७.३.३६) इति पुकि सति तत्-सहितस्य 'दाप्-धाप्' इत्येतस्य समुदायस्य न प्राप्नोति; ततश्च 'नेर्गदनदपतपदघु०' (अ० ८.४.१७) इति उपसर्गस्थाद् निमित्ताद् उत्तरस्य घुसंज्ञके धातौ परतो विधीयमानस्य 'नि' इत्यस्य नकारस्य णकारादेशो न प्राप्नोति, एवंविधं दोषमपाकर्तुं च भवत्येषा **लौकिकन्यायसिद्धा ज्ञापकसिद्धा च परिभाषा–**

## १२. अर्थवत आगमस्तद्गुणीभूतोऽर्थवद्ग्रहणेन गृह्यते॥

(म० भा० १.१.२०)

ये ह्यर्थवतः प्रकृत्यादेष्टित्-कित्-मित्स्वरूपा आगमा भवन्ति, ते हि तस्या एव प्रकृतेर्वा प्रत्ययस्य वाऽङ्गभूतत्वात् स्वरूपभूतत्वाद्वा तयैव प्रकृत्या वा

---

१. 'स्मिपूङ्रञ्ज्वशां सनि' (अ० ७.२.७४)।

प्रत्ययेन वा गृह्यन्ते। तेषां पुगादीनाम् आगमानां प्रकृतेर्वा प्रत्ययाद् वा पृथग्रूपेण स्वतन्त्रास्तित्वं नाङ्गीक्रियते इति भावः। तदेवं 'प्रणिदापयति' इत्यादिषु दोषरूपेणोपस्थापितेषु उदाहरणेषु पुगन्तस्यापि घुसंज्ञायां जातायां णत्वादीनि कार्याणि निर्बाधं जायन्ते। अन्यत्रापि 'सर्वेषाम्' इत्यादिषु प्रयोगेषु 'सर्व+आम्' इति स्थिते 'आमि सर्वनाम्नः सुट्' (अ० ७.१.५२) इत्यामः सुटि सति 'सर्व+साम्' इति जाते सुट आम्भक्तत्वाद्, आम एव ग्रहणेन ग्रहणात् तस्य च झलादिसुप्त्वाद् 'बहुवचने झल्येत्' (अ० ७.३.१०३) इत्येकारादेशः सिद्धो भवति।

लोकेऽपि हि गृह्यतेऽयं न्यायः– कस्यचित् प्राणिनः किञ्चिद् अधिकम् अङ्गं जायते चेत् तेनैव प्राणिना तदङ्गमपि गृह्यते। न हि तदङ्गजातं तस्मात् प्राणिनः पार्थक्यं भजते। आचार्यप्रवरेण चापि एषा परिभाषा ज्ञापिता। 'णेरनिटि' इत्यत्र आर्धधातुके परतः प्राप्तस्य णिलोपस्य इटि परतः प्रतिषेधो विधीयते। तत्र 'कारयितव्यम्' इत्यादिषु इटः आर्धधातुकत्वाभावाद्, इटा च व्यवधानादार्धधातुकस्य तव्यस्य परत्वाभावाद् णिलोपो न प्राप्नोति, पुनः किं प्रतिषेधेन? अतोऽयं प्रतिषेधो व्यर्थीभूय इमां परिभाषां ज्ञापयति। एवं हि प्रतिषेधोऽयं सार्थक्यमापद्यते।

अपरं च ज्ञापकं– 'वदव्रजहलन्तस्याचः' (अ० ७.२.३) इति सिचि परतो हलन्तस्याङ्गस्य अचः स्थाने विधीयमाना वृद्धिः 'नेटि' (अ० ७.२.४) इति इडादौ सिचि प्रतिषिध्यते। यदि च सिच इडागमः सिज्ग्रहणेन न गृह्येत तर्हि इटा व्यवधानादेव सिचि विधीयमाना वृद्धिः न स्यादिति किमनेन नेटि इति प्रतिषेधेन? एवं व्यर्थः सन् प्रतिषेधो ज्ञापयति अस्त्येषा प्रकृता परिभाषेति यदर्थं नेटि इति प्रतिषेध आरम्भणीयो भवति।।।१२।।

---

योऽयं 'पादः पत्' (अ० ६.४.१३०) इति सूत्रेण पाद्शब्दस्य पद्–आदेश उच्यते, स हि तदन्तविधिपरिभाषया (येन विधिः अ० १.१.७१) यत्र क्वापि द्विपाद्–त्रिपाद्–इत्यादिषु उदाहरणेषु पाद्शब्दान्तं भसंज्ञकं रूपं लभ्यते, तत्र सर्वत्र प्राप्नोति। तथा च पदादेशस्य अनेकाल्त्वात् 'अनेकाल्शित् सर्वस्य' (अ० १.१.५४) इति अनया परिभाषया द्विपाद्–त्रिपाद्–इत्येतस्य सम्पूर्णस्यापि स्यात्। तथा च सति 'द्विपदः पश्य, त्रिपदः पश्य' इत्येवमादयः प्रयोगा

अनुपपन्नाः स्युः। तस्माद् भवत्येषा **वाचनिकी परिभाषा–**

**१३. निर्दिश्यमानस्यादेशा भवन्ति॥** (म० भा० ६.४.१३०)

षष्ठीविभक्त्या निर्दिष्टस्य स्थानिनः प्रसङ्गे ये केऽप्यादेशा उच्यन्ते, ते हि सूत्रकृता वा वार्तिककृता वा यावतः स्थानिनो निर्देशः कृतोऽस्ति तावन्मात्रस्यैव स्थाने भवन्ति, न तु तदन्तविधिना पूर्वपदसहितस्य इति, अर्थादनेकालोऽप्यादेशा निर्दिष्टस्थानिमात्रस्यैव स्थाने भवन्ति न तु तस्माद् अधिकस्य।

तदनेन पात्–शब्दान्तस्य सर्वस्य त्रिपात्–शब्दस्य प्राप्तः पदादेशः पाद्–मात्रस्यैव स्थाने भवति। द्वित्रि–इत्यादयो हि व्यतिरिक्ताः (पृथग्भूताः) एव तिष्ठन्ति। एवञ्च 'द्विपदः पश्य' इत्येवमादयः प्रयोगाः सुसम्पन्ना भवन्ति।

भाष्ये त्वस्याः परिभाषाया अर्थः– 'षष्ठी स्थानेयोगा' (अ० १.१.४८) इति सूत्रेणैव विस्फोरितः। तथा चोक्तम्– 'षष्ठ्यन्तं स्थानेन यथा युज्येत, यतः षष्ठ्युच्चारिता'। तन्मात्रमेव कार्ययोगि यथा स्यादिति तद् भावः (द्रष्ट०– म० भा० १.१.४८)॥१३॥

---

चेता–स्तोता इत्येवमादिषु प्रयोगेषु 'स्थानेऽन्तरतमः' (अ० १.१.४९) इति सूत्रेण प्रमाणकृतम् आन्तर्यमङ्गीकृत्य चि–स्तु–इत्येतयोर्धात्वोः इकारोकारयोः स्थानेऽकारो गुणः प्राप्नोति, तदनेनाभीष्टाः प्रयोगा न सिध्यन्ति। तस्मादेषा **वाचनिकी परिभाषाऽस्ति–**

**१४. यत्रानेकविधमान्तर्यं तत्र स्थानत एवान्तर्यं बलीयः॥**

(म० भा० १.१.५०)

इह व्याकरणे आन्तर्यं नाम चतुष्प्रकारकं स्वीक्रियते– स्थानकृतम्, गुणकृतम्, अर्थकृतम्, प्रमाणकृतञ्चेति। यत्र क्वचिद् अनेकप्रकारकम् आन्तर्यं प्राप्नोति तत्र कतमेन आन्तर्येण निर्णयो विधेय इति समुपस्थिते द्वैतेऽनया परिभाषया स्थानकृतान्तर्यस्य बलवत्ता भवतीति ज्ञाप्यते। अयञ्चार्थो भाष्ये 'षष्ठी स्थानेयोगा' (अ० १.१.४८) इत्यतः 'स्थाने' इति वर्तमानेऽपि 'स्थानेऽन्तरतमः' (अ० १.१.४९) इत्यत्र पुनः स्थानेग्रहणात् प्रापितः। 'अभ्यासे भूयांसमर्थं मन्यन्ते' (निरु० १०.४.२) इति निरुक्तकारस्य वचनात् पुनः स्थानेग्रहणस्य केनाप्यतिरिक्तेन प्रयोजनेन भाव्यमेव; तच्चेदमेव यत्

स्थानकृतमान्तर्यं सर्वेषु आन्तर्येषु बलीयो भवति। स्थानशब्देन चात्र उच्चारणस्थानं गृह्यते।

एवञ्च प्रकृते चेता–स्तोता इत्यादौ चि–स्तु–इत्येतयोर्धात्वोः इकारोकारयोः स्थाने प्रमाणकृतान्तर्येण[1] प्राप्तमकाररूपं गुणं बाधित्वा स्थानकृतान्तर्येण[2] एकार ओकारश्च गुणो जातः।

**गुणकृतान्तर्यस्योदाहरणम्–** भागः। भज्धातोर्घञि प्रत्यये 'चजोः कु घिण्ण्यतोः' (अ० ७.३.५२) इति घिति प्रत्यये कवर्गादेशे कर्तव्येऽल्पप्राणस्य घोषवर्णस्य जकारस्य स्थाने गुणकृतान्तर्येण तथाविधो गकार एव भवति, न तु ककारः खकारो वा, तयोरघोषत्वात्, न चापि घकारः– तस्य घोषत्वेऽपि महाप्राणत्वात्; ङकारोऽपि न भवति तस्य ह्यानुनासिक्यगुणाधिकत्वादिति।

**अर्थकृतमान्तर्यम्–** वातण्ड्ययुवतिः। 'वतण्डस्य आङ्गिरसगोत्रापत्यं स्त्री' इत्यर्थे 'वतण्डाच्च' (अ० ४.१.१०८) इति विहितस्य यञो 'लुक् स्त्रियाम्' (अ० ४.१.१०९) इति स्त्र्यपत्येऽभिधेये लुकि सति 'शार्ङ्गरवाद्यञो ङीन्' (अ० ४.१.७३) इति ङीनि वतण्डीशब्दो निष्पन्नः। युवतिशब्देन च सह तस्य 'पोटायुवतिस्तोककतिपय०' (अ० २.१.६४) इति समानाधिकरणे समासे 'पुंवत् कर्मधारयजातीय० (अ० ६.३.४१) इति वतण्डीशब्दस्य पुंवद्भावे कर्तव्येऽर्थकृतान्तर्येण यथा वतण्डीशब्दोऽपत्यार्थकोऽस्ति, तथा अपत्यार्थको 'वातण्ड्य' इति पुंशब्दः एवातिदिश्यते, न तु अपत्यार्थरहितः केवलो वतण्डशब्दः। एवञ्च 'वातण्ड्ययुवतिः' इति इष्टः प्रयोगः सुसिद्धः।

**प्रमाणकृतमान्तर्यम्–** अमूभ्याम्। अदस्शब्दाद् भ्याम्विभक्तौ 'त्यदादीनामः' (अ० ७.२.१०२) इत्यन्त्यस्याकारादेशे 'अद अ+भ्याम्' इति स्थिते 'अतो गुणे' (अ० ६.२.९४) इति पररूपे 'अद+भ्याम्' इति जाते 'सुपि च' (अ० ७.३.१०२) इति दीर्घे च 'अदा+भ्याम्' इति सम्पन्ने 'अदसोऽसेर्दादु०' (अ० ८.२.८०) इति उवर्णदेशे विधातव्ये प्रमाणकृतान्तर्येण द्विमात्राकालस्य दीर्घस्य आकारस्य स्थाने दीर्घ एव ऊकारो भवतीति।।१४।।

---

१. यावान् प्रमाण इकारस्य उकारस्य वा एकमात्राकालः तावानेव अकारस्येति भावः।

२. द्रष्ट० शिक्षा– इचुयशास्तालव्याः। उपूपध्मानीया ओष्ठ्याः। एदैतौ कण्ठ्यतालव्यौ। ओदौतौ कण्ठ्योष्ठ्यौ।

'संख्याया अतिशदन्तायाः कन्' (अ॰ ५.१.२२) इति ति-अन्तेभ्यो विंशतिप्रभृतिभ्यः, शदन्तेभ्यश्च त्रिंशत्प्रभृतिभ्यः संख्यावाचकेभ्यः शब्देभ्यः कन् प्रत्ययः प्रतिषिध्यते। एवञ्च 'कतिभिः' क्रीतम्=कतिकम्' इत्यत्र कतिशब्दस्य त्यन्तत्वात् कन्प्रत्ययेन न भवितव्यम्। ततश्च 'कतिकम्' इति प्रयोगो न सिध्येदित्यत आह इमां **ज्ञापकसिद्धां परिभाषाम्–**

**१५. अर्थवद्ग्रहणे नानर्थकस्य॥** (म॰ भा॰ ५.१.२२)

इह सूत्रेषु यत्र क्वापि कार्यार्थम् अर्थवतः शब्दरूपस्य ग्रहणं क्रियते तत्राऽनर्थकस्य शब्दस्य ग्रहणं न भवति। एवञ्च 'संख्याया अतिशदन्तायाः कन्' (अ॰ ५.१.२२) इत्युपर्युक्ते सूत्रेऽर्थवतस्तिशब्दस्य ग्रहणाद् डतिप्रत्ययस्य योऽनर्थकस्तिशब्दोऽस्ति तस्य ग्रहणं न भवति। 'डति' इत्यत्र हि डकारानुबन्धापगते सम्पूर्णोऽतिशब्द एव सार्थकोऽस्ति न तु तदवयवस्तिशब्दः।[1] तस्मात् डतिप्रत्ययान्तात् कतिशब्दात् कन् प्रत्ययो भवत्येव, 'अतिशदन्तायाः' इति प्रतिषेधो न प्रवर्तते।

अपरमुदाहरणम्– 'प्राद्-ऊढ-ऊढि-एष-एष्येषु वृद्धिर्वक्तव्या' (वा॰ ६.१.८९) अनेन वार्तिकेन प्रशब्दाद् ऊढशब्दे परतः प्रोक्ता वृद्धिः 'ऊढवान्' इति शब्दे न भवति। ऊढशब्दः क्तप्रत्ययान्तोऽस्ति, ऊढवान् इति च क्तवतुप्रत्ययान्तः। 'ऊढवान्' इत्यस्य ह्यवयवभूतः ऊढशब्द स्पष्टमेवाऽनर्थकः। एवञ्च ऊढशब्दे तु वृद्धौ सत्यां 'प्रौढः' इति शब्दः सिध्यति, ऊढवान् इति शब्दे च गुणे सति 'प्रोढवान्' इति रूपं भवतीत्येवमादीनि बहूनि प्रयोजनानि सन्त्यस्याः परिभाषायाः।

ज्ञापकञ्चास्याः 'स्वं रूपं शब्दस्याऽशब्दसंज्ञा' (अ॰ १.१.६७) इति रूपग्रहणम्। कथम्? शब्दस्य 'स्वम्' रूपमेव भवति किं रूपग्रहणेन। तत् पुनः रूपग्रहणं कुर्वन् ज्ञापयत्याचार्यः– रूपवद् अर्थोऽपि शब्दस्य स्वमेव भवति। तस्माद् 'अर्थम्' व्यतिरेक्तुं रूपग्रहणं करोति। एवञ्चेह रूपग्रहणं सार्थकं भवति। अन्यत्र च क्वापि सूत्रेषु यदा सार्थकस्य शब्दस्य किमपि कार्यं विधीयते तदा निरर्थकशब्दस्य तत् कार्यं न भवति इति अयमप्यर्थः संगृहीतो भवति। स्पष्टञ्चैतद् 'आन्महतः॰' (अ॰ ६.३.४५) इति कैयटे।

अनित्यैषा परिभाषा। किं मानमेतस्या अनित्यत्वे? 'आनि लोट्'

---

१. समुदायो ह्यर्थवान्, तस्यैकदेशो निरर्थकः।

(अ० ८.४.१६) इत्यत्र लोड्ग्रहणम्। तत् कथम्? 'आनि लोट्' इत्यत्र लोटो ग्रहणं 'प्रकृष्टा वपा येषां तानि प्रवपानि मांसानि' इह णत्वं मा भूदिति कृतम्। स च णत्वाभावो लोड्ग्रहणम् अन्तरेण अर्थात् 'आनि' इत्येतावता सूत्रेणापि सिध्यति। कथम्? अर्थवद्ग्रहणपरिभाषाश्रयेण सार्थकस्य लोट्सम्बन्धिन आनेरेव नकारस्य णत्वं भवति, नान्यस्य अर्थात् निरर्थकस्य आनेर्नकारस्य णत्वं न भवति, यथा प्रवपानि मांसानि। अत्र हि इकार एव सार्थकः, न तु आनि। पुनरपि णत्ववारणाय आचार्यो लोटो ग्रहणं करोति। तच्च निरर्थकम्। तन्न। आचार्यस्तु पश्यति अर्थवद्ग्रहणपरिभाषा अनित्येति। अनित्यत्वात् 'प्रवपानि' इत्यादिषु अनर्थकस्य आनेर्नकारस्यापि णत्वं भवेत्। तन्निवारणाय यद् लोटो ग्रहणं कृतम्, तत् सार्थकमेव।

अस्या अनित्यत्वेन किं प्रयोजनम्? अन्-इन्-अस्-मन्-इत्येतेषां ग्रहणेन विहितं यत् कार्यम्, तद् अनर्थकेष्वपि भवतीति अनुपदमेव स्फुटीकरिष्यते।।१५।।

---

अथ सत्यामपि 'अर्थवद्ग्रहणे नानर्थकस्य' (परि० १५) इत्येतस्यां परिभाषायां 'अमहान् महान् सम्पन्नो महद्भूतश्चन्द्रमाः' महत्-शब्दस्य सार्थकत्वाद् 'आन्महतः०' (अ० ६.३.४५) इति आत्त्वेन भवितव्यमेव, न चेष्यते, तस्माद् भवत्येषा **लौकिकन्यायसिद्धा परिभाषा–**

## १६. गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः।। (म० भा० ६.३.४६)

यो हि गुणाद् (धर्माद्) आगतः स 'गौणः'[१] इत्युच्यते, यश्च गुणिरूपेण (धर्मिरूपेण) प्राप्तो भवति, तद्धि 'मुख्यम्- इति निगद्यते। मुखमिव मुख्यम्= प्रधानम् इति हि 'शाखादिभ्यो यत्' (अ० ५.३.१०३) इति यति प्रत्यये व्युत्पत्तिलभ्योऽर्थः। अर्थात् शब्दश्रुतिमात्रेण प्रतीयमानोऽर्थात्मा मुख्यः, प्रयत्नोपपादितस्तु गौण इति। क्वचिदिह शास्त्रे निर्दिष्टं कार्यजातं गौणे मुख्ये चोभयत्रापि सम्भाव्यते चेद् मुख्ये एव तत्कार्यं भवति न तु गौणे।

तस्माद् 'अमहान् महान् सम्पन्नो महद्भूतश्चन्द्रमाः' इत्यत्र महत्शब्दस्य गौणार्थत्वाद्[२] 'आन्महतः' (अ० ६.३.४५) इति विधीयमानम् आत्त्वन्न भवति।

---

१. 'तत आगतः' (अ० ४.३.७४)।

२. अमहत्त्वं गुणम् (धर्मम्) आश्रित्य महदर्थोऽत्र प्राप्यते इति महदर्थस्य गौणता। 'गुणाद् आगतः (प्राप्तः) गौणः' इति व्युत्पत्तिः स्पष्टमेवाऽत्र संघटते।

अभूततद्भावो हि 'कृभ्वस्तियोगे०' (अ० ५.४.५०) इति तदन्तस्य गतिसंज्ञायां 'कुगतिप्रादयः' (अ० २.२.१८) इति भूतशब्देन सह समासे सति 'महद्भूतः' इति शब्दो निष्पद्यते। तदयं च्व्यन्तोऽत्र महच्छब्दः च्विप्रत्ययश्च यदा प्रकृतिर्विकाररूपतामापद्यमाना विवक्ष्यते तदोत्पद्यते, परिणामविषयत्वात् च्विप्रत्ययस्य। अमहान् (चन्द्रमाः) इति ह्यत्र प्रकृतिरस्ति, 'महान्' च तस्य विकृतिः। एक एवार्थो द्व्यात्मकतया (प्रकृतिविकारात्मकतया) यदाश्रीयते तदा च्विप्रत्ययविषयकः परिणामव्यवहारो भवति। प्रकृतोदाहरणे हि च्विप्रत्ययस्य या प्रकृतिः (यस्माच् च्विर्विधीयते) 'महत्' इति सा हि अमहतो महद्भावं विकारस्वरूपमाप्नुवन्ती विद्यते। च्व्यन्तेन[1] हि पूर्वावस्थे उपचरितोत्तरावस्थम् (गौणीभूतोत्तरावस्थम्) अर्थतत्त्वमभिधीयते इति ह्यत्र महत्त्वम् अमहति उपचरितमिति गौणार्थाभिधायी महच्छब्दः। यस्य तु महदर्थस्याऽनुपचरितमहत्त्वं स मुख्योऽर्थः; यथा महान् देवः= महादेवः। च्व्यन्ते तु नैवंप्रकारकम् अर्थरूपं लभ्यते। तस्मान्न जातं 'महद्भूतश्चन्द्रमाः' इत्यत्र ह्यात्त्वम्। किञ्चिदयं विषयः क्लिष्टः आसीदिति कृत्वा विशदय्य व्याख्यातम्।

अपरञ्च- अगौः गौः समपद्यत, गोऽभवत्' इत्यत्र हि गोशब्दः च्विप्रत्ययान्तत्वात् निपातसंज्ञकस्तु 'ऊर्यादिच्वि०' (अ० १.४.६०) इत्यनेनास्ति, परं मुख्य ओकारान्तो निपातो नास्ति; निपातपदेन हि 'चादयोऽसत्त्वे' (अ० १.४.५७) इति चादिपठितानामेव झटिति उपस्थितेस्तेषामेव मुख्यत्वम् अङ्गीक्रियते- इति न भवति 'ओत्' (अ० १.१.१.१५) इति सूत्रविहिता प्रगृह्यसंज्ञेति बहुप्रयोजनैषा परिभाषा। न्यायमूला चेयम्। लोके हि गौरनुबध्यतामित्युक्ते न वाहीके[2] भवति कार्यसम्प्रत्ययः।

**अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः।**
**शास्त्रार्थस्तेषु कर्त्तव्यः शब्देषु न तदुक्तिषु॥**

इति तत्र तत्राभियुक्तैरुच्यमानमेतदपि परिभाषयाऽनया सह संवदते। केषाञ्चिन्मते परिभाषेयं पदकार्ये एव अपरेषान्तु प्रातिपदिककार्येऽपि॥१६॥

---

१. प्रकृतिविकृत्योरभेदविवक्षायां हि च्विः। तत्र महत्त्वाऽमहत्त्वयोर्विरोधात् कस्यचित् मुख्यत्वम् अपरस्योपचरितत्वम्= गौणत्वम् आस्थेयमिति लोकानुभवानुरोधेन वस्तुसत्पूर्वावस्थे वस्तुनि उत्तरावस्था उपचर्यते इति महदर्थस्य गौणतेत्यर्थः। (उद्योते नागेशः)।

२. 'वाहीक' इति तद्देशविशिष्टः गोर्जाड्यादिधर्मैर्युक्तः कश्चित् पुरुष उच्यते।

अर्थवतः शब्दरूपस्य ग्रहणेऽनर्थकस्य ग्रहणन्न भवतीति ह्युक्तचरम् (परि॰ १५)। अनेन वचनेन 'राजन्' शब्दस्य कनिन्-प्रत्ययान्तत्वाद्[१] 'अन्' इत्यर्थवान् अस्ति, तस्माद् राजन्-शब्दात् टा-विभक्तौ 'राज्ञा' इत्यत्र 'अल्लोपोऽनः' (अ॰ ६.४.१३४) इत्यन्नन्तभसंज्ञकस्याऽकारस्य लोपो भवतीति-अकारलोपे कर्तव्ये न काचिद् बाधाऽस्ति; परं 'साम्ना' इत्यत्र तु सामन्-शब्दो मनिन्-प्रत्ययान्तोऽस्ति[२], तस्य च 'मन्' इत्येव अर्थवान् अस्ति, न तु तदेकदेशः 'अन्- इति। तस्मादत्र 'अल्लोपोऽनः' (अ॰ ६.४.१३४) इत्यकारलोपेन न भाव्यम्। एवंविधं दोषं मनसिकृत्य प्रोक्तैषा **वाचनिकी परिभाषा–**

## १७. अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति॥ (म॰ भा॰ १.१.७२)

अन् च इन् च अस् च मन् च गृह्यन्ते येषु सूत्रेषु तानि सूत्राणि- 'अनिनस्मन्ग्रहणानि' इत्युच्यन्ते, तत्र ह्यर्थवता चानर्थकेन चोभाभ्यामपि तदन्तविधिर्भवति। अन्नन्तस्य-इन्नन्तस्य-असन्तस्य-मन्नन्तस्य च कार्यवेलायां 'अन्' इत्येवमादयोऽर्थवन्तोऽपि गृह्यन्तेऽनर्थका अपि इति भावः।

**अन्–** 'अनः' इत्यर्थवतोऽनर्थकस्य चोदाहरणं क्रमशः 'राज्ञा' इति 'साम्ना' इति चोपरि दत्तमेव।

**इन्–** दण्डोऽस्यास्तीति दण्डशब्दात् मत्वर्थीये 'अत इनिठनौ' (अ॰ ५.२.११५) इतीनिप्रत्यये विहिते 'दण्डी' इत्यत्र 'सौ च' (अ॰ ६.४.१३) इति दीर्घत्वं यथा सार्थकस्य इन्नन्तस्य भवति तथा वाच्-शब्दात् 'वाचो ग्मिनिः' (अ॰ ५.२.१२४) इति ग्मिन्-प्रत्यये सति 'वाग्मिन्' इत्यत्र अनर्थकस्यापि भवति। 'ग्मिन्' इत्यत्र हि 'ग्मिन्' इति सम्पूर्णः प्रत्यय एव मत्वर्थमभिदधाति, तदवयवस्य इन्-भागस्य तु न कश्चिदर्थोऽस्ति।

**अस्–** शोभनं पयोऽस्य= 'सुपयाः' इत्यादावसुन्प्रत्ययान्तत्वात् पयःशब्दस्य यथा सार्थकस्याऽसन्तस्य 'अत्वसन्तस्य चाधातोः' (अ॰ ६.४.१४) इति दीर्घत्वं भवति तथा शोभनं स्रोतो यस्य स सुस्रोताः इत्यत्र 'स्रुरीभ्यां तुट् च' (उ॰ ४.२०३) इति स्रुधातोरसुनि तुडागमे च कृते निष्पन्नस्य स्रोतःशब्दस्य

---

१. 'कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः' (उ॰ १.१५६)।

२. सर्वधातुभ्यो मनिन्' (उ॰ ४.१४६)।

तुडागमसहितस्यासुन्प्रत्ययस्यार्थवत्वम्। तदेकदेशस्य निरर्थकस्यापि असो ग्रहणाद् दीर्घत्वं सिद्धं भवति।

**मन्–** सुष्ठु शर्म (सुखम्) यस्याः सा 'सुशर्मा ब्राह्मणी' इत्यत्र 'ऋन्नेभ्यो ङीप्' (अ॰ ४.१.५) इति प्राप्तस्य ङीपः 'मनः' (अ॰ ४.१.११) इति निषेधः शर्मन्-शब्दस्य मनिन्-प्रत्ययान्तत्वात्[1] सार्थकस्य भवति, तथा 'सुप्रथिमा' इत्यत्र 'पृथ्वादिभ्यः॰' (अ॰ ५.१.१२१) इति इमनिच्प्रत्ययान्तस्याऽनर्थकस्यापि भवति। इमनिच्- इति हि सम्पूर्ण एव प्रत्ययो भावार्थमभिदधाति, तस्य एकदेशो मन्भागस्तु स्पष्टमनर्थक एवेति।

कर्मन्-शब्दात् ताच्छील्येऽर्थे 'छत्रादिभ्यो णः' (अ॰ ४.४.६२) इति णप्रत्यये कृते 'कार्मस्ताच्छील्ये' (अ॰ ६.४.१७२) इति टिलोपस्य निपातनेन 'कार्मः' (कर्मशीलः) इति सिध्यति। अत्र 'नस्तद्धिते' (अ॰ ६.४.१४४) इत्यनेनैव टेर्लोपः सेत्स्यति, किं निपातनेन? इह 'अन्' (अ॰ ६.४.१६७) इति प्रकृतिभावमपि न शङ्केत, 'अन्' इत्युक्तत्त्वात्। प्रकृते शब्दे तु 'मन्' विद्यते। तदवयवोऽन् निरर्थकत्वाद् 'अन्' सूत्रस्य प्रवृत्तिरेव न भवितुमर्हति, 'अर्थवद्ग्रहणे नानर्थकस्य' (परि॰ १५) इत्युक्तत्त्वात्। परम् आचार्यस्तु पश्यति अर्थवद्ग्रहण-परिभाषा अनित्या अर्थात् क्वचिद् अर्थवद्ग्रहणे अनर्थकस्यापि ग्रहणं भवतीति। एवम् अर्थवद्-ग्रहण-परिभाषाया अनित्यत्वमेव अस्या मूलमिति बोद्धव्यम्। सत्यामस्यां परिभाषायां मनिनन्तस्य कर्मन्-शब्दस्य अपि 'अन्' (अ॰ ६.४.१६७) इति सूत्रेण प्रकृतिभावः प्राप्तः तद्बाधनार्थमेव निपातनम्। तन्निपातनं सार्थकमिति दिक्॥१७॥

---

'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' (परि॰ ५४) इति परिभाषया निकटसम्बन्धिन एव विधिनिषेधौ जायेते, तदयं दोषः समापद्यते- 'लिङ्सिचावात्मनेपदेषु' (अ॰ १.२.११) इति सूत्रमिदम् 'उश्च' (अ॰ १.२.१२) इत्यत्रानुवर्तते; परं समीपभूतयोरेव विधिनिषेधयोः नियमे सति 'आत्मनेपदेषु' इत्येतदेव अनुवर्तेत न तु 'लिङ्सिचौ' इति, यतो हि 'उश्च' इत्यस्य निकटभूतम् 'आत्मनेपदेषु' इत्येवाऽस्ति 'लिङ्सिचौ' इत्येतत् तु तदपेक्षया दूरीभूतमेव तिष्ठति, परं तदनुवृत्तिम् अन्तरेण न इष्टं सिद्धं भवति, तस्माद्

---

१. 'सर्वधातुभ्यो मनिन्' (उ॰ ४.१४६)

भवत्येषा वक्ष्यमाणा **न्यायसिद्धा ज्ञापकसिद्धा वा परिभाषा–**

## १८. एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः॥

योगशब्दोऽत्र सूत्रपर्यायः। एकस्मिन् सूत्रे यानि परस्परं सम्बद्धार्थानि निर्दिष्टानि पदानि भवन्ति, तेषामन्येषु सूत्रेषु यदाऽनुवृत्तिप्रसङ्गः समुपस्थितो भवति, तदा सहैव तानि प्रवर्तन्ते, सहैव वा निवर्तन्ते। तदनेन 'उश्च' (अ० १.२.१२) इत्यत्र 'लिङ्सिचौ' इत्येतदपि अनुवर्तत एवेति।

लोकेऽपि घनिष्ठतया सम्बद्धे द्वे मित्रे प्रायः सहैव क्वापि गच्छतो न वा गच्छतः। तथा हि 'हनः सिच्' (अ० १.२.१४) इत्यत्रापि पुनः सिच्ग्रहणं कुर्वन्नाचार्य एतज्ज्ञापयति– उपरिष्टाद् अनुवर्त्तमानौ लिङ्सिचौ सहैवागन्तुमर्हतः, न तु तयोरेकतरः 'सिच्' इत्येतावन्मात्रम्। यदि ह्येकदेशोऽप्यनुवर्तेत 'हनः सिच्' इत्यत्र सिच्ग्रहणम् अनर्थकं स्यात्। 'एकदेशानुवृत्तिर्न भवति' इति मनसि कृत्वा एव पुनः सिच्ग्रहणं करोति। एतस्मादेव कारणाद् बहुत्राचार्येण एवमाचरितम्। सर्वत्रापि सूत्रेषु वार्त्तिकेषु चायं नियमः स्फुटम् अवलोकयितुं शक्यते॥१८॥

---

अथैतस्यां पूर्वस्यां परिभाषायां सत्याम् अयं दोषः स्याद्– 'अलुगुत्तरपदे' (अ० ६.३.१) इति सर्वमपि पदद्वयात्मकम् इदं सूत्रमधिकाररूपेण प्रचलति; तत्राऽलुगधिकारस्तु 'आनङ् ऋतो द्वन्द्वे' (अ० ६.३.२४) इत्यानङ्विधानात् पूर्वमेवाऽवतिष्ठते, पुनस्तद्योगस्यैकदेशभूत उत्तरपदाधिकारः पादपर्यन्तं[१] कथं गच्छेदित्यतोऽस्तीयं लक्ष्यसिद्धिभूता **वाचनिकी**[२] **परिभाषा–**

## १९. एकयोगनिर्दिष्टानामप्येकदेशानुवृत्तिर्भवति॥

(म० भा० ४.१.२७)

एकसूत्रे परिपठितानां पदानां मध्यात् क्वचिद् एकदेशस्यापि अनुवृत्तिर्दृश्यते।

---

१. 'सम्प्रसारणस्य' (अ० ६.१.१३८) इति यावत्।

२. केचिद् इयं ज्ञापकसिद्धा इति मन्यन्ते वर्णयन्ति च एवम्– 'तस्मादित्युत्तरस्य' (अ० १.१.६६) इत्यत्र इतिशब्दो न पठितव्यः। उपरिष्टात् (अ० १.१.६५) 'निर्दिष्टे' शब्दवत् 'इति' शब्दोऽपि अनुवर्तेत। परं तं नानुवर्त्य पुनः 'इति' शब्दपाठेन ज्ञापयत्याचार्यो यद्– 'एकयोगनिर्दिष्टानाम् एकदेशस्य (निर्दिष्ट–शब्दस्य) अप्यनुवृत्तिर्भवति'।

तदनेन 'उत्तरपदे' इत्येकदेशस्य पादपर्यन्तं गमनं सिद्धम्। अथ च 'दामहायनान्ताच्च' (अ० ४.१.२७) इत्यस्मिन् सूत्रे 'सङ्ख्याव्ययादेर्ङीप्' (अ० ४.१.२६) इत्येतस्मात् सूत्रात् संख्यापदमेवानुवर्तते न त्वव्ययम्। अपरञ्च 'पक्षात्तिः' (अ० ५.२.२५) इत्येतस्मिन् सूत्रे 'तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ' (अ० ५.२.२४) इत्येतस्मात् सूत्रात् मूलशब्दस्यैवाऽनुवृत्तिर्भवति न तु पाकशब्दस्येति दिक्।।१९।।

---

'अणुदित् सवर्णस्य चाप्रत्ययः' (अ० १.१.६८) इत्यत्र हि 'अप्रत्ययः' इत्यनेन प्रत्ययस्य सवर्णग्राहकत्वं किमुद्दिश्य प्रतिषिद्धमिति चेत् 'सनाशंसभिक्ष उः' (अ० ३.२.१६८) इत्यादौ 'उ'-इत्येवमादयः प्रत्ययाः स्वसवर्णस्य दीर्घादेर्ग्राहका मा भूवन्निति। परं स्त्रीप्रत्ययवर्जम् अन्येन दीर्घेण प्रत्ययेन यावता कस्यचिदर्थस्य प्रतीतिरेव न जायते। तदा स्वत एव दीर्घः प्रत्ययो न भविष्यति[1], किम् 'अप्रत्ययः' इति प्रतिषेधेन? न किञ्चित् प्रयोजनमित्यर्थः। कृतञ्च सद् ज्ञापयति- इह यौगिकोऽयं प्रत्ययशब्दो न तु रूढः। प्रतीयते विधीयते भाव्यतेऽसौ प्रत्ययः= विधीयमानो भाव्यमान इति कर्मण्यचा निष्पाद्यते। स च अण एव विशेषणम्, न तु उदितोऽपि। एवञ्च कृत्वा 'अविधीयमानोऽण् सवर्णस्य ग्राहकः' इत्यर्थः सम्पद्यते[2]। तदेवमस्यैवाऽर्थस्याऽनुवादभूता भवतीयं **ज्ञापकसिद्धा परिभाषा–**

## २०. भाव्यमानेन सवर्णानां ग्रहणन्न।। (म० भा० १.१.६९)

भाव्यमानेन (= विधीयमानेन) सवर्णानां ग्रहणन्न भवति। यथा– 'त्यदादीनामः' (अ० ७.२.१०२) इत्यत्र 'अकारः' विधीयते, स हि विधीयमानत्वाद् दीर्घं सवर्णन्न गृह्णाति। तथा ह्यस्याऽर्थस्य ज्ञापकमप्युपलभामहे 'ज्यादादीयसः' (अ० ६.४.१६०) इति। ज्य-शब्दादुत्तरस्य 'ईयस्' इत्येतस्य ईकारस्य आकारादेशो भवतीति हि तदर्थः। यदि हि विधीयमानोऽप्यण् सवर्णग्राहकः स्याच्चेदत्र

---

१. तदुक्तं भाष्ये-प्रत्यये भूयान् परिहारः- 'अनभिधानात् प्रत्ययः सवर्णान् न ग्रहीष्यति' (द्र०- म० भा० १.१.६८) 'प्रतियन्ति येनाऽर्थं स प्रत्ययः' इति महासंज्ञाकरणेनाप्युक्तार्थस्य समर्थनं भवति; न हि प्रत्ययसवर्णेनाऽर्थप्रत्ययो (अर्थबोधः) भवति।

२. यद्वा- 'अण् सवर्णस्य ग्राहको भवति, विधीयमानस्तु न' एवमपि वक्तुं शक्यते। अस्मिन् पक्षे 'अप्रत्ययः' इति प्रसज्यप्रतिषेधः।

प्रकृतसूत्रे 'अद्' इत्येव विदध्यात्। 'स्थानेऽन्तरतमः' (अ० १.१.४९) इति प्रमाणकृतान्तर्येण दीर्घस्थानिन ईकारस्य स्थाने दीर्घादेश आकारः स्वत एव सेत्स्यति। 'अद्' इति च मुखसुखार्थे दकारः, न तु तकारः इति व्याख्यास्यते, तेन च 'तपरस्तत्कालस्य' (अ० १.१.६९) इति तपरत्वेन सवर्णग्रहणव्यावृत्तिर्न भविष्यति। तदेवम् 'अद्' इत्यादेशेनैव सिद्धेऽपि आकारादेशं कुर्वाण आचार्यो ज्ञापयति– 'भाव्यमानेन सवर्णग्रहणन्न भवति'। सति ह्यस्मिन् वचने 'आद्' इति दीर्घादेशविधानं सार्थकं भवति। अन्यत्र चापि यत् किञ्चिद् विधीयमानं तत् सवर्णान्न ग्राहयति इति॥२०॥

---

अथ सत्यां हि 'भाव्यमानेन सवर्णानां ग्रहणन्न' इत्येतस्यां परिभाषायां 'दिव उत्', ऋत उत्' (अ० ६.१.१२७, १०७) इत्येवमादिषु सूत्रेषु ह्युकारस्य भाव्यमानत्वाद् (विधीयमानत्वाद्) तपरकरणं न किञ्चिद् अर्थसाधकं भवति। तपरकरणे ह्येतत् प्रयोजनं यत् तपरो वर्णः 'तपरस्तत्कालस्य' (अ० १.१.६९) इति तत्कालमेव गृह्णीयात्, सवर्णस्य ग्राहको मा भूत्; परमेतत् तु अन्तरेणापि ह्यत्र तपरकरणम् 'अणुदित्०' (अ० १.१.६८) इति सूत्रार्थानुवादभूतया परिभाषयैव (परि० २०) अपवारितं भवति, पुनः किमर्थमुकारस्तपरः क्रियते? तदियं भवति **ज्ञापकसिद्धा परिभाषा–**

## २१. भवत्युकारेण भाव्यमानेन सवर्णानां ग्रहणम्॥

(म० भा० ६.१.१८५)

उकारेण तु भाव्यमानेनापि सवर्णानां ग्रहणं भवतीत्यर्थः। तदनेनोपर्युक्ते प्रसङ्गे 'ऋत उत्' 'दिव उत्' इत्यादौ उकारस्य तपरकरणं सार्थकं भवति। अन्यत्र चास्येदं फलम्– अदस्शब्दाद् भ्याम्-प्रत्यये 'त्यदादीनामः' (अ० ७.२. १०२) इत्यत्त्वे 'अतो गुणे' (अ० ६.१.९४) इति च तस्य पररूपे 'अद+भ्याम्' इति जाते 'सुपि च' (अ० ७.३.१०२) इति दीर्घत्वे 'अदा+भ्याम्' इति स्थिते 'अदसोऽसेर्दादु दो मः' (अ० ८.२.८०) इति दकारादुत्तरस्य उवर्णदेशे विधातव्ये प्रकृतपरिभाषाबलेन भाव्यमानोऽप्युवर्णः प्रमाणकृतान्तर्येण सवर्णस्य दीर्घ-ऊकारस्य ग्राहको जातः। एवञ्च 'अमूभ्याम्' इति रूपं सिद्धमिति॥२१॥

---

'चतुर्थी तदर्थार्थ'॰ (अ॰ २.१.३५) इति समासे 'गवे हितं गोहितम' इत्यस्य अलौकिके विग्रहवाक्ये 'गो+ए (ङे) हित+सु' इत्यत्र 'सुपो धातुप्राति॰' (अ॰ २.४.७१) इत्यन्तर्वर्तिन्या विभक्तेश्चतुर्थ्येकवचनस्य लुकि सति 'प्रत्ययलोपे प्रत्ययलक्षणम्'॰ (अ॰ १.१.६१) इति प्रत्ययलक्षणेन गोशब्दस्य ओकारस्य 'एचोऽयवायावः' (अ॰ ६.१.७५) इत्यवादेशः प्राप्नोति। तस्माद् भवतीयं **ज्ञापकसिद्धा परिभाषा–**

## २२. वर्णाश्रये नास्ति प्रत्ययलक्षणम्।। (म॰ भा॰ १.१.६२)

वर्ण आश्रयो निमित्तं यस्य स वर्णाश्रयस्तस्मिन्। प्रत्ययो लक्षणम् (निमित्तम्) यस्य तत् कार्यं प्रत्ययलक्षणम्। प्रत्ययनिमित्तकं यत् किञ्चिद् कार्यं कर्त्तव्यं भवति लुप्तेऽपि प्रत्यये तत्कार्यं भवति; यदा तु प्रत्ययस्थं वर्णमाश्रित्य किञ्चिद् कार्यं कर्तुमिष्यते तदा हि प्रत्ययलक्षणं न भवति।

तदनेन ङेप्रत्ययस्य अज्धर्ममाश्रित्य 'गोहितम्' इत्यत्राऽवादेशो न भवति; एवं सर्वत्र।

'प्रत्ययलोपे प्रत्ययलक्षणम्' (अ॰ १.१.६१) इत्यत्राचार्यो यत् पुनः प्रत्ययग्रहणं करोति, तेन ज्ञापितैषेति ज्ञेयम्। तत् कथम्? पुनः प्रत्ययग्रहणं न कृत्वा 'प्रत्ययलोपे तल्लक्षणम्' इत्युच्यमाने सर्वनाम्नो वस्तुमात्रपरामर्शितत्वात् यत्र कुत्रचित् कार्यविधाने प्रत्ययस्य निमित्तभावः, तत्र प्रत्ययस्वरूपाश्रयेण वा वर्णरूपताश्रयेण वा सर्वं कार्यं भविष्यति। प्रत्ययग्रहणे सति प्रत्ययस्वरूपाश्रितम् (प्रत्ययनिमित्तम्) एव कार्यं प्रत्ययलक्षणेन भविष्यति, न तु वर्णरूपताश्रयम् (वर्णरूपतानिमित्तम्)। एवं सिद्धं यद्– वर्णाश्रये वर्णनिमित्ते प्रत्ययलक्षणं नास्तीति।

केचिद् एवं ज्ञापयन्ति– 'प्रत्ययलोपे प्रत्ययलक्षणम्' (अ॰ १.१.६१) इत्यत्र 'प्रत्ययस्य लुक्श्लुलुपः' (अ॰ १.१.६०) इत्यतः 'प्रत्ययस्य' इति पदम् अनुवर्त्य 'लोपे प्रत्ययलक्षणम्' इति पाठेन सिद्धे सति यत् पुनः 'प्रत्ययलोपे' इति पठति, तेन ज्ञापयत्याचार्यः प्रत्ययस्य रूपं यत्राश्रीयते तत्रैव प्रत्ययलक्षणं स्यात्, न तु वर्णरूपताश्रये।।२२।।

---

'अतः कृकमिकंस॰' (अ॰ ८.३.४६) इत्यनेन सूत्रेण अकारादुत्तरस्य विसर्जनीयस्य सकारादेशो विधीयते 'कृ–कम्' इत्येतयोर्धात्वोः

कंस-कुम्भ-पात्र-कुशा-कर्णी-इत्येतेषु च शब्देषु परतः। तदेतद् विचार्यते- उणादौ 'वृतॄवदिवचिवसिहनिकमिकषिभ्यः सः' (उ० ३.६०) इति कम्धातोः सप्रत्यये कंसशब्दस्य सिद्धत्वाद् 'अयस्कामः' इति यथा सिध्यति तथा 'अयस्कंसः' इत्यपि सेत्स्यति, एवञ्च सूत्रे कंसशब्दस्य पाठमन्तरेणापि सर्वम् इष्टं सिद्धं भवति; अर्थात् कम्धातौ परत एव सकारादेशो विधेयः, कंसशब्दे च यः कम्धातुरस्ति तमाश्रित्य कंसविषयकः प्रयोगोऽप्युपपन्नो भविष्यति, किमर्थं कंसशब्दस्य पाठ इति प्रश्न उदेति। उपर्युक्तया धिया विचारणायां कृतायान्तु व्यर्थ एव प्रतिभाति। तद्धि व्यर्थीभूय ज्ञापयतीमां **ज्ञापकसिद्धां परिभाषाम्-**

## २३. उणादयोऽव्युत्पन्नानि प्रातिपदिकानि॥

(म० भा० १.१.६१)

'प्रायः' इत्येतदध्याहर्तव्यम्। प्रायः इति च बहुधार्थकः। उणादौ सिद्धानि (उणाद्यन्तानीति वा) प्रातिपदिकानि बहुधाऽव्युत्पन्नानि भवन्ति, रूढय इति यावत्। अतस्तेषां प्रकृति-प्रत्ययादिविभागेनाऽन्वाख्यानं न क्रियते। अर्थाद् अमुकस्माद् धातोः अमुकस्मिन् कारकेऽमुकः प्रत्ययो भवति- इत्येवंप्रकारं व्युत्पादनं न क्रियते। एवञ्च स्वीकृते सति 'अतः कृकमिकंस०' (अ० ८.३.४६) इति सूत्रे कंसशब्दस्य पाठः सार्थक्यं भजते। अन्यत्र चेदं फलम्- 'कंसीयपरशव्ययोर्यञञौ लुक् च' (अ० ४.३.१६६) इति यदाऽञि प्रत्यये परशव्यशब्दस्य लुगुच्यते तदैकोऽन्तिमो यत्प्रत्यय एव लुकमापद्यते न त्वपरः। 'परशवे हितः परशव्यः' इति हितार्थेन यत्प्रत्ययेन अयं शब्दः साध्यते। उणादिषु यदि व्युत्पन्नपक्षोऽपि अङ्गीक्रियेत तदा परशुशब्दस्थस्य उकारस्यापि लुक् प्रसज्येत। 'प्रत्ययस्य लुक्श्लुलुपः' (अ० १.१.६०) इति हि प्रत्ययाऽदर्शनस्य लुक्संज्ञा विधीयते, अव्युत्पन्नपक्षे चेयं प्रकृतिरयं प्रत्यय इदमुपपदम् इत्येवंरूपस्य विभागज्ञानस्याऽभावात् परशुसम्बन्धिन उकारस्य लुग् न भवति।

उणादौ धातुरूपाण्युपादाय प्रत्ययविधानस्यापि दर्शनाद् अव्युत्पन्नपक्षोऽयं नैकान्तिकः। अत उणादयः (उणाद्यन्तानि) प्रातिपदिकानि व्युत्पन्नान्यपि अव्युत्पन्नान्यपि- इत्युभयविधान्येव भवन्तीति एतदेव व्याख्यानं वरम्। यथादर्शनं यथाप्रयोगञ्च निर्णयो भवति इति॥२३॥

'देवदत्तश्चिकीर्षति' इत्यत्र हि 'सनाद्यन्ता धातवः' (अ० ३.१.३२) इति सनाद्यन्तस्य समुदायस्य धातुसंज्ञोच्यमाना वाक्यसंस्कारपक्षे देवदत्तपर्यन्तस्य कथन्न भवति। सन्प्रत्ययो हि तस्याप्यन्ते एव विद्यते। यदि चात्र देवदत्तसहितस्य सर्वस्यापि वाक्यस्य धातुसंज्ञा स्यात्– 'सुपो धातु०' (अ० २.४.७१) इति देवदत्तसम्बन्धिनः सुविभक्तेर्लुक् प्रसज्येत। तस्माद् भवत्येषा **वाचनिकी परिभाषा–**

## २४. प्रत्ययग्रहणे यस्मात् स प्रत्ययो विहितस्तदादेः तदन्तस्य च ग्रहणं भवति।। (म० भा० १.४.१३)

प्रत्ययस्य ग्रहणम्– प्रत्ययग्रहणं तस्मिन्। यद्वा प्रत्ययो गृह्यते यस्मिन् सूत्रे तदिदं प्रत्ययग्रहणं तस्मिन्। प्रत्ययग्रहणे इयं व्यवस्था विज्ञेया– यस्मात् शब्दस्वरूपात् (प्रकृतेः) स प्रत्ययो विधीयते तत्र तदादेस्तदन्तस्य च समुदायस्य ग्रहणं भवति, न तु तदधिकस्य। 'तदादेः' 'तदन्तस्य' इति पदद्वयं विगृह्य व्याख्यानमपेक्षते– तद् (प्रकृतिरूपम्) आदिर्यस्य (प्रत्ययस्य) स तदादिः, तद्गुणसंविज्ञानो बहुव्रीहिः, अवयवेन विग्रहः समुदायः समासार्थ इति। तथैव प्रकृतेर्यः प्रत्ययो विहितः, स (प्रत्ययः) अन्ते यस्य (प्रकृतिरूपस्य), स समुदायस्तदन्तः, सप्रकृतिक–प्रत्ययान्तसमुदाय इत्यर्थः। यद्वा 'तदादेस्तदन्तस्य' इत्युभयत्राप्यतद्गुणसंविज्ञानो बहुव्रीहिः। तद् (प्रकृतिरूपम्) आदिर्यस्य (प्रत्ययस्य) अथ च स (प्रत्ययः) अन्ते यस्य (प्रकृतिरूपस्य) इत्युभयथा व्याख्यानेन प्रतिबन्धितः प्रत्ययान्तः समुदायः प्रकृतिपर्यन्त एव गृह्यते न तु तदधिकः।

तदेवं 'देवदत्तश्चिकीर्षति' इत्यत्र 'सनाद्यन्ता धातवः' (अ० ३.१.३२) इति सन्नन्तस्य धातुसंज्ञायां सप्रकृतिकप्रत्ययान्तसमुदायस्यैव धातुसंज्ञा भवति न तु देवदत्तसहितस्य। अथ च 'देवदत्तो गार्ग्यः' इत्यत्र 'कृत्तद्धितसमासाश्च' (अ० १.२.४६) इति यञ्प्रत्ययान्तस्य प्रातिपदिकसंज्ञायां विधीयमानायां गर्गप्रकृतिकयञन्तस्यैव न तु देवदत्तपर्यन्तस्य। यदि हि तत्पर्यन्तस्य प्रातिपदिकसंज्ञा स्यात् 'सुपो धातु०' (अ० २.४.७१) इति देवदत्तसम्बन्धिनः सुब्विभक्तेर्लुक् प्रसज्येत। तथा 'देवदत्तस्य गुरोः कुलम्' इत्यत्र 'गुरोः' इत्येतदेव सुबन्तं मत्वा कुलशब्देन सह समासो भवति। असत्यां ह्यस्यां परिभाषायां 'देवदत्तस्य गुरोः' इति पदद्वयस्यापि 'सुबन्त' इत्यनेनाऽभिधानं स्यात्, ततश्च सुबन्तस्य (षष्ठ्यन्तस्य) सुबन्तेन समासे यथा गुरुसम्बन्धिनो विभक्तेर्लुग्, भवति, तथा देवदत्तसम्बन्धिनोऽपि स्यात्। अन्यच्च 'कटं चिकीर्षुः' इत्यादौ कटादिविशिष्टस्य

धातुसंज्ञा न। तेन सुब्लुङ्नेत्येवमाद्यनेकं प्रयोजनमस्ति।

यद्यपीयं वाचनिकी, परं भाष्यकृता 'यस्मात् प्रत्ययविधिः०' (अ० १.४.१३) इति सूत्रे योगविभागेन साधिता। तथा हि 'यस्मात् प्रत्ययविधिस्तदादि प्रत्यये' इति एको योगः, 'अङ्गम्' इति चापरः। प्रथमयोगस्य चार्थपूरणाय 'गृह्यमाणे गृह्यते' इति पदद्वयम् अध्याहारेण लब्धम्। 'प्रत्यये गृह्यमाणे यस्मात् प्रत्ययविधिस्तदादि गृह्यते' इत्येवंरूपेण च स योगोऽर्थाप्यते इति।।२४।।

---

तदन्तपरिभाषया[१] प्रत्ययग्रहणपरिभाषया (परि० २४) च 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' (अ० ८.२.४२) इति सूत्रस्यायमर्थो जायते– 'रेफान्ताद् दकारान्ताद् उत्तरस्य निष्ठान्तस्य तकारस्य पूर्वस्य च दकारस्य नकारादेशो भवति' तदनेन सूत्रार्थेन 'दृषत्तीर्णा, परिषत्तीर्णा' इत्यादिषु प्रयोगेषु 'दृषद्- परिषद्' इत्येवंरूपाणां शब्दानां दकारात् परस्य 'आदेः परस्य' (अ० १.१.५३) इति नियमेन 'तीर्णा' इत्येतस्य निष्ठान्तस्य शब्दरूपसम्बन्धिनो धातोस्तकारस्य अनिष्टो नकारादेशः प्राप्नोति, अथ च तेनैव साकं 'पूर्वस्य च दः' इति वचनेन 'दृषद्-परिषद्' इत्येतयोः शब्दयोरपि नकारादेशः स्यात्। तस्माद् भवत्येषा प्रत्ययग्रहणपरिभाषायाः (परि० २४) अपवादभूता **वाचनिकी परिभाषा–**

**२५. प्रत्ययग्रहणे चापञ्चम्याः॥** (म० भा० १.१.७२)

यत्र पञ्चम्यन्तात् परः प्रत्ययः कार्यान्तरविधानाय परिगृह्यते, तत्र तदन्तविधिर्न भवतीत्यर्थः।

एतेन 'रदाभ्यां'० (अ० ८.२.४२) इत्यत्र तदन्तविधेः प्रतिषेधः। तदन्तविधेश्चाभावात् 'निष्ठान्तस्य' इत्यर्थस्य अलाभात् 'दृषत्तीर्णा' इत्यादौ अनिष्टे देशे धातुतकारस्य नत्वं न भवतीति।।२५।।

---

'घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः' (अ० ६.३.४२) इत्यत्र प्रत्ययग्रहणपरिभाषया (परि० २४) घप्रत्ययान्ते पूर्वस्य ह्रस्वत्वमिति

१. 'येन विधिस्तदन्तस्य' (अ० १.१.७१)

लब्धार्थेन 'कुमारीगौरितरा' इत्येवमादिषु प्रयोगेषु कुमारीशब्दस्यापि ह्रस्वत्वं प्राप्नोति। तत्कथन्न भवतीत्याह इमां **ज्ञापकसिद्धां परिभाषाम्–**

## २६. उत्तरपदाधिकारे प्रत्ययग्रहणे स्वरूपग्रहणं द्रष्टव्यम्॥

(म॰ भा॰ ६.३.५०)

'अलुगुत्तरपदे' (अ॰ ६.३.१) इति षष्ठाध्यायस्य तृतीयपादे यानि प्रत्ययनिमित्तकानि कार्याणि सन्ति, तत्र प्रत्ययस्य स्वरूपस्यैव ग्रहणं भवतीत्यवगन्तव्यम्- तत्र हि प्रत्ययग्रहणपरिभाषा (परि॰ २४) न प्रवर्तते इत्यर्थः। तथा च 'कुमारीगौरितरा' इति घप्रत्ययमात्रे विधीयमानं ह्रस्वत्वं गौरीशब्दस्य तु जातम्, परं कुमारीशब्दस्य न भवति- गौरीशब्देन व्यवधानाद्। 'हृदयस्य हृल्लेख॰' (अ॰ ६.३.४९) इति लेखग्रहणञ्चास्या ज्ञापकम्। यद्यत्र प्रकरणेऽपि प्रत्ययग्रहणपरिभाषा (परि॰ २४) प्रवर्तेत तर्हि हृदयं लिखतीति 'हृल्लेखः' इत्यत्र 'कर्मण्यण्' (अ॰ ३.२.१) इत्यणन्ते लेखशब्देऽणन्तत्वादेव हृदादेशसिद्धौ लेखग्रहणम् अनर्थकं स्यात्। पुनरपि यदण्प्रत्ययात् पृथग्रूपेण लेखशब्दे हृदादेशं विदधाति तज्ज्ञापयत्याचार्यः- उत्तरपदाधिकारे प्रत्ययाश्रित-कार्यविधायकेषु सूत्रेषु प्रत्ययग्रहणपरिभाषया तदन्तविधिर्न भवति। ज्ञापिते त्वस्मिन् लेखग्रहणस्य सार्थक्यं स्पष्टमेव। कश्चिदेवं वक्तुमर्हति- तत्र हि लेखशब्दो घञन्तोऽस्ति न तु अणन्त इति सप्रयोजनत्वात् कथं ज्ञापकम्? उच्यते- व्याख्यानाद् लेखशब्दोऽणन्त एव गृह्यते न तु घञन्तः।

अन्यत्र चेदं ज्ञापकफलम्- 'हृदयस्य हृल्लेखयदण्॰' (अ॰ ६.३.४९) इत्यस्मिन्नेव सूत्रे 'यत्-अण्' इत्यनेन यदन्तम् अणन्तम् चेत्यर्थो न गृह्यते। तथा च 'हृदयस्य प्रियम्' इत्यर्थे यति[१] प्रत्यये हृद्यम्, अणि[२] च प्रत्यये हृदयस्येदम् 'हार्दम्' इत्येवमादयः प्रयोगा उपपन्ना भवन्ति॥२६॥

---

प्रत्ययग्रहणपरिभाषाबलेन (परि॰ २४) 'ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे' (अ॰ ६.१.१३) इति सूत्रस्याऽयमर्थो भवति- पुत्रशब्दे पतिशब्दे चोत्तरपदे तत्पुरुषसमासे ष्यङन्तस्य सम्प्रसारणं भवति, तच्च

१. 'हृदयस्य प्रियः' (अ॰ ४.४.९५) इति यत्प्रत्ययो विधीयते।

२. 'प्राग्दीव्यतोऽण्' (अ॰ ४.१.८३) इति 'तस्येदम्' (अ॰ ४.३.१२०) इत्यर्थेऽण्।

'निर्दिश्यमानस्यादेशा भवन्ति' (परि॰ १३) इति ष्यङ एव स्थाने जायते। तदनेन 'कारीषगन्ध्यायाः पुत्रः= कारीषगन्धीपुत्रः, कारीषगन्धीपतिः, वाराहीपुत्रः, वाराहीपतिः' इत्येवमादयः प्रयोगास्तु सिध्यन्ति; परम् 'परमकारीषगन्धीपुत्रः, परमकारीषगन्धीपतिः' इत्येवमादयः प्रयोगा नोपपन्ना भवन्ति। यतो हि 'ष्यङः' इति प्रत्ययग्रहणम्। प्रत्ययग्रहणे च तदादिनियमस्य प्रवृत्तत्वान्नात्र 'ष्यङः सम्प्रसारणम्'॰ (अ॰ ६.१.१३) इति प्राप्तुमर्हति। यस्माद्धि प्रत्ययो विधीयते तदादेरेव ग्रहणं भवति। कारीषगन्धशब्दस्य ष्यङादेशो विधीयते इति कारीषगन्धादेरेव ष्यङन्तस्य समुदायस्य सम्प्रसारणं स्यान्न तु परमसहितस्य 'कारीषगन्ध्या' इत्येतस्य- इत्यतो भवतीयं **वाचनिकी परिभाषा–**

## २७. अस्त्रीप्रत्ययेनानुपसर्जनेन॥ (म॰ भा॰ ६.१.१३)

तदादिग्रहणपरिभाषा (परि॰ २४) अनुपसर्जनस्त्रीप्रत्ययवर्जं प्रवर्तते, अर्थाद् यत्र अनुपसर्जनं (प्रधानम्)[१] स्त्रीप्रत्ययं गृहीत्वा किमपि कार्यं विधीयते तत्र तदादेरेव ग्रहणमिति नियमो नास्ति। यस्तु स्त्रीप्रत्ययोऽप्राधान्येन स्त्रियमाह तत्र तु तदादिनियमोऽस्त्येवेत्यर्थः।

एवञ्च 'परमकारीषगन्धीपुत्रः' इत्यादौ तदादिग्रहणपरिभाषया यः सम्प्रसारणस्याऽप्राप्तिरूपदोषः समापद्यते स्म, तदिदानीमपगतो भवति। 'परमकारीषगन्ध्या' इत्यत्र हि कर्मधारयसमासस्य उत्तरपदप्रधानत्वात् स्त्रीप्रत्ययः प्राधान्येन स्त्रियमाह।

अथ किमुच्यते 'अनुपसर्जनेन' इति? यत्र ह्युपसर्जनस्त्रीप्रत्ययान्तस्य प्रसङ्ग उपस्थितो भवति, न भवति तत्र तदादिनियमप्रतिषेधः। अर्थात् तत्र तु तदादिग्रहणपरिभाषया तदादिनियम एव प्रवर्तते। तद्यथा 'कारीषगन्ध्यामतिक्रान्ता= अतिकारीषगन्ध्या, अतिकारीषगन्ध्यायाः पुत्रः= अतिकारीषगन्ध्यापुत्रः' अत्र ह्यत्यर्थस्य प्रधानत्वात् 'कारीषगन्ध्या' इत्येतस्य चोपसर्जनत्वाद् उपसर्जनस्त्रीप्रत्ययान्तः अस्ति कारीषगन्ध्याशब्दः। उपसर्जनस्त्रीप्रत्ययान्ते च तदादिनियमप्रवृत्तौ सत्याम् 'अतिकारीषगन्ध्यापुत्रः' इत्यत्र अतिपर्यन्तस्य ष्यङन्तत्वं नास्ति- इति न भवत्यत्र सम्प्रसारणम्॥२७॥

---

१. अर्थाद् यः स्त्रीप्रत्ययः प्राधान्येन स्त्रियमाह।

'सुप्तिङन्तं पदम्' (अ० १.४.१४) इति सुबन्तस्य तिङन्तस्य च समुदायस्य पदसंज्ञा विधीयते। तत्रोच्यते– 'सुप्तिङ् पदम्' इत्येतावदेव सूत्रमस्तु। तदन्तविधिपरिभाषया (परि० २४) तदन्तार्थस्य उपलब्धेः सुबन्तस्य तिङन्तस्य च पदसंज्ञा भविष्यति, न तु सुप्तिङ्प्रत्ययमात्रस्य। तदेवंरूपेण ह्यन्तग्रहणम् अत्र व्यर्थं सद् ज्ञापयतीमां **ज्ञापकसिद्धां परिभाषाम्–**

## २८. संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्न भवति॥

(म० भा० १.४.१४)

इह व्याकरणे यत्र हि प्रत्ययानां काचित् संज्ञा विधीयते तत्र प्रत्ययग्रहणपरिभाषया (तदन्तविधिपरिभाषया– परि० २४) तदन्तविधिर्न भवति। तदनेनाऽन्तग्रहणस्य स्वार्थे ('सुप्तिङन्तं पदम्' इति इह सूत्रे) सार्थक्यं जातम्।[1] अन्यत्र (अन्येषु सूत्रेषु) चेदं फलं भवति यत् 'तरप्तमपौ घः' (अ० १.१.२१) इति तरप्–तमप्–प्रत्ययान्तस्य घसंज्ञा प्रत्ययग्रहणपरिभाषया तदन्तस्य (तरबन्तस्य तमबन्तस्य वा) प्राप्ता सा प्रत्ययमात्रस्य एव भवति। यदि हि तरप्–तमप्–प्रत्ययान्तस्य घसंज्ञा स्यात् तर्हि 'कुमारीगौरितरा' इत्यत्र 'गौरीतरा' इति तरबन्ते घसंज्ञके परतः कुमारीशब्दस्य ह्रस्वत्वं प्रसज्येत। तच्चानया परिभाषया न भवति। तरबेव हि घसंज्ञको भवति न तु तरबन्तः।

अथाऽस्यां परिभाषायां स्वीकृतायां 'कृत्तद्धितसमासाश्च' (अ० १.२.४६) इति प्रातिपदिकसंज्ञाया विधानात् 'कृत्–तद्धित' इत्येतयोः प्रत्ययत्वात् 'कृदन्ततद्धितान्त' इत्ययमर्थो न लभ्येत, ततश्च प्रत्ययमात्रस्यैव प्रातिपदिकसंज्ञा स्यात् प्रत्ययान्तस्य चेष्यते। उच्यते– 'अर्थवदधातु०' (अ० १.२.४५) इति सूत्राद् इह सूत्रे 'अर्थवत्' इति पदमनुवर्त्य 'अर्थवान् कृत्' 'अर्थवाँश्च तद्धितः' इत्येवंरूपेणाऽर्थापन्नेन न कश्चिद् दोषो भवति। यतो हि 'न केवला प्रकृतिः प्रयोक्तव्या न च केवलः प्रत्ययः' (महा० भा० २.३.१) इति भाष्यप्रामाण्यात् प्रत्ययान्तमेव शब्दरूपमर्थवद् भवति। एवञ्च कृत्वात्र कृदन्तं तद्धितान्तमेव वा प्रातिपदिकसंज्ञां भजते।

यद्येवमस्ति चेद् यत्र हि प्रत्ययः प्रकृतेः पूर्वमवतिष्ठते यथा 'विभाषा सुपो बहुच् पुरस्तात्तु' (अ० ५.३.६८) इति तत्र तद्धितान्तस्याऽभावात् कथं

---

१. एवमेव 'सनाद्यन्ता धातवः' (अ० ३.१.३२) इत्यत्रापि ज्ञेयम्।

प्रातिपदिकसंज्ञा स्याद् ‘बहुपटवः’ इति? किं पुनरत्र प्रातिपदिकसंज्ञया प्रार्थ्यते? प्रातिपदिकादिति स्वाद्युत्पत्तिर्यथा स्यादिति। नैष दोषः। इह हि बहुच्प्रत्ययः सुबन्तात् पूर्वं विधीयते न तु प्रातिपदिकात्। ततश्च बहुच्प्रत्ययस्य विवक्षायाम् अभीष्टात् प्रातिपदिकात् या काचिद् विभक्तिः, यच्च वचनमपेक्ष्यते तदेव गृहीत्वा तदन्तात् पूर्वं बहुच् विधास्यते। तद्यथा– पटुशब्दाज्जस्विभक्तिमानीय ‘पटु जस्’ इत्येतस्मात् पूर्वं बहुच्प्रत्ययं विधाय ‘बहु पटु जस्’ इत्यनया प्रक्रियया ‘बहुपटवः’ इति साधयिष्यते। नैवं शक्यम्। स्वरे हि दोषः स्यात्– ‘बहुपटवः’ इत्यन्त्य उदात्तः स्यात्, ‘बहुपटवः’ इति उपोत्तमश्चेष्यते। ‘चितः’ (अ० ६.१.१५७) इत्यत्र हि वार्तिककृता ‘चितः सप्रकृतेर्बह्वकजर्थम्’ इति वचनं पठितं तदनेन वचनेन जसन्ते समुदाये एवोदात्तत्वं स्यात्। तस्मात् पूर्वोत्पन्नाया विभक्तेस्तु ‘सुपो धातुः०’ (अ० २.४.७१) इति लुगिष्यते। या चान्या विभक्तिरुत्पद्यते तस्याः प्रकृतेरेकदेशत्वाभावादन्तोदात्तत्वं न भवति।

एवं तर्हि ‘बहु पटु जस्’ इत्यस्य समुदायस्यार्थवत्त्वाद् ‘अर्थवदधातुर-प्रत्ययः०’ (अ० १.२.४५) इत्येव प्रातिपदिकसंज्ञा भविष्यति। ‘अप्रत्ययः’ इति प्रतिषेधस्तु प्रत्ययग्रहणपरिभाषया (परि० २४) तदादेः तदन्तस्यैव भवितुमर्हति। इह तु पटुशब्दाज्जस् आगत इति कृत्वा पटुपर्यन्तमेव प्रत्ययान्तमस्ति न तु बहुच्सहितः। बहुच्सहितस्याप्रत्ययान्तत्वाद् ‘अप्रत्ययः’ इति प्रतिषेधो न प्रवर्तिष्यते। ‘कृत्तद्धितसमासाश्च’ (अ० १.२.४६) इति अर्थवत्समुदायानां समासग्रहणं नियमार्थमिति वचनेनापि प्रातिपदिकसंज्ञा न व्यावर्तयितुं शक्यते, कथम्? तुल्यजातीयकानां समासः। कथंजातीयकानां समासः? सुबन्तानाम्। प्रकृते ‘बहुपटवः’ इत्यत्र तु बहुजिति असुबन्तोऽस्ति पटुश्च सुबन्तः। तदेवं ‘बहुपटु जस्’ इति समुदायस्य ‘अर्थवदधातु०’ (अ० १.२.४५) इत्येव सिद्धात्र प्रातिपदिकसंज्ञा। सुपश्च (प्रकृते जसः) प्रातिपदिकावयवत्वात् ‘सुपो धातुप्राति०’ (अ० २.४.७१) इति लुकि बहुपटुशब्दाद् अन्या इष्टा विभक्तय उत्पद्यन्ते इति।

‘सर्वकः, विश्वकः’ इत्यादौ ‘अव्ययसर्वनाम्नामकच् प्राक् टेः’ (अ० ५.३.७१) इत्यनेन विहितस्य मध्यपतितस्याकच्सहितस्य कथं प्रातिपदिकसंज्ञा भविष्यतीति चेत् ‘तदेकदेशभूतस्तद्ग्रहणेन गृह्यते’ (परि० ७९) इत्यनया परिभाषया प्रातिपदिकैकदेशे निपतितोऽकच् पार्थक्यन्न भजते, तेन प्रातिपदिकग्रहणेनैवाकचोऽपि ग्रहणं जायते इति।।२८।।

प्रत्ययग्रहणपरिभाषायां (परि० २४) हि सत्याम् अयमपि दोषः समापद्यते– 'अवतप्तेनकुलस्थितं त एतत्' इत्यत्र 'क्षेपे' (अ० २.१.४६) इति सप्तम्यन्तस्य क्तान्तेन सह समास उच्यमानस्तदादिनियमेन स्थितशब्दस्यैव क्तान्तत्वात् स्थितशब्देनैव सह अवतप्तशब्दस्य समासो भवितुमर्हति न तु नकुलस्थितेन इत्यतो **ज्ञापकसिद्धां परिभाषामाह–**

## २९. कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवति॥

(म० भा० १.४.१३)

यत्र क्वापि इह व्याकरणे कृत्प्रत्ययस्य ग्रहणं कृत्वा किमपि कार्यं विधीयते, तत्र हि कामं गतिपूर्वकं कारकपूर्वकं वा कृदन्तं स्यात्, पुनरपि कार्यं भवत्येव; प्रत्ययग्रहणपरिभाषायाः (परि० २४) तदादिनियमोऽत्र विषये न व्याप्रियते इत्यर्थः। तदनेन सप्तम्यन्तस्य अवतप्तशब्दस्य कारकसंज्ञकनकुलसहितेन क्तान्तेन 'नकुलस्थित'[१] इत्यनेन सह समासः सम्पद्यते। 'तत्पुरुषे कृति बहुलम्' (अ० ६.३.१३) इति चान्तर्वर्तिन्या विभक्तेरलुकि सति 'अवतप्तेनकुलस्थितम्' इति रूपं निष्पन्नं भवति।

अथ च 'सांकूटिनम्' इत्यत्र हि सम्पूर्वात् कूटधातोः –अभिविधौ भाव इनुण्' (अ० ३.२.४४) इति इनुणि विहिते तस्माच्च 'अणिनुणः' (अ० ५.४.१५) इति स्वार्थिके तद्धितसंज्ञकेऽणि 'तद्धितेष्वचामादेः' (अ० ७.२.११७) इति वृद्धौ कर्तव्यायां प्रत्ययग्रहणपरिभाषया (परि० २४) तदादिनियमेन 'कूटिन्' इत्यस्यैव इनुणन्तत्वात् तस्यैव ऊकारस्य वृद्धिः स्यात्, परमनया परिभाषया गतिसंज्ञक-सम्-सहिताद् इनुणन्ताद् अणो विधानात् समोऽकारस्यादिभूतस्य वृद्धिर्भवति, इत्येवमाद्यनेकं प्रयोजनमस्ति।

ज्ञापकं चास्याः 'गतिरनन्तरः' (अ० ६.२.४९) इत्यनन्तरग्रहणम्। तत्र ह्यनन्तरग्रहणस्यैतत् प्रयोजनम्– कर्मवाचिनि क्तप्रत्ययान्ते गतेः प्रकृतिस्वर उच्यमानः 'प्रकृतः' इत्यादावेव यथा स्यात्, 'समुद्धृतः' इत्यादौ मा भूत्। परं यावता प्रत्ययग्रहणपरिभाषया 'धृत' इत्येवात्र क्तान्तोऽस्ति न तु 'उद्धृतः', तत्र कः प्रसङ्गो यद् उद्धृते सगतिके परतः 'समः' प्रकृतिस्वरः स्यात्– यस्यापवारणार्थम्

१. नकुलेन स्थितं नकुलस्थितम्– 'कर्तृकरणे कृता बहुलम्' (अ० २.१.३१) इति तत्पुरुषसमासः।

'अनन्तरः' इत्युच्यते। तस्मान्नार्थो 'अनन्तरः' इति वचनेन! कृतञ्च सद् ज्ञापयति– कृद्ग्रहणे गतिपूर्वस्यापि ग्रहणं भवति। तथा हि 'उद्धृतः' शब्दे परतोऽपि समः प्रकृतिस्वरः प्रसज्येत। न चेष्यते। एवं ह्यनन्तरग्रहणं सार्थकतामावहति। परिभाषाया गत्यंशे एव चेदं लिङ्गम्। कारकांशे तु वाचनिकी एवेति विवेकः।

अपिग्रहणात् प्रत्ययग्रहणपरिभाषया तदादिः= केवलः कृदन्तोऽपि समुच्चीयते, तदपवादत्वाद्। तेन 'नखभिन्नः, नखनिर्भिन्नः' इत्युभयत्रापि 'कर्तृकरणे कृता बहुलम्' (अ० २.१.३१) इति समासः।

**इदञ्चात्रावधेयम्–** यत्र तु क्वचित् कृदकृत्सामान्यग्रहणं भवति तत्र ह्येषा परिभाषा न प्रवर्तते। स्पष्टं चैतद् 'अनुपसर्जनात्' (अ० ४.१.१४) इति सूत्रभाष्ये। अथ च 'कृत्तद्धितसमासाश्च' (अ० १.२.४६) इत्यत्रापीयं परिभाषा न व्याप्रियते। इतरथा हि 'मूलकेनोपदंशं भुङ्क्ते' इत्यत्र वाक्येऽपि कारकपूर्वस्य कृदन्तस्य प्रातिपदिकसंज्ञायां सुब्लुग् प्रसज्येत। स्पष्टमेतत् 'पुंयोगादाख्यायाम्' (अ० ४.१.४८) इत्यत्र भाष्ये।।२९।।

---

'येन विधिस्तदन्तस्य' (अ० १.१.७१) इति परिभाषासूत्रेण सामान्येन सर्वत्र तदन्तविधिरुक्तः, तस्यास्तु परिभाषाया विशेषविषयेऽपवादभूतां **वाचनिकीं परिभाषामाह–**

## ३०. पदाङ्गाधिकारे तस्य तदन्तस्य च।। (म० भा० १.१.७२)

विशेषणविशेष्यभावव्यवस्थार्थम् ईदृशवार्तिकानां प्रवृत्तिरिति– 'येन विधि०' (अ० १.१.७१) इति सूत्रे कैयटः। पदैकदेशन्यायेन[1] परिभाषास्थेन पदशब्देन 'उत्तरपदम्' प्रतिनिर्दिश्यते। उत्तरपदाधिकारे उत्तरपदाक्षिप्तं 'पूर्वपदं' विशेष्यम्,[2] गृह्यमाणं तद्विशेषणम्। तथा अङ्गाधिकारे हि 'अङ्गम्' इति विशेष्यम्,

---

१. पदैकदेशग्रहणेन पदग्रहणम्, वाक्यैकदेशग्रहणेन वाक्यग्रहणम् इति वा न्यायः (तु– म० भा० १.१.४५)। पदस्य एकदेशोऽपि क्वचिद् विवक्षावशात् प्रयोक्तुं शक्यते इति तद्भावः। भीमसेनो 'भीमः' इति यथा।

२. कार्यार्थं तत्तत्सूत्रेषु निर्दिश्यमानम् (उच्चार्यमाणम्) स्वरूपतोऽनुवृत्तितो वा 'गृह्यमाणम्' इत्युच्यते।

गृह्यमाणञ्च तद्विशेषणम्। एवञ्च कृत्वा गृह्यमाणस्य पूर्वपदत्वे, तदन्तस्य पूर्वपदत्वे च तत्कार्यं भवति। तथा गृह्यमाणस्य अङ्गत्वे तदन्तस्य अङ्गत्वे च तत्कार्यं भवति। अर्थात् सूत्रे कार्यविधानार्थं यस्य ग्रहणं कृतमस्ति– तस्य, अथ च तद् अन्ते यस्य तस्य (तदन्तस्य समुदायस्य) उभयस्यापि ग्रहणं भवतीत्यर्थः।

यथा– 'इष्टकेषीकामालानां चिततूलभारिषु' (अ० ६.३.६४) इत्यस्मिन् सूत्रे 'इष्टकचितं चिन्वीत'[१] इत्यस्मिन्नुदाहरणे तस्यैव 'इष्टका' इत्येतस्य ह्रस्वो जातः, अथ च[२] 'पक्वेष्टकचितं चिन्वीत' इत्यत्र 'पक्वेष्टका' इत्येतस्य तदन्तस्यापि। एवमेव– [३]इषीकतूलेन, [४]'मुञ्जेषीकतूलेन, [५]'मालभारिणी कन्या', '[६]उत्पलमालभारिणी कन्या' इत्यादावपि 'इषीका, माला'– इत्येतयोरुभयोरपि ह्रस्वत्वं जातम्।

अङ्गाधिकारे चापि 'सान्तमहतः संयोगस्य' (अ० ६.४.१०) इत्यत्र 'महान्' इति तस्यैव महत्–शब्दस्य उपधायाः, 'परममहान्' इत्यत्र च तदन्तस्य उपधाया दीर्घो भवतीत्येवमादीनि ह्यनेकान्युदाहरणानि भाष्ये प्रदर्शितानि।।३०।।

---

'एकाचो द्वे प्रथमस्य' (अ० ६.१.१) इति प्रथमस्य एकाचो द्वे उच्चारणे भवत इत्युच्यते, तत्र सति द्वितीये एव प्रथमव्यपदेशो व्यवहारो भवितुमर्हति। यथा जागृधातोर्लिटि णलि– इत्यादौ 'जाग्' इति द्विरुच्यते, जागृधातोरनेकाच्त्वात् तदवयवस्य प्रथमस्य एकाचः सम्भवात्। परं यत्र केवल एकाजेव धातुरस्ति, तथा 'पपाच' इत्यत्र पच्, तत्र कथं प्रथम एकाच् अवयवो लभ्यते। अथ च इह 'एकाचः' इति बहुव्रीहिसमासाश्रयणेन 'एकोऽच् यस्मिन् समुदाये' इति कृत्वा हल्सहित एकाजवयवकः समुदाय एव गृह्यते। ततश्च यत्र केवलोऽज्रूप एव धातुरस्ति– यथा 'इयाय' इत्यत्र 'इ' अथवा 'आर' इत्यत्र 'ऋ', तत्र हि बहुव्रीहिणा उच्यमानस्य अन्यपदार्थस्य कथमर्थसङ्गतिः स्यादित्येतत् सर्वमालोच्य **न्यायसिद्धां परिभाषामाह–**

---

१. इष्टकानां चितः= इष्टकचितः, तम्।

२. पक्वाश्च ता इष्टकाः= पक्वेष्टकाः, तासां चितः, तम्।

३. इषीकायास्तूलम्= इषीकातूलम्, तेन।

४. मुञ्जस्य इषीका= मुञ्जेषीका, तस्यास्तूलम्। तेन।

५. मालां भर्तुं शीलमस्याः, सा।

६. उत्पलस्य माला= उत्पलमाला, तां भर्तुं शीलं यस्याः, सा। उत्पलमिति कमलम्।

## ३१. व्यपदेशिवदेकस्मिन्॥ (म० भा० १.१.२१)

व्यपदेशोऽस्यास्तीति व्यपदेशी, तेन तुल्यं वर्तते इति व्यपदेशिवत्। यथार्थे निमित्ते सति यस्य मुख्यो व्यपदेशः= व्यवहारो भवति स 'व्यपदेशी' इत्युच्यते। यस्य तु व्यवहारस्य सहायि कारणं नास्ति, व्यवहारश्च कर्तुमिष्यते, तदर्थं परिभाषेयं मार्गमुद्घाटयति। अर्थाद् सत्यनेकस्मिन् यो व्यवहारो भवति, स एव एकस्मिन्नपि भवति। अनेकस्मिन् यानि कार्याणि प्राप्नुवन्ति तान्येकस्मिन्नपि भवन्तीति हि फलितार्थः।

तेन 'पपाच' इत्यादौ द्वितीयस्याचोऽभावेऽपि एकस्मिन्नेवाऽचि 'प्रथमः' इति व्यवहारमाश्रित्य द्विर्वचनं जातम्। तथा 'इयाय, आर' इत्यादौ हल्रहितयोरपि 'इ, ऋ' इत्येतयोर्धात्वोः बहुव्रीहिसमासघटितस्य 'एकाचः' इत्यनेन निर्दिष्टस्य कस्यचिद् अन्यपदार्थस्य प्रकृते ह्यभावेऽपि द्विर्वचनं सम्पन्नम्। अथ च 'आदेशप्रत्यययोः' (अ० ८.३.५९) इति प्रत्ययावयवस्य सकारस्य मूर्धन्यादेशो यथा 'करिष्यति' इत्यादौ भवति, तथा 'स देवान् यक्षत्' इत्यादावपि यज्धातोर्लेटि सिपि विकरणे सति सिप्प्रत्ययस्य सकारमात्रत्वात् 'प्रत्ययावयवस्य' इत्येतस्य मुख्यार्थस्याभावेऽपि व्यपदेशिवद्भावेन मूर्धन्यो जातः– इत्येवमाद्यनेकं प्रयोजनं द्रष्टव्यम्।

लोकेऽपि हि वयं पश्यामः– यथाऽनेकेषु पुत्रेषु सत्सु– अयं मे ज्येष्ठः, अयं मे मध्यमः, अयं मे कनिष्ठः– इत्येवंरूपो व्यवहारो भवति, तथा यस्य एक एव पुत्रो भवति तत्रापि यदा कश्चित् तं पृच्छति– 'भोः ! कस्तावत् तव ज्येष्ठः पुत्रः' अथवा 'भोः ! किमयं तव ज्येष्ठः पुत्रः? स आह– मम त्वयमेव ज्येष्ठः, अयमेव मध्यमः, अयमेव च कनिष्ठोऽस्तीति॥३१॥

---

तद्धितप्रकरणे हि 'नडादिभ्यः फक्' (अ० ४.१.९९) 'गर्गादिभ्यो यञ्' (अ० ४.१.१०५) 'शिवादिभ्योऽण्' (अ० ४.१.११२) इति अपत्यादिषु अर्थेषु हि विधीयमाना फगादयः प्रत्यया उत्तमनड–परमगर्ग–महाशिवप्रभृति–भ्यस्तदन्तेभ्यः प्रातिपदिकेभ्यः कथन्न भवन्तीत्यतो भवतीयं **ज्ञापकसिद्धा परिभाषा–**

## ३२. ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते॥

(म० भा० ४.१.६)

इह व्याकरणे यत्र क्वचित् प्रातिपदिकस्य ग्रहणम् (उच्चारणं) कृत्वा प्रत्ययो विधीयते तत्र तदन्तविधिर्न भवति। तस्माद् उत्तमनड–परमगर्ग–महाशिव–इत्यादिभ्यः प्रातिपदिकेभ्यः क्रमशः फग्–यञ्–अण्–इत्येवमादयः प्रत्यया न भवन्ति।

ज्ञापकं चास्याः– 'पूर्वादिनिः', 'सपूर्वाच्च' (अ० ५.२.८६–८७) इति सूत्रद्वयम्। यदि हि पूर्वशब्दाद् विहित इनिस्तदन्तादपि स्यात् तर्हि 'पूर्वादिनिः' इत्यनेनैव सर्वं कृतार्थं स्यात्, पुनः 'सपूर्वाच्च' इति पृथग्वचनेन ज्ञायते न भवत्यत्र तदन्तविधिः।

अस्याश्च परिभाषायाः ज्ञापकं प्रत्ययविधिप्रकरणस्थमस्तीति कृत्वा प्रत्ययविधावेव परिभाषेयं प्रवर्तते। तस्मात् 'महान्' इति यथा, तथा 'परममहान्' इत्यत्र, अथ च 'स्वसा' इति यथा, तथा 'परमस्वसा' इत्यत्रापि क्रमशः 'सान्तमहतः०' (अ० ६.४.१०), 'अप्तृन्तृच्स्वसृ०' (अ० ६.४.११) इत्यादिना दीर्घत्वं भवत्येवेति।।३२।।

---

'क्रतूक्थादिसूत्रान्ताट् ठक्' (अ० ४.२.५९) इत्यादिना ठक् इति, तदस्मिन्नधिकमिति दशान्ताड् डः' (अ० ५.२.४५) इति च डः प्रत्ययो विधीयते। तदेतद् विचार्यते– 'व्यपदेशिवद् एकस्मिन्' (परि० ३१) इति परिभाषया केवलात् सूत्रप्रातिपदिकात् तथा च केवलाद् दशप्रातिपदिकाद् यथोक्तं प्रत्ययः कथन्न भवतीति भवतीयं **ज्ञापकसिद्धा परिभाषा–**

## ३३. व्यपदेशिवद्भावोऽप्रातिपदिकेन॥ (म० भा० १.१.७२)

व्यपदेशिवद्भावः प्रातिपदिकाधिकारवर्जं प्रवर्तते; अर्थात् चतुर्थे पञ्चमे वाऽध्याये व्यपदेशिवद्भावो न भवति। तस्मात् केवलात् सूत्रप्रातिपदिकाट् ठक्प्रत्ययः, केवलाच्च दशप्रातिपदिकाड् डः प्रत्ययो न भवति।

अस्याश्चापि परिभाषाया ज्ञापकं 'पूर्वादिनिः, सपूर्वाच्च' इति पूर्वपरिभाषा– ज्ञापकविषयकं सूत्रद्वयमेवास्ति। कथम्? 'पूर्वादिनिः सपूर्वात्' इत्येकयोगेन सिद्धे यद् योगविभागं करोति। एकयोगे हि 'पूर्वान्तादिनिः' इति 'विद्यमानपूर्वात् पूर्वप्रातिपदिकाद् इनिप्रत्ययो भवतीति' हि सूत्रार्थे समाश्रीयमाणे

केवलात् पूर्वशब्दात् व्यपदेशिवद्- भावेन सिद्धमिष्टं स्यात्। सिद्धे सति योगविभागं कुर्वाण आचार्यो ज्ञापयति प्रातिपदिकेन व्यपदेशिवद्- भावो न भवति।

अथवा अत्र ज्ञापकदिशा ह्येवमवगन्तव्या- यदि हि प्रातिपदिकाधिकारेऽपि व्यपदेशिवद्भावः स्याच्चेदाचार्यः 'पूर्वान्तादिनिः' इति सूत्ररचनां विदध्याद्- केवलाद्धि व्यपदेशिवद्भावेन स्यादेव। तदेवं लघीयसा न्यासेन सिद्धे यत् सूत्रद्वयं निर्मिमीते तज्ज्ञापयति- न भवति प्रातिपदिकेन व्यपदेशिवद्भाव इति।

**इदन्त्वत्रावधेयम्-** यत्र प्रातिपदिकस्यासाधारणं रूपं गृह्यते तत्रैवेयं प्रवर्तते। तस्मात् 'उगितश्च' (अ० ४.१.६) इति उगिदन्ताद् विधीयमानो ङीप् यथा 'अतिभवती' इत्यत्र भवति तथा व्यपदेशिवद्भावेन 'भवती' इत्यत्रापि भवत्येव।।३३।।

---

'अचि श्नुधातु०' (अ० ६.४.७७) इति हि अचि प्रत्यये इवर्णान्तस्योवर्णान्तस्य इयङुवङौ उच्यमानौ 'श्रियौ, भ्रुवौ' इत्यादावेव स्याताम्, यत्र हि केवलोऽज्रूप एव प्रत्ययः परेऽस्ति। 'श्री+जस्, भ्रू+जस्' इत्यादौ तु न स्याताम्- केवलस्याज्रूपप्रत्ययस्याभावादित्यतो भवतीयं **वाचनिकी परिभाषा-**

### ३४. यस्मिन् विधिस्तदादावल्ग्रहणे।। (म० भा० १.१.७२)

'येन विधिस्तदन्तस्य' (अ० १.१.७१) इति तदन्तविध्यपवादभूतेयम्। यस्मिन्निति सप्तम्यन्तविशेषणोपलक्षणम्। अलः ग्रहणम् अल्ग्रहणम्, तस्मिन्। स आदिर्यस्य स तदादिस्तस्मिन्। यत्र हि सप्तम्यन्तात्रूपविशेषणेन विधिर्विधीयते तत्र खलु स विधिस्तदादौ=सप्तम्यन्तविशेषणादौ समुदाये विज्ञेयः।

तदेवम् उपर्युक्तसूत्रेणाचि विधीयमानौ इयङुवङौ अजादौ प्रत्यये भवत इति। ततश्च 'श्रियः, भ्रुवः' इति जसादौ विभक्तौ न दोषो भवति। अथ च 'अवश्यलाव्यम्, अवश्यपाव्यम्' इत्यादौ 'अवश्य लू +य (ण्यत्)'= 'अवश्यलौ+य' इति स्थिते 'धातोस्तन्निमित्तस्यैव' (अ० ६.१.७७) इति वान्तादेशो यकारादौ प्रत्यये सिद्धो भवति।

**इदमत्रावधेयम्-** तदन्तविध्यपवादभूतत्वाद् यत्र सप्तम्यन्तं विशेषण- त्वेनोपलभ्यते तत्रैव इयं प्रवर्तते। अत एव 'इको यणचि' (अ० ६.१.७४) इत्यादौ न दोषो भवति। नागेशमतेनेयं वाचनिकी एव। वृत्तिकारो वामनस्तु

'गुणोऽपृक्ते' (अ० ७.३.९१) इति सूत्रे 'अपृक्ते' इत्येतद् ज्ञापकार्थं वर्णयति। तस्य हि कथनमिदं यद् 'उतो वृद्धिर्लुकि हलि' (अ० ७.३.८९) इत्यतो 'हलि' इत्यनुवर्तमाने यदपृक्तग्रहणं करोति तेन ज्ञायते– अस्तीयं परिभाषा। सत्यां ह्यस्यां परिभाषायां 'हलादौ' इत्यर्थः स्यात्, अपृक्ते च कार्यमिष्यते, तस्माद् अपृक्तग्रहणं करोति। यदि तु एवं विचार्यते– असत्यां ह्यस्यां परिभाषां सर्वत्रैव तदन्तविधिः स्यात्। इहापि 'हलि' इत्यनेन हलन्ते कार्यं स्यात्। हलन्ते कार्यं सप्रयोजनम् अपृक्तग्रहणं भवति, सति प्रयोजने न ज्ञापकमिति तु विदितचरमेवेति।।३४।।

---

'तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम्' (अ० १.२.६३) इत्यनेन तिष्यपुनर्वस्वोर्द्वन्द्वसमासे बहुवचनस्य द्विवचनं विधीयते, तत्रान्तरेणापि बहुवचनग्रहणं 'तिष्यः' इत्येकः –पुनर्वसू' इति च द्वाविति कृत्वा त्रित्वोपलब्धिवशात् स्वत एव बहुवचनस्य द्विवचनं भविष्यति, किमर्थं बहुवचनग्रहणम्? एवं मन्यते– तिष्यपुनर्वस्वोर्द्वन्द्वे यदा क्वचिद् एकवचनं भवेद् तदा द्विवचनं मा भूद्, बहुवचनस्यैव द्विवचनं यथा स्यादिति। तस्मादनेनैव बहुवचनग्रहणेन निःसृता भवत्येषा **ज्ञापकसिद्धा परिभाषा–**

**३५. सर्वो द्वन्द्वो विभाषैकवद् भवति।।** (म० भा० १.२.६)

द्वयोर्वाऽधिकानां वा शब्दानां यदा द्वन्द्वसमासः क्रियते स हि सर्वोऽपि विकल्पेन एकवद्भावं भजते। एवञ्चात्र प्रकृते तिष्यपुनर्वस्वोरेकवचनपक्षे द्विवचनं न भवतीति बहुवचनग्रहणस्य सार्थक्यं जातम्। तथाऽनयैव परिभाषया 'घटपटम्' 'घटपटौ' 'तत्प्रत्यनुपूर्वम् ईपलोमकूलम्' (अ० ४.४.२८) 'माथोत्तरपदपदव्यनुपदम्०' (अ० ४.४.३७) इत्यादिषु एकवचनं सिद्धं भवति। समाहारद्वन्द्वे तु सर्वत्रैकवचनमेव भवति। इयं तु परिभाषा इतरेतरयोगद्वन्द्वसमासे एव प्रवर्तते, तस्माद् अस्या उदाहरणान्यपि सर्वाणि इतरेतरयोगद्वन्द्वस्य प्रदत्तानि– इति।।३५।।

---

'व्यत्ययो बहुलम्' (अ० ३.१.८५) इत्यनेन हि स्यादीनां विकरणानां छन्दसि व्यत्ययः क्रियते। अथ च 'षष्ठीयुक्तश्छन्दसि वा' (अ० १.४.९) इति षष्ठीयुक्तः पतिशब्दो वेदे विकल्पेन हि घिसंज्ञको भवति। अनयोरुभयोरपि

सूत्रयोः भाष्यकृता क्रमशः 'बहुलम्' इति 'वा' इति च विभज्य तत्र चोभयत्रापि 'छन्दसि' इत्यनुवर्त्त्य साधिता एषा **वाचनिकी परिभाषा–**

**३६. वाच्छन्दसि सर्वे विधयो भवन्ति॥** (म॰ भा॰ १.४.९)

वेदे हि सर्वाणि कार्याणि विकल्पेन भवन्ति। यथा– 'दक्षिणायाम्' इति प्राप्ते 'दक्षिणायाः' इति प्रयोगो जातः, इत्यादि॥३६॥

---

कश्चिद् विद्यार्थी 'अग्नी' इत्येवं द्विवचनान्तं शब्दमुच्चारितवान्। तमन्योऽनुकरोति– अग्नी इत्याह। इहानुकरणभूते 'अग्नी' इति शब्दे साक्षाद् द्विवचनस्याभावात् 'ईदूदेद् द्विवचनं प्रगृह्यम्' (अ॰ १.१.११) इति प्रगृह्यसंज्ञा न स्यात्, ततश्च अग्नीशब्दस्य ईकारेण सह 'अकः सवर्णे दीर्घः' (अ॰ ६.१.९७) इति सन्धिकार्येण भाव्यम्, तस्माद् भवत्येषा **ज्ञापकसिद्धा परिभाषा–**

**३७. प्रकृतिवदनुकरणं भवति॥** (म॰ भा॰ ८.२.४६)

यद्धि क्वचिदनुकरणं क्रियते तत् प्रकृत्या (अनुकार्येण) तुल्यं भवति। तदनेन 'अग्नी' इत्यनुकरणभूतस्य प्रकृतेर्द्विवचनान्तत्वात् प्रगृह्यसंज्ञायां जातायां सन्धिर्न भवति। अन्यच्च भाष्ये 'अशक्तिजानुकरणार्थः' इति लृकारोपदेशस्य अक्षरसमाम्नाये (प्रत्याहारपाठे) पठनस्य प्रयोजनमुक्तम्, अन्यथा लृकारस्याक्षरसमाम्नाये पाठाभावे सति काचित् कुमारी शक्तिवैकल्यात् 'ऋतकः' इति प्रयोक्तव्ये 'लृतकः' इति प्रयुङ्क्ते, तं कश्चिदन्योऽनुकरोति– 'कुमार्य्लृतक इत्याह' इत्यत्र यणादेशो न स्यात्। इह हि ऋतकशब्दस्य स्थाने प्रयुक्तस्य लृतकशब्दस्य अनुकरणवेलायां तत्स्थस्य लृकारस्य अच्त्वमङ्गीकृत्य 'इको यणचि' (अ॰ ६.१.७४) इति अज्रूपे वर्णे परतः कुमारीशब्दसम्बन्धिनः ईकारस्य यणादेशो जातः।

अथ च 'द्विः पचन्त्वित्याह' इत्यत्र केनचित् कञ्चित् प्रत्युक्तम्– 'द्विः पचन्तु' (द्विवारं पचन्तु), तमन्योऽनुकरोति– 'द्विः पचन्त्वित्याह', तदत्र यथाऽनुकार्ये[१] 'तिङ्ङतिङः' (अ॰ ८.१.२८) इति तिङ्निघातो भवति तथाऽनुकरणेऽपि भवति।

---

१. यस्यानुकरणं क्रियते तद्धि 'अनुकार्यम्' इत्युच्यते।

'अर्थवदधातुरप्रत्ययः' (अ० १.२.४५) इत्यत्र अधातुरिति पर्युदासप्रतिषेधेन धातुभिन्नस्यार्थवतः शब्दरूपस्य प्रातिपदिकसंज्ञा विधीयते। तत्र 'प्रकृतिवदनुकरणम्' इति प्रकृतपरिभाषयाऽनुकरणभूतानां क्षिप्रभृतीनां धातूनां प्रातिपदिकसंज्ञायां कर्त्तव्यायाम् अधातुरिति प्रतिषेधः प्रसज्येतेति चेत् 'प्रकृतिवत्' इति वत्करणस्य स्वाश्रयकत्वान्न दोषः, अर्थाद् वत्करणस्य ह्येतदेव प्रयोजनं यत् स्वाश्रयमपि कार्यं यथा स्यात्, एवञ्च अनुकरणाश्रयमपि कार्यं भविष्यति। अनुकरणञ्चात्र स्फुटम् अधातुरेवास्ति। ततश्च प्रातिपदिकसंज्ञायां निर्बाधरूपेण जातायां सुबुत्पत्तौ सत्याम् 'क्षि+अस् (ङस्)' इति स्थिते प्रकृतिवदनुकरणमिति प्रकृतातिदेशबलेन च धातुत्वाद् 'अचि श्नुधातुभ्रुवां०' (अ० ६.४.७७) इति इयङादेशे 'भू+अस् (ङस्)' इत्यादौ चोवङादेशे 'क्षियः, भुवः' इत्येवमादीनि रूपाणि सिध्यन्ति।

'विपराभ्यां जेः' (अ० १.३.१९) इति जिधातोरियङादेशस्य अकरणादस्या अनित्यत्वं ज्ञाप्यते। यद्वा 'क्षियो दीर्घात्' (अ० ८.२.४६) इत्येवमादौ 'अर्थवदधातुः०' (अ० १.२.४५) सूत्रस्थस्य अधातुरिति पर्युदासस्य (प्रतिषेधस्य) अप्रवृत्तेः प्रातिपदिकसंज्ञाम् आश्रित्य विभक्तिनिर्देशाद् अनित्येयम् इत्यनुमीयते। तत्रैव च धात्वनुकरणस्य धातुप्रयुक्तेयङ्निर्देशोऽस्याः सद्भावे लिङ्गम्। यदि ह्याचार्यः 'प्रकृतिवदनुकरणमिति नामंस्यत तर्हि 'क्षियः' इत्येतस्य स्थाने 'क्षेः' इति निरदेक्ष्यद् इति।।३७।।

---

'सुप्तिङन्तं पदम्' (अ० १.४.१४) इति तिङन्तस्य पदसंज्ञा विधीयते। तत्र 'भवतु, पचतु' इत्येवमादौ पदसंज्ञा न स्यात्; 'एरुः' (अ० ३.४.८६) इति हि इकारस्योकारादेशविधाने सति तिङोऽभावात्। तस्माद् भवत्येषा **ज्ञापकसिद्धा न्यायसिद्धा च परिभाषा–**

## ३८. एकदेशविकृतमनन्यवद् भवति।। (म० भा० ४.१.८३)

एकदेशो विकृतोऽस्य= एकदेशविकृतम् (सामान्ये नपुंसकम्) अथवा एकदेशेन विकृतम्= एकदेशविकृतम्। यत्र हि कश्चिदेकोऽवयवोऽन्यथात्वं भजते, न तेन स समुदायोऽन्यो भवति, तदेवावतिष्ठत इति यावत्।

एवं हि 'पचतु' इत्यादौ सत्यपि इकारस्य उकारादेशे न हि तिङ् तिङ्त्वं जहाति। तेन पदसंज्ञा जायते एव। तथा च 'प्राग्दीव्यतोऽण्'

(अ० ४.१.८३) इति सूत्रे 'तेन दीव्यति खनति जयति जितम्' (अ० ४.४.२) इति सूत्रस्थस्य 'दीव्यति' इत्येतस्य दीव्यद्भागस्य निर्देशं कुर्वताऽऽचार्येण ज्ञाप्यते- 'एकदेशविकृतं ह्यन्यवन्न भवति'। लोकेऽपि हि दृश्यते- कस्यचित् शुनः कर्णे पुच्छे वा छिन्ने सति न हि सोऽश्वो गर्दभो वा जायते, किन्तु 'श्वा' इत्येवाऽवतिष्ठते इति।।३८।।

---

'स्योनः' इत्यत्र हि 'सिवु' इत्येतस्माद् धातोः 'सिवेष्टेर्यू च'[१] (उ० ३९) इति नप्रत्यये विहिते वकारस्य च 'च्छ्वोः शूडनुनासिके च' (अ० ६.४.१९) इति ऊठादेशे 'सि ऊ+न' इति स्थिते 'पुगन्तलघूपधस्य च' (अ० ७.३.८६) धातोरिकारस्य गुणः, तस्यैव चेकारस्य 'इको यणचि' (अ० ६.१.७४) इति यणादेश इति युगपत् कार्यद्वयं प्राप्नोति। तदत्र पूर्वं केन कार्येण भाव्यम्- इति बाध्यबाधकनिरूपणाय भवतीयं **वाचनिकी परिभाषा–**

## ३९. पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः।।

पूर्व-पर-नित्य-अन्तरङ्ग-अपवादानाम् एकस्मिन् सन्निपाते उत्तरोत्तरं बलीयो भवति। परिभाषायां हि पठितौ पूर्वपरशब्दौ अष्टाध्यायीक्रमस्य संकेतकौ। तदेवं पूर्वसूत्रात् परं सूत्रं बलवदित्यत्र 'विप्रतिषेधे परं कार्यम्' (अ० १.४.२) इति सूत्रस्य विषय उपक्षिप्यते। तुल्यबलविरोधे सति परशास्त्रं पूर्वशास्त्रं बाधते इति हि तदर्थः। क्रमेणोदाहरणानि प्रस्तूयन्ते–

अत्रिशब्दाद्धि अपत्यार्थे ऋषिवाचकत्वाद् 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' (अ० ४.१.११४) इत्यण् प्राप्तः, 'इतश्चानिञः' (अ० ४.१.१२२) इति इकारान्ताद् द्व्यच्कत्वादिति च ढक्। तदत्र पूर्वम् अणं बाधित्वा परो ढगेव भवति। यथा- अत्रेरपत्यम् आत्रेय इति। यत् कृतेऽपि प्राप्नोति, अकृतेऽपि प्राप्नोति तन्नित्यं भवति। अन्तरङ्गमिति च 'असिद्धं बहिरङ्गमन्तरङ्गे' (परि० ४५) इति परिभाषाव्याख्याने व्याख्यातमस्ति।

अपवादपदस्याऽर्थस्तु एवं व्याख्यायते- 'येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति'- यस्य कार्यस्याऽवश्यप्राप्तौ सत्यां यदन्यत् कार्यमारभ्यते

---

१. सिव्धातोर्नप्रत्ययो भवति, धातोश्च टिभागस्य 'यू' इत्ययमादेशः- स्यूनः। 'उणादयो बहुलम्' इति बहुलवचनात् केवले तु नप्रत्यये- 'च्छ्वोः शूड्० इत्यूठि 'स्योनः' इत्येतत् रूपं सिध्यति।

तद्धि स्वसम्बन्धि पूर्वकार्यं बाधते इत्यर्थः। अनवकाशविधि- रप्यपवाद एव भवति।

**परादन्तरङ्गं बलवत्–** अस्याः परिभाषायाः पातनिकायां 'स्योनः' इत्येतस्मिन्नुदाहरणे 'सि ऊ+न' इत्यत्राऽन्तरङ्गत्वाद् यणादेशः परं गुणं बाधते। ततश्च 'स्यू+न' इति जाते सार्वधातुकार्ध०' (अ० ७.३.८४) इति च उकारस्य गुणे 'स्योनः' इति रूपं सम्पद्यते।

**परान्नित्यं बलवत्–** कृताकृतप्रसङ्गि नित्यमित्युक्तमेव, तद्विपरीतम् अनित्यम्। 'तुदति' इत्यत्र हि तुद्धातोर्लादेशे 'तुद्+तिप्' इति स्थिते लघूपध-गुणश्च प्राप्नोति, 'तुदादिभ्यः शः' (अ० ३.१.७७) इति शविकरणश्च। गुणो हि परभूतोऽस्ति, परं नित्यत्वाद् विकरण एव भवति। विकरणो हि कृतेऽपि गुणे प्राप्नोति, अकृतेऽपि। गुणस्तु अकृते एव विकरणे प्राप्नोति। कृते तु विकरणे शप्रत्ययस्य 'सार्वधातुकमपित्' (अ० १.२.४) इति ङित्वान्न प्राप्नोति इत्यनित्यो गुणः।

**अपवादस्य बलीयस्त्वम्–** 'बभूव' इत्यत्र हि भूधातोर्लिटि णलि 'भू+अ' इति स्थिते द्वित्वम्, यणादेशः, उवङ्, गुणः, वृद्धिः, वुक् चेति खलेकपोतन्यायेन[१] युगपत् प्राप्नुवन्ति। तदत्र द्विर्वचनं तावत् नित्यत्वात् परयणादेशं बाधते; उवङ् चान्तरङ्गत्वान् नित्यद्वित्वं बाधते; उवङञ्च परत्वाद् गुणः, गुणस्य चापवादभूता वृद्धिः, वृद्धेश्चापवादत्वाद् वुग् भवति। एवमन्येष्वपि प्रयोगेषु विज्ञेयम्।

**नित्यादन्तरङ्गं बलवत्–** 'दुद्यूषति' इत्यत्र दिव्धातोः सनि प्रत्यये 'दिव्+सन्' इति स्थिते 'सनीवन्तर्ध०' (अ० ७.२.४९) इति इड्-अभावपक्षे 'हलन्ताच्च' (अ० १.२.१०) इति सनः कित्त्वे गुणाऽभावे 'च्छ्वोः शूड०' (अ० ६.४.१९) इति वकारस्य ऊठि कृते 'दि ऊ+स' इति जाते द्विर्वचनं यणादेशश्च प्राप्नोति। कृताकृतप्रसङ्गित्वान्नित्यत्वाद् द्विर्वचनेन भाव्यम्, परं नित्यादपि द्विर्वचनाद् यणादेशस्य अन्तरङ्गत्वात् स एव प्रथमस्तावत् प्रवर्तते। कृते च यणादेशे 'पुनः प्रसङ्गविज्ञानात्' (परि० ४०) इति द्विर्वचनमिति।।३९।।

---

'ईजतुः' इत्यत्र हि यज्धातोर्लिटि अतुसि प्रत्यये 'यज्+अतुस्' इति

---

१. यथा खले कपोता अन्नकणान् ग्रहीतुं युगपदागच्छन्ति, गृहीत्वा चैकैकशो गच्छन्ति तद्वदिति।

स्थिते 'लिटि धातोः॰' (अ॰ ६.१.८) इति द्वित्वं बाधित्वा 'वचिस्वपि॰' (अ॰ ६.१.१५) इति परत्वात् सम्प्रसारणं भवति। एकदा बाधितमिदं द्वित्वं पुनर्भवेन्न वा- इति निर्णेतुं भवतीयं **न्यायसिद्धा परिभाषा-**

## ४०. पुनः प्रसङ्गविज्ञानात् सिद्धम्।। (म॰ भा॰ १.४.२)

पुनः प्रसङ्गस्य (= शास्त्रप्रसक्तेः) विज्ञानात् (=बोधात्) सिद्धम् (=शब्दरूपं लक्ष्यं निष्पद्यते)। परत्वेन वाऽन्येन वा केनचिद् हेतुना बाधितम् अपि पूर्वशास्त्रं पुनः प्रवर्तते। यदि चेदेवं कृते सति लक्ष्यं सिद्धं भवति।

तदनेन 'ईजतुः' इत्यत्र यज्धातोः कृतेऽपि सम्प्रसारणे पुनर्द्वित्वं जायते। अथ च भिद्धातोर्लोटि श्नमि हौ 'भिद्+हि' (लोट्-सिप्) इत्यत्र हेः स्थाने परत्वात् 'तुह्योस्तातङ्॰' (अ॰ ७.१.३१) इति तातङादेशे 'भिन्तात्' इति रूपं सिद्धं भवति। तदत्र तातङो विकल्पपक्षेऽस्याः परिभाषाया अभावे हि हेर्धिभावो न स्यात्, ततश्च 'भिन्धि' इति रूपं न सिध्येत्। तातङा बाधितोऽपि धिभावो विकल्पपक्षे पुनः प्रसङ्गविज्ञानात् प्रवर्तते एवेत्येवमाद्यनेकं प्रयोजनमिति।

तद्यथा लोकेऽपि क्वचिद् भक्ष्यपदार्थे यदा द्वयोर्बलाबलयोः कुक्कुरयोर्युगपत्प्रवृत्तिर्भवति, तत्र यद्यपि अबलं दूरीकृत्य बलः पूर्वं प्रवर्तते। पुनरपि ततो बले तृप्ते निवृत्ते च तत्राऽबलस्यापि प्रवृत्तिर्दृश्यते।

'आकृतौ पदार्थे सकृल्लक्ष्ये लक्षणं प्रवर्तते' इति प्रत्येकं शास्त्रस्य सावकाशत्वाद् विप्रतिषेधप्रसङ्गे उभयोरपि शास्त्रयोरप्रवृत्तौ प्राप्तायां सत्याम् 'विप्रतिषेधे परं कार्यम्' (अ॰ १.४.२) इति सूत्रेण 'विधिः' क्रियते यत्- 'विप्रतिषेधे सति परस्य कार्यं भवति' इति। विधौ हि निषेधाभावाद् यदि पूर्वसूत्रमपि प्राप्नोति, तदपि भवतीत्यनया धिया **जातिपक्षे- 'विप्रतिषेधे परं कार्यं'** इत्यस्य **विधायकत्वाद्** अनेनैव सूत्रेणैव सिद्धा एषा।।४०।।

---

लोके ह्येवं खलु दृश्यते- यद्युभयोस्तुल्यबलयोः स्वामिनोः कश्चिदेकः प्रेष्यो भवति, स हि पर्यायेण उभयोः कार्यं करोति। परं कदाचिदुभावपि स्वामिनौ यदा तं युगपत् नाना दिक्षु प्रेषयतः, तदा यदि स उभयोरप्यविरोधार्थी भवति तर्हि न कस्यापि कार्यं करोति- असम्भवात्। कथन्नु एको नाम युगपत् नाना दिक्षु गच्छेत्। पर्यायेण कुर्याच्चेद् यस्यापि पश्चात् करिष्यति स हि क्रुद्धो भवेत्। तद्वत् सूत्रेष्वपि यद्ध्युभयोरपि बलवद् भविष्यति तत् पूर्वं प्रवर्तेत। परं

यद्युभे अपि तुल्यबले स्याताम्, तदा लोकवदेकस्यापि कार्यं न भवेत्। यथा हि स्त्रीलिङ्गे वर्तमानयोस्त्रिचतुर्-शब्दयोः सामान्येन विभक्तौ 'तिसृ-चतसृ' इत्येतावादेशौ उक्तौ। अथ च आम्विभक्तौ त्रिशब्दस्य 'त्रयः' इत्ययमप्यादेश उक्तः। तत्र 'विप्रतिषेधे परं॰' (अ॰ १.४.२) इति सूत्रेण परविप्रतिषेधं मत्वा पूर्वं 'तिसृ' आदेशो जातः। तस्य च पुनः स्थानिवद्भावेन 'त्रयः' इत्यादेशोऽपि स्यात्, न तु एतद् इष्यते, तस्माद् भवत्येषा **न्यायसिद्धा परिभाषा–**

## ४१. सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव॥

(म॰ भा॰ १.४.२)

सकृद्= एकवारम्, [कार्यस्य] गतौ= प्राप्तौ, विप्रतिषेधे यद् बाधितम्, तद् बाधितमेव अर्थाद् विप्रतिषेधे सति यदा हि युगपत् क्वचित् कार्यद्वयं प्राप्नोति तदा परस्य कार्ये जाते कथञ्चित् पूर्वस्यापि प्राप्नोति चेत् तन्न भवति; यद् बाधितं तत् सर्वकालाय एव बाधितमिति मन्तव्यम्।

तदनेन 'तिसृणाम्' इत्यत्र त्रिशब्दस्य परत्वात् तिसृ-आदेशे कृते स्थानिवद्भावेन पुनः 'त्रेस्त्रयः' (अ॰ ७.१.५३) इति 'त्रयः' आदेशो न भवति।

**इदमत्र बोध्यम्–** लक्ष्यानुरोधात् 'पुनः प्रसङ्गविज्ञानात्' (परि॰ ४०) इति 'सकृद् गतौ॰' (परि॰ ४१) इति चानयोः परिभाषयोर्विषयविभागः क्रियते। बाधितं कार्यं तत्रैव पुनः प्रवर्तते, यत्र हि पुनः प्रवर्तमानेन कार्येण पूर्वप्रवृत्तं कार्यन्न नश्यते। अत्र 'व्यक्तौ तु पदार्थे प्रति लक्ष्यं लक्षणं प्रवर्तते' इति प्रत्येकं सूत्रस्याऽनवकाशत्वात् क्वचिदेकत्र युगपत्प्राप्तिप्रसङ्गे उभयोरपि सूत्रयोः पर्यायेण प्राप्तौ सत्यां 'विप्रतिषेधे परं कार्यम्' (अ॰ १.४.२) इति सूत्रेण नियमः[१] क्रियते– 'विप्रतिषेधे सति परमेव भवति न पूर्वम्' इति। नियमस्य निषेधे तात्पर्यात् पूर्वसूत्रस्याऽत्र निषेधोऽप्युपलभ्यते। एवञ्च **व्यक्तिपक्षे– 'विप्रतिषेधे परं कार्यम्'** इत्यस्य **नियामकत्वात्** 'सकृद्गतौ॰' इत्येषाऽप्यनेनैव सूत्रेण साध्यते॥४१॥

---

अथैतद् विचार्यते– धातोः परेषां लकाराणां स्थाने 'तिप्तस्झि॰' (अ॰ ३.४.७८) इति तिबादिषु प्राप्तेषु परस्मैपद-आत्मनेपदसंज्ञको नियमो वा पूर्वं

---

१. 'सिद्धे सति आरम्भो नियमार्थो भवति' इति कृत्वा।

स्याद् विकरणा वा? प्रवृत्तेऽपि नियमे विकरणाः प्राप्नुवन्ति अप्रवृत्तेऽपीति कृताकृतप्रसङ्गित्वेन विकरणा नित्याः, अथ च परस्मैपद–आत्मनेपदनियम–विधायकप्रकरणात् परा[1] अपि। एवञ्च कृत्वा परत्वान् नित्यत्वाच्च विकरणाः पूर्वमेव प्राप्नुवन्ति। ततश्च आत्मनेपद–परस्मैपद– विधायकप्रकरणे 'अनुदात्तङित आत्मनेपदम्' (अ० १.३.१२) इत्येवमादिना सूत्रजातेन पञ्चमीनिर्देशेन खलु नियमस्य विधानात् पञ्चमीनिर्देशे च 'तस्मादित्युत्तरस्य' (अ० १.१.६६) इत्यस्योपस्थानाद् अव्यवहितोत्तरस्यैव कार्यविज्ञानात् नियमो न प्राप्नोति। अथ चेद् आत्मनेपदनियमस्य अनवकाशत्वाद् व्यवहितेऽपि भविष्यतीत्युच्यते, तदपि न; अदादिगणस्थेभ्यो जुहोत्यादिभ्यश्च धातुभ्योऽथ चाशीर्लिङि लिटि च सर्वत्रैव नियमस्य सावकाशत्वात्। तदेवम् 'एधते, स्पर्द्धते' इत्यादौ कथमप्यात्मनेपदन्न स्यात्, तस्माद् भवत्येषा **ज्ञापकसिद्धा परिभाषा–**

## ४२. विकरणेभ्यो नियमो बलीयान्।। (म० भा० १.४.१२)

विकरणविधेरात्मनेपदपरस्मैपदनियमविधिरेव बलवान् भवतीति बोद्धव्यम्। कथम्? यद्धि 'आत्मनेपदेष्वन्यतरस्याम्' (अ० ३.१.५४) 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' (अ० ३.१.५५) इत्यादौ आत्मनेपदं परस्मैपदञ्चाश्रित्य विकरणा विधीयन्ते, तेन ज्ञायते नियमः पूर्वमेव प्रवर्तते। अथ च 'वृद्भ्यः स्यसनोः' (अ० १.३.९२) इति स्यविकरणविषये परस्मैपदस्य विकल्पविधानेनाप्येतद् विज्ञानं भवति यन्नियमः पूर्वमेव प्रवर्तते। पूर्वं हि विकरणे सति तेन व्यवधानाद् आत्मनेपदपरस्मैपदयोः उभयोरप्येकतरस्य नियमस्याऽभावात् 'तिप्तस्झि०' (अ० ३.४.७८) इति सामान्येनैव आत्मनेपदपरस्मैपदयोः सिद्धत्वात् तदविकल्पविधानं स्पष्टमेव अनर्थकं स्यात्। कृतञ्च सद् ज्ञापयति– विकरणेभ्यो पूर्वं नियम एव प्रवर्तते। एवं हि 'वृतु' इत्येवमादिभ्योऽनुदात्तेद्भ्यो धातुभ्य आत्मनेपदस्यैव प्राप्तौ 'वृद्भ्य स्यसनोः' (अ० १.३.९२) इति विकल्पविधानं सार्थक्यं भजते अन्यत्र च 'एधते', स्पर्द्धते' इत्यादौ पूर्वं नियमप्रवृत्तेरात्मनेपदं सिद्धं भवति इत्याद्यनेकं प्रयोजनमस्ति।।४२।।

---

१. परस्मैपद–आत्मनेपदनियमविधायकप्रकरणं प्रथमाध्यायस्य तृतीयपादेऽस्ति। विकरणप्रकरणन्तु तृतीयाध्यायस्य प्रथमपादे इति कृत्वा विकरणाः पराः सन्ति।

'न्यविशत, व्यक्रीणीत' इत्यादौ निपूर्वाद् विश्धातोः, विपूर्वाच्च क्रीधातोः 'नेर्विशः' (अ० १.३.१७) 'परिव्यवेभ्यः क्रियः' (अ० १.३.१८) इत्येवमादिना आत्मनेपदं विधीयते। तदत्र विकरणः, आत्मनेपदम्, 'लुङ्लङ्लृङ्क्षु०' (अ० ६.४.७१) इत्यडागमश्च त्रीणि कार्याणि युगपद् प्राप्नुवन्ति। त्रिष्वपि ह्येषु अडपेक्षयाऽन्तरङ्गत्वाद्, अथ च विकरणापेक्षया 'विकरणेभ्यो नियमो बलीयान्' (परि० ४२) इति परिभाषया नियमस्य बलवत्त्वादात्मनेपदे सति, सम्प्रति अड्विकरणयोः सम्प्रधारणायां- कृतेऽपि विकरणे प्राप्नोति अकृतेऽपि- इत्यड् नित्यः, विकरणश्चापि कृतेऽप्यटि प्राप्नोत्यकृतेऽपीति कृत्वा नित्य एव। उभयोर्नित्ययोस्तुल्यबलत्वात् 'विप्रतिषेधे परम्०' (अ० १.४.२) इति परत्वाद् अट् प्राप्तः। परम् 'आङ्गात् पूर्वं विकरणा इष्यन्ते- तरतस्तरन्तीत्यादिसिद्ध्यर्थम्'[१]। तरतः इत्यादौ 'तॄ+तस्' इति स्थिते पूर्वमाङ्गे हि 'ॠत इद्धातोः' (अ० ७.१.१००) इतीत्त्वे रूपं न सिध्येत्। तदत्र प्रकृतेऽडागमं ह्याङ्गं बाधित्वा कथं विकरणः पूर्वं प्रवर्तेतेति भवत्येषा **वाचनिकी परिभाषा–**

## ४३. शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति॥

(म० भा० १.३.६०)

यत्र क्वचित् कार्यद्वयं युगपत् प्राप्नोति कृताकृतप्रसङ्गित्वेन चोभे अपि कार्ये नित्ये भवतः, तत्र किञ्चिद् विशेष उच्यते। यदा हि द्वयोः सम्प्रधारणायां सत्यां कृते ह्येकस्मिन् कार्येऽपरो विधिरन्यस्य समुदायस्य प्राप्नोति, अकृते चान्यस्य, तदा स विधिरनित्य एव भवतीति मन्तव्यम्।

तद्यथा प्रकृतेऽकृते तु विकरणेऽडागमः केवलस्य विश्धातोः प्राप्नोति, कृते च विकरणान्तस्य सर्वस्याप्यङ्गस्येति कृत्वाऽड् अनित्यो जातः। ततश्च पूर्वं विकरणे सति पुनः प्रसङ्गविज्ञानात्-पश्चादटि कृते न्यविशत, व्यक्रीणीत, इत्यादीनि रूपाणि साध्यन्ते।

ननु 'न्यविशत, व्यक्रीणीत' इत्यादीनि शब्दरूपाणि साधयितुं तु अन्तरेणाऽपि इमां परिभाषां न काचिद् बाधोपस्थिता भवति। कथम्? एवञ्च किल कृत्वाऽत्र परिभाषाया आश्रयणं क्रियते यद् विकरणात् पूर्वम् अट् मा

१. भाष्यकारीयमिदं वचनं 'शदेः शितः' (अ० १.३.६०) इत्यत्रोपन्यस्तम्।

भूत्। परं यदि पूर्वमपि अट् स्यात् तदापि को दोषः? न किमपि। एवं तर्हि रूपोदाहरणमिदं मन्तव्यम्।

कार्योदाहरणमपि भवितुमर्हति, परं तदा प्रक्रिया भिन्ना भवति। अड्-विकरणो नियमः (आत्मनेपदम्) इति कार्यत्रये प्राप्ते 'विकरणेभ्यो नियमो बलीयान्' (परि० ४२) इति परिभाषामनपेक्ष्य यदा पूर्वं नियमो न प्रवर्त्त्यते, तदा 'नि विश्+लङ्' इति स्थिते अड्विकरणयोः सम्प्रधारणायां कृताकृतप्रसङ्गिमात्रेण तूभयोरपि नित्यत्वम्। परं यदि प्रकृतिपरिभाषाः समाश्रयणं क्रियते तर्ह्यड् अनित्यो भवति, यदीयं परिभाषाऽऽश्रीयते तदा तुल्यन्यायेन इयमपि आश्रयणीया भवति- **'शब्दान्तराच्च प्राप्नुवन् विधिरनित्यो भवति'** ततश्च विकरणोऽप्यनित्य एव भवति। कुतः? कृते हि अटि 'अविश्' इति अट्सहिताद् विश्धातोर्विकरणः प्राप्नोति अकृते तु केवलादिति कृत्वा 'शब्दान्तराद्' इति जातम्। एवञ्च उभयोरप्यनित्ययोः परत्वादटि सति 'नि अविश्+लङ्' इति स्थिते 'नेर्विशः' (अ० १.३.१७) इति नियमप्रकल्पने धातुभक्तोऽड् व्यवधायको[१] न भविष्यति। तदनया प्रक्रियया हि 'उपसर्गपूर्वनियमेऽड्व्यवाये उपसंख्यानं कर्तव्यम्' (भा० वा० १.३.६०) इत्युपसंख्यानं न कर्तव्यं भवतीति निर्णीतम्। यदि तु नियमात् (आत्मनेपदात्) पूर्वं विकरणे कृतेऽट् स्यात् तदा तु विकरणान्तस्य ह्यटो भक्तत्वाद् नेः परस्माद् धातोर्व्यवधायकत्वं स्यादेव, तदैव च उपसंख्यानं कर्तव्यमिति भाष्योक्तं वचनं सङ्गतं भवतीति सर्वमनवद्यम्।।४३।।

---

'नृकुट्यां भवः नार्कुटः, नृपतेरपत्यं नार्पत्यः' इत्यादौ 'तद्धितेष्वचा०' (अ० ७.२.११७) इति नृशब्दस्य वृद्धौ कर्तव्यायां 'उरण् रपरः' (अ० १.१.५०) इति सहायेन 'रेफशिरा वृद्धिः' इति भाष्यकारवचनेन[२] वा 'आर्' इति वृद्धिर्जायते। तदेतस्य रेफस्य खर्-प्रत्याहारे परतः 'खरवसानयोर्विसर्जनीयः' (अ० ८.३.१५) इति विसर्जनीयेन भाव्यम्, न चेष्यते, तस्माद् भवत एते

---

१. 'नेर्विशः' इत्यत्र 'नेः' इति पञ्चमी निर्देशोऽस्ति, तस्मादव्यवहितोत्तरादेव विशधातोरात्मनेपदं विधीयते इति भावः।

२. 'थलि च सेटि' (अ० ६.४.१२१) इत्यत्र भाष्यकृता एतदुक्तम्।

**ज्ञापकसिद्धे न्यायसिद्धे च परिभाषे–**

**४४. असिद्धं बहिरङ्गमन्तरङ्गे ॥** (म॰ भा॰ ८.४.१५)

**४५. असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे ॥**

(म॰ भा॰ ६.४.१३२)

अन्तरङ्गे कार्ये कर्तव्ये बहिरङ्गं कार्यम् असिद्धं भवति। अथवा बहिरङ्गशास्त्रम् अन्तरङ्गशास्त्रे कर्तव्येऽसिद्धं भवति। अन्तरङ्गं बहिरङ्गम् इत्यत्रोभयत्रापि बहुव्रीहिसमासः, अङ्गशब्दश्च उपकारवचनो निमित्तवचनो वा। सम्प्रति अन्तरङ्ग–बहिरङ्गशब्दयोरर्थो विग्रहपूर्वकं स्फुटं व्याख्यायते–

१. **अन्तर्भूतनिमित्तकमन्तरङ्गम्–** निमित्तसमुदायस्य मध्ये यस्य कार्यस्याऽङ्गमुपकारि निमित्तम् अन्तः (कार्यान्तरापेक्षया सन्निहितं वा न्यूनं वा) वर्तते तद् **अन्तरङ्गम्** कार्यम्। एवमेव–

**बहिर्भूतनिमित्तकं बहिरङ्गम्–** निमित्तसमुदायस्य मध्ये यस्य कार्यस्य अङ्गम् उपकारि निमित्तं बहिः (कार्यान्तरापेक्षया दूरं वा अधिकं वा) वर्तते तद् **बहिरङ्गं** कार्यम्।

२. अन्तः= मध्ये= बहिरङ्गशास्त्रीयनिमित्तसमुदायमध्ये अन्तर्भूतानि अङ्गानि= निमित्तानि यस्य तद् **अन्तरङ्गम्।**

अन्तरङ्गशास्त्रीयनिमित्तसमुदायाद् बहिर्भूतानि अङ्गानि=निमित्तानि यस्य तद् **बहिरङ्गम्।**

**३. एकाश्रितमन्तरङ्गम्, बह्वाश्रितं बहिरङ्गम्।**

**४. प्रकृत्याश्रितमन्तरङ्गम्, प्रत्ययाश्रितं बहिरङ्गम्।**

**५. पूर्वोपस्थितिकमन्तरङ्गम्, परोपस्थितिकं बहिरङ्गम्।**

**६. पूर्वोपस्थितनिमित्तकमन्तरङ्गम्, परोपस्थितनिमित्तकं बहिरङ्गम्।**

तदेवं प्रकृते 'नार्कुटः, नार्पत्यः( इत्यादौ विसर्जनीयस्य निमित्तं ककारः पकारो वाऽन्तरङ्गमस्ति, वृद्धेश्च निमित्तं तद्धितप्रत्ययो बहिरङ्गम्। यदैव अन्तरङ्गकार्यवेला समुपस्थिता भवति तदैव बहिरङ्गकार्यम् असिद्धभावम् उपयातीति कृत्वा विसर्जनीयो न भवति।

**इदमत्र बोध्यम्–** यत्र ह्यन्तरङ्गबहिरङ्गयोर्युगपत् समुपस्थानं भवति तत्र अन्तरङ्गमेव जायते, न कदाचिद् बहिरङ्गम्। एतदेव चाभिलक्ष्याभियुक्तैरिदं पठ्यते– 'बहिरङ्गाद् अन्तरङ्गं बलीयः'। अथ तु कृते हि बहिरङ्गेऽन्तरङ्गं

प्राप्नोति तत्र कृतमपि बहिरङ्गम् अकृतमिव भवति। एतदेवास्ति असिद्धत्वम्।

'वाह ऊठ्' (अ० ६.४.१३८) इत्यत्र ऊठ्ग्रहणञ्चास्या ज्ञापकम्। तत्र हि 'वाह्' इत्येतस्य भसंज्ञकस्य 'ऊठ्' इत्येतत् सम्प्रसारणं विधीयते। कर्मण्युपपदे वह्धातोः 'वहश्च' (अ० ३.२.६४) इति ण्विप्रत्यये 'प्रष्ठवह्+ण्वि' इति स्थिते प्रत्ययस्य सर्वापहारिलोपे उपधावृद्धौ च 'प्रष्ठवाह्' इति जाते तस्माच्च शस्-विभक्तौ 'प्रष्ठवाह्+अस् (शस्)' इति सम्पन्ने 'वाह ऊठ्' (अ० ६.४.१३८) इति ऊठ्रूपेण सम्प्रसारणेन 'प्रष्ठ ऊह्+अस्' इत्येवं प्राप्ते 'एत्येधत्यूठ्सु' (अ० ६.१.८६) इति ऊठि वृद्ध्येकादेशे 'प्रष्ठौह्+अस्'= 'प्रष्ठौहः' इति रूपं साध्यते। परं किमिति 'ऊठ्' इत्यात्मकेन सम्प्रसारणविधानरूपक्लेशेन! सामान्यतः सम्प्रसारणमेव विधेयम्, तेनैव सर्वं सेत्स्यति। तथा हि सम्प्रसारणमात्रे विहिते 'प्रष्ठ उह्+अस्' इति स्थिते 'प्रत्ययलोपे प्रत्ययलक्षणम्' (अ० १.१.६१) इति ण्विप्रत्ययमाश्रित्य 'उह्' इत्येतस्य लघूपधगुणे 'प्रष्ठ ओह्+अस्' इति जाते 'वृद्धिरेचि' (अ० ६.१.८५) इति च वृद्धौ सत्यां 'प्रष्ठौहः' इति सिद्धम्। तदेवम् अन्तरेणापि 'ऊठ्' इत्यात्मकं सम्प्रसारणविधानं निष्पन्नेऽभीष्टे शब्दरूपे यद् ऊठ्ग्रहणं करोति तज्ज्ञापयत्याचार्यः- 'अन्तरङ्गे कार्ये कर्तव्ये बहिरङ्गम् असिद्धं भवति'। तथा ह्यत्र सम्प्रसारणनिमित्तं शस्विभक्तिः गुणनिमित्ताद् ण्विप्रत्ययाद् बहिर्भूताऽस्ति, यद्वा शस्विभक्त्यन्तस्य समुदायस्य मध्ये गुणनिमित्तं ण्विप्रत्ययोऽन्तर्भूतस्तिष्ठति। एवञ्च कृत्वा सम्प्रसारणानन्तरम् 'प्रष्ठ उह्+अस्' इति स्थितौ यथैव ण्विप्रत्ययाश्रयको लघूपधगुणः प्रवृत्तो भवति, तथैव अत्र भसंज्ञासम्बद्धं बहिर्भूतप्रत्ययनिमित्तकं सम्प्रसारणम् असिद्धभावमुपगच्छति। तथा च सति लघूपधगुणविधायकसूत्रस्य समक्षम् 'प्रष्ठ वाह्+अस्' इति पूर्वैव स्थितिरवतिष्ठते। एवं हि 'ऊठ्' इत्यात्मकं सम्प्रसारण-विधानं सार्थकं भवति। सत्यां ह्यस्यां परिभाषायां सम्प्रसारणमात्रविधानेन नेष्टं सिद्धं स्यात्।

अन्यत्र चेदं फलम्- लोटि उत्तमपुरुषे 'पचाव+ इदम्', 'पचाम+इदम्' इत्यादौ पूर्वपरयोः स्थाने गुणैकादेशे सति 'पचावेदम्, पचामेदम्' इति जाते सम्प्रति 'अन्तादिवच्च' (अ० ६.१.८२) इति पूर्वस्याऽन्तवद्भावेन 'एत ऐ' (अ० ३.४.९३) इत्येकारस्य ऐकारादेशः प्राप्नोति। एकारस्य स्थाने प्राप्तमैत्वं ह्यत्र एकपदाश्रयकत्वादन्तरङ्गम् अस्ति, 'आद् गुणः' (अ० ६.१.८४) इति जातो गुणस्तु पदद्वयाश्रयकत्वाद् बहिरङ्गमिति कृत्वा प्रकृतपरिभाषया 'एत ऐ' (अ० ३.४.९३) इति सूत्रप्रवृत्तिवेलायां गुणैकादेशोऽसिद्धो भवति, ततश्च 'एकारस्य' अभावात् 'एत ऐ' इति कथं प्रवर्तेत।

एवं हि अन्यत् प्रयोजनम्– 'पट्व्या' इत्यत्र पदविभज्याऽन्वाख्याने 'पटु+ई+आ' इति अस्यां स्थितौ यण्द्वयं प्राप्नोति। यदि तु परयणादेशः पूर्वं स्यात् 'पट्व्या' इतीष्टं रूपं न सिध्येत। तदेवंभूतेषु प्रसङ्गेषु अन्तरङ्ग–बहिरङ्ग–शब्दयोरुक्तार्थेन व्यवस्था क्रियते। 'पूर्वोपस्थितिकम् अन्तरङ्गम्॰' इति कृत्वा पूर्वयणादेशोऽन्तरङ्गः, परयणादेशस्तु परोपस्थितिकत्वाद् बहिरङ्ग इति प्रकृतपरिभाषया पूर्व एव यणादेशः पूर्वं प्रवर्तते, न तु परः।

लोकेऽपि ह्यन्तरङ्गे कार्ये कर्तव्ये बहिरङ्गमसिद्धं भवति। यथा– मनुष्योऽयं प्रातरुत्थाय पूर्वं निजशरीरसम्बन्धीनि अन्तरङ्गकार्याणि करोति, ततो मित्राणाम्, ततश्च दूरस्थसम्बन्धिनाम्; स्वशरीरापेक्षया मित्रादीनां कार्याणां बहिरङ्गत्वादिति।।४४–४५।।

---

सत्यां ह्यन्तरङ्ग–बहिरङ्ग–परिभाषायां (परि॰ ४४) इमे दोषा आयान्ति यद् 'अक्षैर्दीव्यति= अक्षद्यूः, हिरण्यद्यूः' इत्यादौ दिव्धातोः क्विपि प्रत्यये 'च्छ्वोः शूडनु॰' (अ॰ ६.४.१९) इति वकारस्योठि कृते 'अक्ष+दि ऊ+क्विप्' इति स्थिते 'इको यणचि' (अ॰ ६.१.७४) इति अन्तर्भूतनिमित्तकत्वादन्तरङ्गे यणादेशे कर्तव्ये बहिर्भूतक्विप्प्रत्ययनिमित्तकत्वाद् ऊठो बहिरङ्गत्वादसिद्धे सति यणादेशो न स्यादित्येवमादिदोषजातं निवर्तयितुं भवतीयं अग्रिमा **ज्ञापकसिद्धा परिभाषा –**

**४६. नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः।।** (म॰ भा॰ १.४.२)

अनन्तरस्य भावः=आनन्तर्यम्, अचोरानन्तर्यम् अजानन्तर्यम्, तस्मिन्। 'बहिर्' इत्यस्य भावः=बहिष्ट्वम्, तस्य प्रक्लृप्तिः (सिद्धिः)।

यत्र क्वचिद् अचोरानन्तर्ये सति किमपि कार्यं प्राप्नोति तत्रान्तरङ्ग–परिभाषा न प्रवर्तते, बहिरङ्गकार्यस्याऽसिद्धत्वन्न भवतीति यावत्। तदेवम् 'अक्षद्यूः' इत्यादौ 'अक्ष दि ऊ+क्विप्' इत्यत्र 'इ+ऊ' इत्येतयोरचोरानन्तर्येण यणादेशप्रसङ्गे बहिरङ्गस्य ऊठः असिद्धत्वाऽभावे यणादेशः प्रवर्तत एव।

तथा हि 'षत्वतुकोरसिद्धः' (अ॰ ६.१.८३) इत्यत्र तुकि कर्तव्ये एकादेशस्यासिद्धवचनेन ज्ञापयत्याचार्यः– अचोरानन्तर्ये बहिरङ्गासिद्धत्वन्न भवति, यदि स्याद् 'षत्वतुकोरसिद्धः' (अ॰ ६.१.८३) इत्यसिद्धवचनमनर्थकं स्यात्। तत्र हि 'अधि इ+ल्यप्, प्र इ+ल्यप्' इत्यादौ एकपदाश्रयत्वात् तुकोऽन्तरङ्गत्वमथ

च पदद्वयाश्रयकत्वाद् 'अधि+इ' इत्यत्र सवर्णदीर्घस्य 'प्र+इ' इत्यत्र च गुणैकादेशस्य बहिरङ्गत्वमस्ति। एवञ्च 'असिद्धं बहिरङ्गमन्तरङ्गे' (परि० ४४) इति परिभाषयाऽन्तरङ्गे तुकि कर्तव्ये बहिरङ्गस्य सवर्णदीर्घस्य गुणैकादेशस्य वाऽसिद्धत्वे 'ह्रस्वस्य पिति कृति तुक्' (अ० ६.१.६९) इति तुक् स्यादेव- किम् पुनरसिद्धवचनेन! कृतन्तु उक्तार्थे ज्ञापकं भवति यद् अचोरानन्तर्ये बहिरङ्गमपि कार्यमन्तरङ्गेऽसिद्धभावं नोपयाति। ज्ञापिते त्वस्मिन्नर्थे 'षत्वतुकोरसिद्धः' (अ० ६.१.८३) इत्यसिद्धवचनस्य स्पष्टं सार्थक्यं भवत्येवेति।।४६।।

---

'गोमान् प्रियो यस्य स गोमत्प्रियः, यवमत्प्रियः, गोमानिवाचरति गोमत्यते, यवमत्यते' इत्येवमादिषु प्रयोगेषु समासाश्रिताया अन्तर्वर्तिन्या विभक्तेर्लुग्[1] द्विपदाश्रयत्वाद् बहिरङ्गोऽथ च 'हल्ङ्याब्भ्यो०' (अ० ६.१.६६) इति सुलोप एकपदाश्रयत्वादन्तरङ्गोऽस्ति। यद्यदि बहिरङ्गस्य बाधकोऽन्तरङ्गः सुलोपः प्रसज्येत तर्हि प्रत्ययलक्षणेन (अ० १.१.६२) नुमादि (अ० ७.१.७०) कार्यं स्यात्, ततश्च 'गोमान्प्रियः' इति रूपं स्यात् 'गोमत्प्रियः' इति चेष्यते, तस्माद् भवत्येषा **ज्ञापकसिद्धा परिभाषा–**

### ४७. अन्तरङ्गानपि विधीन् बाधित्वा बहिरङ्गो लुग् भवति।। (म० भा० ७.२.९८)

यत्र क्वचिदन्तरङ्गाण्यपि कार्याणि प्राप्तानि स्युः, बहिरङ्गश्च लुक्- तत्र बहिरङ्गो लुगेव भवति। तदत्रोपरिष्टात् प्रस्तावितेषु उदाहरणेषु समासाश्रयत्वाद् बहिरङ्गोऽप्यन्तर्वर्तिन्या विभक्तेर्लुग् एकपदाश्रयस्य अन्तरङ्गस्य हल्ङ्यादि- सुलोपस्य बाधको जातः। ततश्च लुकि सति 'न लुमताङ्गस्य' (अ० १.१.६२) इति प्रत्ययलक्षणप्रतिषेधात् 'उगिदचां०' (अ० ७.१.७०) इति सर्वनामस्थाने विधीयमानस्य नुमादेः प्राप्त्यभावात् 'गोमत्प्रियः' इत्येवमादय इष्टाः प्रयोगाः सिध्यन्ति।

'प्रत्ययोत्तरपदयोश्च' (अ० ७.२.९८) इति प्रत्यये उत्तरपदे च परतो युष्मदस्मदोः स्थाने 'त्व–मौ' आदेशौ विधीयेते। यद्यन्तरङ्गं लुको बलीयः स्यात्; नार्थोऽनेनाऽऽदेशविधानेन। कथम्? 'त्वामिच्छति त्वद्यति, मद्यति, तव

---

१. 'सुपो धातुप्रातिपदिकयोः' (अ० २.४.७१) इति प्रातिपदिकाऽवयवस्य विभक्तेर्लुग् विधीयते।

पुत्रस्त्वत्पुत्रः, मत्पुत्रः, त्वं नाथोऽस्य त्वन्नाथः, मन्नाथः' इत्येवमादिषु हि प्रयोगेषु युष्मदस्मदोः स्थाने 'युष्मद् अम् क्यच्', 'युष्मद् ङस् पुत्र सु' 'अस्मद् अम् क्यच्' इत्येवमादिकायां स्थितौ हीमावादेशौ भवतः। तत्र विभक्तिमात्रापेक्षत्वाद् आदेशौ अन्तरङ्गौ, लुक् तु समाससम्बन्धिप्रातिपदिक- संज्ञाश्रयत्वात् समुदायापेक्षत्वाद् बहिरङ्गः। एवञ्च 'त्वमावेकवचने' (अ० ७.२.९७) इति पूर्वेणैव बहिरङ्ग लुकं बाधित्वा 'त्वमौ' आदेशौ भविष्यतः। यद्यप्यत्र कृताकृतप्रसङ्गित्वेन लुग् नित्यः, तथाप्यादेशयोः अन्तरङ्गत्वात् नित्यत्वाच्चान्तरङ्गस्य बलीयस्त्वादादेशावेव प्राप्नुतः। एवञ्च कृत्वा 'प्रत्ययोत्तरपदयोश्च' इत्यादेशविधानमनर्थकं भवति। परं महाविदुष आचार्यस्य कृतौ तु वर्णेनाप्यनर्थकेन न भवितव्यम्, किं पुनरियता सूत्रेण! तदेवमनया प्रक्रियया जानीमो वयम्- यदाचार्यस्य मनसि विद्यते किमपि रहस्यम्, यदधिकृत्य 'प्रत्ययोत्तरपदयोश्च' इति सूत्रं निर्मिमीते। तच्च एतदेव यदत्राऽन्तरङ्गाभ्यामादेशाभ्यां बहिरङ्गो लुग् न बाध्यते, अपि तु बहिरङ्गेणैव लुका अन्तरङ्गौ आदेशौ बाध्येते। 'सामान्यापेक्षञ्च ज्ञापकम्' इति कृत्वा अन्यानप्यन्तरङ्गान् विधीन् बहिरङ्गो लुग् बाधते। ज्ञापिते तु अस्मिन्नर्थे पूर्वं हि बहिरङ्गे लुकि जाते 'त्वमावेकवचने' (अ० ७.२.९७) इति न प्राप्नोतीति कृत्वा 'प्रत्ययोत्तरपदयोश्च' इत्यनेन ह्यादेशविधानं सार्थकं भवति।।४७।।

---

पूर्वेषुकामशमीशब्दात्[१] प्राग्दीव्यतीये तद्धितेऽणि (अ० ४.१.८३) 'पूर्व+इषुकामशमी+अण्' इत्येतस्यामवस्थायां द्वे कार्ये प्राप्नुतः; तद्धितप्रत्ययमाश्रित्य 'प्राचां ग्रामनगराणाम्' (अ० ७.३.१४) इत्युत्तरपदभूतस्य इषुकामशमीशब्दस्य इकारस्यादिवृद्धिः, अथ च 'पूर्वशब्दाऽकारस्य 'इषुकामशमी' शब्दसम्बन्धिन आदिभूतेकारस्य च 'आद्गुणः' (अ० ६.१.८४) इति पूर्वपरयोर्गुणैकादेशः। तत्र बहिरङ्गशास्त्रीयनिमित्तसमुदायमध्ये अन्तर्भूत-निमित्तकत्वाद् गुणरूपैकादेशोऽन्तरङ्गः; अन्तरङ्गशास्त्रीय- निमित्तसमुदायाद् बहिर्भूतप्रत्ययनिमित्तकत्वाद् उत्तरपदवृद्धिर्बहिरङ्गा। यद्यत्र अन्तरङ्गो गुणः पूर्वं

---

१. पूर्वा चासौ इषुकामशमी च पूर्वेषुकामशमी- 'दिक्संख्ये सञ्ज्ञायाम्' (अ० २.१.४९) इति समासः। 'पुंवत् कर्मधारय०' (अ० ६.३.४१) इति पुंवद्भावः।

स्यात् ततः पूर्वोत्तरपदयोः विभागस्याऽनवगमात्– 'अन्तादिवच्च'[१] (अ० ६.१.८२) इति अतिदेशस्यापि 'उभयत आश्रये नान्तादिवत्' (परि० ११०) इति निषेधात् कथमप्युत्तरपदवृद्धिर्न स्यादित्येवमादीन् दोषान् अपाकर्तुं भवत्येषा **ज्ञापकसिद्धा परिभाषा–**

## ४८. पूर्वोत्तरपदयोस्तावत् कार्यं भवति नैकादेशः॥

(म० भा० १.४.२)

बहिरङ्गभूतमपि पूर्वोत्तरपदयोरेव कार्यं पूर्वं भवति, न तु अन्तरङ्ग भूत एकादेशः। तदेवं 'पूर्व+इषुकामशमी+अण्' इत्यत्राऽन्तरङ्गो गुणैकादेशः पूर्वन्न भवति, किन्तु उत्तरपदस्य बहिरङ्गा वृद्धिरेव पूर्वं भवति। वृद्धौ[२] सत्यां 'वृद्धिरेचि' (अ० ६.२.८५) इति वृद्धिरूपैकादेशेन 'पूर्वैषुकामशमः' इति सिध्यति।

परिभाषेयं 'नाजानन्तर्ये०' (परि० ४६) इति परिभाषायाः सहचारिणी मन्तव्या। 'सौमेन्द्रः' इत्यादौ 'नेन्द्रस्य परस्य' (अ० ७.३.२२) इति हि परस्येन्द्रशब्दस्योत्तरपदवृद्धेर्निषेधेन चायमर्थो ज्ञाप्यते। तथा हि 'सोम इन्द्र+अण्' इत्येतस्यामवस्थायां बहिरङ्गशास्त्रीयनिमित्तसमुदायमध्ये अन्तर्भूतनिमित्त-कत्वादन्तरङ्गत्वात् 'सोम' इत्यनेन सह इन्द्रशब्दस्यैकादेशः पूर्वं स्याच्चेत् तत्स्थस्यैकोऽजेकादेशेनाऽपहृतोऽपरो यस्येति लोपेन (अ० ६.४.१४८) द्वावेव चेन्द्रशब्देऽचावास्ताम्, तदिदानीमनच्कः इन्द्र सम्पन्नः। वृद्धिश्चाऽच एव स्थाने भवति, अचोऽभावात् वृद्धेः प्राप्तिरेव नास्ति, 'प्राप्तौ सत्यां हि प्रतिषेधो भवति' इति किं प्रतिषेधेन? न किञ्चिद्। पुनरपि यत् प्रतिषेधमारभते तज्ज्ञापयत्याचार्यः– 'अन्तरङ्गोऽप्येकादेशः पूर्वोत्तरपदयोः सम्बन्धिनं बहिरङ्गमपि कार्यन्न बाधते।' तदत्राऽन्तरङ्गैकादेशस्य बाधिकोत्तरपदवृद्धिः पूर्वं प्राप्ता, तदर्थं 'नेन्द्रस्य परस्य' (अ० ७.३.२२) इत्युत्तरपदभूतस्येन्द्रशब्दस्य वृद्धेः प्रतिषेधकरणं सार्थकं भवति। अन्यत्र च फलं 'पूर्वैषुकामशमः' इत्यत्र दर्शितमेवेति॥४८॥

---

'प्रधाय, प्रस्थाय' इत्येवमादिषु प्रयोगेषु 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' (अ० ७.१.३७) इति क्त्वाप्रत्ययस्य स्थाने ल्यबादेशो भवति। परं तस्मादपि पूर्वं

---

१. एकः पूर्वपरयोरिति य एकादेशो विधीयते, स पूर्वस्यान्तवद् भवति, परस्यादिवदिति सूत्रार्थः।

२. 'प्राचां ग्रामनगराणाम्' (अ० ७.३.१४) इत्यनेन।

'प्रधा+क्त्वा, प्रस्था+क्त्वा' इत्येतस्यामेव अवस्थायां 'दधातेर्हिः' (अ० ७.४.४२) इति 'धा' इत्येतस्य 'हि' इत्ययमादेशः, अथ च 'स्था' इत्येतस्य 'द्यतिस्यतिमास्थाम्'० (अ० ७.४.४०) इति इकारादेशः प्राप्नोति। ल्यबादेशस्य ह्यत्र समासापेक्षत्वादन्तरङ्गशास्त्रीयनिमित्तसमुदायाद् बहिर्भूतनिमित्तकत्वात् स्पष्टमेव बहिरङ्गत्वम् अस्ति, अथ च 'हि' इत्येवमादीनाम् आदेशानां बहिरङ्गशास्त्रीयनिमित्तसमुदायमध्ये अन्तर्भूतनिमित्तापेक्षत्वाद् अन्तरङ्गत्वम् अस्तीति कृत्वाऽन्तरङ्गस्य बलीयस्त्वात् परत्वाच्चाप्यत्र यदि 'हि' 'इ'- इत्येवमादाय आदेशाः पूर्वं स्युस्तर्हि 'प्रधाय, प्रस्थाय' इत्येवमादयः प्रयोगा न सिध्येयुः, तदर्थं भवत्येषा **ज्ञापकसिद्धा परिभाषा–**

## ४९. अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब् बाधते॥

(म० भा० २.४.३६)

बहिरङ्गोऽपि सन् ल्यबादेशोऽन्तरङ्गान् विधीन् बाधते। तदेवं 'हि' 'इ' इत्येवमादीन् अन्तरङ्गभूतान् आदेशान् बाधित्वा बहिरङ्गो ल्यबेव पूर्वं जात इति कृत्वा 'प्रधाय, प्रस्थाय' इत्येवमादयः प्रयोगाः सुसम्पन्नाः।

'अदो जग्धिर्ल्यप्ति किति' (अ० २.४.३६) इति ल्यपि प्रत्यये तकारादौ च किति अद्धातोः 'जग्धिः' इत्ययमादेशो विधीयते तत्र तकारादिप्रत्यय-मात्रापेक्षत्वाज् जग्ध्यादेशोऽन्तरङ्गः, पूर्वपदापेक्षी समासाश्रितो ल्यबादेशश्च बहिरङ्ग इत्यनयोः सम्प्रधारणायां ल्यबादेशात् पूर्वमेव तकारादिप्रत्ययेऽवस्थिते एवादेर्जग्धिभावो भविष्यति, तत् किं 'ल्यब्' इति वचनेन। तदेवं सिद्धे सति यल्ल्यब्ग्रहणं करोति तज्ज्ञापयत्याचार्यः– 'अन्तरङ्गानपि विधीन् बाधित्वा पूर्वं बहिरङ्गो ल्यबेव भवति।' ज्ञापिते ह्यस्मिन्नर्थे 'प्र अद्+त्वा' इत्येतस्याम् अवस्थायाम् अन्तरङ्गं जग्ध्यादेशं बाधित्वा पूर्वं ल्यबेव स्यात्। ततश्चासति ल्यब्ग्रहणे जग्ध्यादेशो न स्यादिति तदर्थं ल्यब्ग्रहणं सार्थकं भवतीति।।४९।।

---

इयाय इत्यत्र (इण्+णल्) इ+अ इति स्थिते 'इको यणचि' (अ० ६.१.७४) इति यण् तथा 'अचोऽञ्णिति' (अ० ७.२.११५) इति वृद्धिश्च प्राप्नोति। अल्पापेक्षमन्तरङ्गमिति अन्तरङ्गत्वाद् यदि यण् (बहिरङ्गं वृद्धिं बाधित्वा) स्यात् तदा इयाय इति रूपं न सिध्येत्। तदर्थं भवत्येषा **ज्ञापकसिद्धा परिभाषा–**

## ५०. वार्णादाङ्गं बलीयो भवति॥ (म० भा० ६.१.१२)

वर्णस्येदम्= वार्णम्। अङ्गस्येदम्=आङ्गम्। वर्णसम्बन्धिनः कार्याद् अङ्गसम्बन्धि कार्यं बलीयो भवति। प्रकृते हि यणादेशो वर्णकार्यमस्ति वृद्धिस्तु अङ्गकार्यम्। एवं च प्रकृतपरिभाषया अन्तरङ्गादपि वर्णकार्याद् बहिरङ्गस्य अङ्गकार्यस्य बलीयस्त्वाद् वृद्धिरेव भवति न तु यण् इति इयाय इति रूपं सिद्ध्यति।

'अभ्यासस्यासवर्णे' (अ० ६.४.७८) इत्यसवर्णग्रहणं चास्या ज्ञापकम्। तथा ह्यसवर्णेऽचि परत इवर्णान्तस्य उवर्णान्तस्य चाभ्यासस्य इयङुवङौ आदेशौ विहितौ। असवर्णग्रहणस्य ह्येतत् प्रयोजनम् ईषतुः इत्यादौ इष्+अतुस्; इष् इष्+अतुस्; इ इष्+अतुस् इति स्थिते इवर्णस्याभ्यासस्य इयङ् मा भूदिति। अत्र हि वर्णाश्रयं कार्यं सवर्णदीर्घः प्राप्नोति अङ्गाश्रयं कार्यम् इयङ् च। अन्तरङ्गत्वाद् यदि इयङ् बाधित्वा दीर्घः स्यात् तर्हि असवर्णग्रहणं व्यर्थमेव स्याद् व्यावर्त्यं सवर्णं नास्तीति। अतो असवर्णग्रहणमेव ज्ञापयति वार्णाद् आङ्गं कार्यं बलीय इति। एवं चाङ्गकार्यत्वाद् इयङि प्राप्ते तद्वारणाय क्रियमाणमसवर्णग्रहणं स्वार्थे चरितार्थं भवति। अन्यत्र च फलं पुरस्ताद् दर्शितमेव।।५०।।

---

इह व्याकरणे 'पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः' (परि० ३९) इति परिभाषयाऽपवादस्य बलवत्ता मूर्द्धायमाना तिष्ठति। तदेवम् 'अबिभयुः' इत्यत्र भीधातोर्लङि जुसि श्लौ सति 'श्लौ' (अ० ६.१.१०) इति च द्विर्वचने 'बिभी+जुस्' इति स्थिते 'सार्वधातुकार्धधातु०' (अ० ७.३.८४) इति गुणस्य प्राप्तौ सत्यां जुसो झिस्थानिकत्वात् 'सार्वधातुकमपित्' (अ० १.२.४) इति ङित्त्वे 'क्ङिति च' (अ० १.१.५) इति निषेधे जाते 'जुसि च' (अ० ७.३.८३) इति तदपवादः[१] गुण आरभ्यते। स हि यथा 'अबिभयुः' इत्यत्र प्रवर्तते तथा 'चिनुयुः' इत्यत्रापि प्रवर्तेत, न चात्र इष्यते, तस्माद् भवत्येषा **ज्ञापकसिद्धा परिभाषा–**

१. 'क्ङिति च' इत्यस्याऽपवादः इति भावः।

## ५१. येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति॥

(म० भा० १.१.६)

प्राप्तमिति भावे क्तः। न प्राप्तम्= अप्राप्तम्, न अप्राप्तम्= नाप्राप्तम्= अवश्यप्राप्तम् (द्वौ प्रतिषेधौ प्रकृतमर्थं गमयत इति कृत्वा) 'येन' इति कर्तरि तृतीया। यत्कर्तृकावश्यप्राप्ते सति योऽन्यो विधिः आरभ्यते स ह्यवश्यप्राप्तस्य कार्यस्य बाधको भवति यस्मिंस्तु प्राप्ते चाप्राप्ते चान्यो विधिरस्ति, स तु तं प्राप्ताऽप्राप्तविधिं न बाधते।

'सनिवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्' (अ० ७.२.४९) इत्यत्र यत् स्वृग्रहणं क्रियते तेन ज्ञायते भवत्येषा परिभाषा– 'येन नाप्राप्त०' इति। कथं कृत्वा ज्ञायते? तद्यथा स्वृधातोः सनि परत इड्विकल्पेन सिस्वरिषति, सुस्वूर्षति इति द्वे रूपे साधनीये। अतः स्वरतेः सनि परत इड्विकल्पार्थं 'सनीवन्त०' इत्यत्र स्वृधातुर्गृह्यते। अत्र नार्थो विकल्पार्थेन स्वृग्रहणेन। यावता 'स्वरतिसूतिसूयतिधूञूदितो वा' (अ० ७.२.४४) इत्यनेन स्वरतेर्वलादावार्धधातुके विकल्पेन इड्विधीयते। तेन यथान्यस्मिन् आर्धधातुके परत इड्विकल्प्यते तथा सनि परतोऽपि इड्विकल्पः स्यात्। एवं सिद्धे सत्यपि 'सनीवन्त०' इत्यत्र इड्विकल्पार्थं यत् स्वृग्रहणं करोति तेनैवं ज्ञापयत्याचार्य एषा परिभाषास्तीति। तथा हि स्वृधातोः तृजादिषु आर्धधातुकेषु परतः 'आर्धधातुकस्येड्वलादेः' (अ० ७.२.३५) इति प्राप्तस्य इटः 'एकाच उपदेशेऽनुदात्तात्' (अ० ७.२.१०) इति निषेधः प्राप्नोति। तं निषेधं बाधित्वा पुनः 'स्वरति०' इति इड्विकल्प्यते। यः सर्वस्मिन् आर्धधातुके परतः 'एकाच०' इति निषेधः प्राप्नोति ततो निरवकाशत्वात् 'स्वरति०' इति विकल्प- स्तमवश्यप्राप्तं निषेधं बाधत एव। अन्यथा सार्थक्यमेव न भजते।

एवं सनि परतोऽपि पूर्ववदेव प्रक्रिया। किन्त्वत्र 'सनिग्रहगुहोश्च' (अ० ७.२.१२) इत्यन्योऽपि निषेधः प्राप्नोति। इमं निषेधं तु 'स्वरति०' इति विकल्पो न बाधते। यतः सनि परतः 'सनिग्रह०' निषेधः प्राप्नोति अन्यस्मिन्नार्धधातुके तु न प्राप्नोति। ततोऽन्यस्मिन्नार्धधातुके सावकाशत्वात् 'स्वरति०' इति विकल्पः प्राप्ताप्राप्तं 'सनिग्रह०' निषेधं बाधितुं नार्हति। तस्मात् सन्यपि इड्विकल्पो यथा स्यादिति 'सनीवन्त०' इत्यत्र पुनः स्वृग्रहणं क्रियते।

प्रकृते हि 'जुसि च' (अ० ७.३.८३) इति यो गुणविधानरूपो विधिः अस्ति स हि जुसः 'सार्वधातुकमपित्' (अ० १.२.४) इति ङित्त्वाद् एतन्निमित्तके

अवश्यगुणप्रतिषेधे प्राप्ते विधीयते, अतः सार्वधातुकङित्त्वाश्रयं गुणप्रतिषेधम् एव बाधते। यत्र तु क्वचित् सार्वधातुकङित्त्वाश्रयश्च अन्याश्रयश्च प्रतिषेधप्रसङ्ग उपस्थितो भवति, तन्न बाधते, एवं हि 'अबिभयुः' इत्यादौ केवलजुस्निमित्तकं सार्वधातुकाश्रयं गुणप्रतिषेधं बाधित्वा गुणो भवति। 'चिनुयुः' इत्यादौ तु जुस्निमित्तकं सार्वधातुकाश्रयं ङित्त्वन्तु अस्त्येव, तेन साकं यासुडाश्रयमप्यस्तीति कृत्वा गुणप्रतिषेध एव भवति। न ह्येवंविधेषु प्रसङ्गेषु 'जुसि च' (अ० ७.३. ८३) इति गुणविधिर्यासुडाश्रयं निषेधं बाधि- तुमुत्सहते। यावता यत्र यत्र 'जुसि च' इति गुणः प्राप्नोति तत्र तत्र जुसः स्थानिवद्भावेनापिल्लक्षणो निषेधः प्राप्नोतीति निरवकाशत्वाद् जुस्लक्षणो गुणस्तमपिल्लक्षणं निषेधमवश्यप्राप्तं बाधत एव। अन्यथा हि तस्य गुणविधेः चरितार्थतैव न भवति। परं तु यासुड्लक्षणनिषेधो विध्याद्यर्थके लिङि प्राप्नोति अन्यत्र न प्राप्नोति। ततोऽन्यत्र सावकाशत्वाद् जुस्गुणः प्राप्ताप्राप्तं यासुड्लक्षणनिषेधं बाधितुं नार्हतीति दिक्।

**इदमत्र विशेषतो ध्यातव्यम्–** अत्र येन= लक्षणसमुदायेन, येन= एकेन लक्षणेनेति चार्थद्वयं विषयवशाद् व्यवस्थितम्। आद्येऽपि बाध्यसामान्य-चिन्ता[१] बाध्यविशेषचिन्ता[२] चेति पक्षद्वयम्। तत्र बाध्यसामा- न्यचिन्तापक्षस्य 'अचि र ऋतः' (अ० ७.२.१००) इति रादेश उदाहरणम्। तेन हि स्वविषये 'पूर्वसवर्ण-उत्त्व-ङिसर्वनामस्थानगुणः' इत्येवमादयः सर्वे बाध्यन्ते। बाध्यविशेषचिन्तापक्षे च 'पुरस्तादपवादाः०' (परि० ५२) 'मध्येऽपवादाः-(परि० ५३) इति च परिभाषाद्वयम्।।५१।।

---

'नासिकोदरौष्ठ०' (अ० ४.१.५५) इति नासिकाद्यन्तात् प्रातिपदिकात् स्त्रियां वा ङीष् विधीयते। अथ 'न क्रोडादिबह्वचः' (अ० ४.१.५६) इति क्रोडाद्यन्ताद् बह्वजन्तात् तथा 'सहनञ्विद्यमानपूर्वाच्च' (अ० ४.१.५७) इति सह-नञ्-विद्यमान-इत्येवंपूर्वात् प्रातिपदिकात् स्त्रियां ङीष्प्रत्ययः प्रतिषिध्यते तदत्र 'नासिकोदरौष्ठ०' (अ० ४.१.५५) इत्ययं योग उभयोरप्यग्रिमयोः सूत्रयोरपवादः

---

१. अस्मिन् पक्षे 'येन' इत्यस्य स्व= इतरेणेत्यर्थः।

२. यच्छब्देन तत्तद्रूपेण कार्याणां परामर्शादिति कृत्वा कार्यविशेषचिन्तापेक्षायामयं न्याय इति भावः।

स्वीक्रियेत तदानेन 'सनासिका, अनासिका, विद्यमाननासिका' इत्येवमादिष्वपि विकल्पेन ङीषा भाव्यम्, नित्यश्चात्र प्रतिषेध इष्यते, तस्माद् भवत्येषा बाध्यविशेषचिन्तापक्षमङ्गीकुर्वाणा **ज्ञापकसिद्धा परिभाषा–**

## ५२. पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते न परान्॥

(म० भा० ४.१.५५)

यत्र क्वचित् सूत्रक्रमापेक्षया पूर्वं ह्यपवादाः पठिताः सन्ति पश्चाच्चोत्सर्गास्तत्र हि तेऽपवादाः स्वसमीपस्थान् एवोत्सर्गान् बाधन्ते, न तु व्यवहितोत्तरान्।

अस्याः परिभाषाया ज्ञापकं 'परिमाणाख्यायां सर्वेभ्यः' (अ० ३.३.२०) इत्यत्र 'सर्वेभ्यः' इति ग्रहणमेव। तद्धि द्वौ कारौ त्रयः कारा इत्यत्र 'ॠदोरप्' (अ० ३.३.५७) इत्यपं बाधितुं क्रियते। पश्यत्याचार्यो यद् विना सर्वेभ्यग्रहणं 'परिमाणाख्यायाम्' इत्येतावति सूत्रे सति 'पुरस्तादपवाद०' न्यायेन अनन्तर 'एरच्' (अ० ३.३.५६) एव बाध्यते न तु उत्तर 'ॠदोरप्'। तस्मादेव तमपि अपं बाधितुं क्रियमाणं सर्वेभ्यग्रहणं सार्थकं भवति।

एवं हि 'नासिकोदरौष्ठ०' (अ० ४.१.५५) इत्ययं पूर्वापवादः स्वसमीपभूतं 'न क्रोडादिबह्वचः' (अ० ४.१.५६) इति बह्वज्लक्षणं ङीष्प्रतिषेधमेव बाधते, न तु तदुत्तरं 'सहनञ्विद्यमानपूर्वाच्च' (अ० ४.१.५७) इत्येतत्सूत्रविहितं ङीष्प्रतिषेधम्[१]। तथा चात्र तेन सूत्रेण नित्ये एव प्रतिषेधे सति 'सनासिका, अनासिका, विद्यमाननासिका' इत्येवमादयः प्रयोगाः सुसिद्धा भवन्ति। एवमन्यत्राप्यस्या विषयो विज्ञेय॥५२॥

---

'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' (अ० ४.१.५४) इति स्वाङ्गं यदुपसर्जनम् असंयोगोपधं तदन्तात् प्रातिपदिकात् स्त्रियां वा ङीष् विधीयते– अर्थात् संयोगोपधे तु सति ङीष् न भवतीत्युच्यते; तदपवादरूपेण ओष्ठ–जङ्घा–दन्त– कर्ण–श्रृङ्गप्रभृतिभ्यः संयोगोपधेभ्यः अपि 'नासिकोदरौष्ठ०' (अ० ४.१.५५) इति ङीष् विधीयते। अथ चाग्रे' 'सहनञ्विद्यमानपूर्वाच्च' (अ० ४.१.५७) इति सह–नञ्–विद्यमान–इत्येवंपूर्वात् प्रातिपदिकात् ङीष्

---

१. बाध्यसामान्यचिन्तया तु सहनञ्विद्यमानपूर्वाच्चेति शास्त्रविहितं ङीष्प्रतिषेधमपि बाधेत। बाध्यविशेषचिन्ता तु इहाश्रीयते इति कृत्वा न बाधते इति भावः।

प्रत्ययः प्रतिषिध्यते। तदत्र 'नासिकोदरौष्ठ०' (अ० ४.१.५५) इत्ययं योगः पूर्वसूत्रविहितं संयोगोपधलक्षणङीष्प्रतिषेधम् एव बाधते, आहोस्वित् परमपि सहनञ्विद्यमानपूर्वलक्षणम्–इति बाध्यसामान्यबाध्यविशेषचिन्तारूपायां विचारणायां जातायां भवतीयं **ज्ञापकसिद्धा परिभाषा–**

## ५३. मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्॥

(म० भा० ४.१.५५)

यत्र क्वचित् पूर्वश्चैव परश्चाप्युत्सर्गः पठ्यते मध्ये चापवादः, तत्र हि सोऽपवादः स्वसम्बन्धिनं पूर्वविधिमेव बाधते न तूत्तरम्।

अस्याः परिभाषाया ज्ञापकं 'बहुव्रीहेरूधसो ङीष्' (अ० ४.१.२५) इत्यत्र स्वरितत्वासञ्जनम्। स्वरितप्रतिज्ञानात् 'अन उपधालोपिनोऽन्यतरस्याम्' (अ० ४.१.२८) इत्यत्र 'बहुव्रीहेरूधसो ङीष्' इत्यनुवर्तते। तेन परत्वात् प्राप्नुवन्तं 'अन उपधा०' इति ङीपं बाधित्वा बहुव्रीहेरूधसो ङीषेव भवति। अन्यथा मध्येऽपवादन्यायेन 'बहुव्रीहेरूधसो ङीष्' इति ङीष्–पूर्वयोर्डाप्प्रतिषेध-योरेव बाधकः स्यात् न तु 'अन उपधा०' इति ङीपः।

प्रकृते 'नासिकोदरौष्ठ०' (अ० ४.१.५५) इति सूत्रं 'बिम्बोष्ठी, बिम्बोष्ठा, दीर्घजङ्घी, दीर्घजङ्घा' इत्येवमादिषु पूर्वसूत्रप्राप्तं संयोगोपधलक्षण-ङीष्प्रतिषेधमेव बाधित्वा प्रवर्तते न तु 'सदन्ता, अदन्ता, विद्यमानदन्ता' इत्येवमादिषु 'सहनञ्विद्यमानपूर्वाच्च' (अ० ४.१.५७) इति परसूत्रप्राप्तं ङीष्प्रतिषेधमपीत्यनया धिया सर्वत्रापि योजना कर्तव्येति॥५३॥

---

'सुडनपुंसकस्य' (अ० १.१.४२) इत्यत्र नपुंसकसम्बन्धिनः सुटः सर्वनामस्थानसंज्ञा प्रतिषिध्यते। तदेवं 'कुण्डानि तिष्ठन्ति, वनानि तिष्ठन्ति' इत्यत्रापि नपुंसकसम्बन्धिः सुटः सद्भावात् सर्वनामस्थानसंज्ञा न स्यात्। ततश्च सर्वनामस्थाने विधीयमानानि नुम्–इत्येवमादीनि कार्याणि न स्युः, तस्माद् भवत्येषा **ज्ञापकसिद्धा परिभाषा–**

## ५४. अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा॥ (म० भा० १.१.४३)

न अन्तरः= अनन्तरस्तस्य। विधिः प्रतिषेधो वा समीपभूतस्यैव भवतः, न तु दूरस्थस्य।

परिभाषाया अस्याः सद्भावे मानं तु 'संख्याव्ययादेर्ङीप्' (अ० ४.१.२६) इति ङीब्विधानम्। तथा हि 'ऋन्नेभ्यो ङीप्' (अ० ४.१.५) इति प्रकृतो ङीब् 'बहुव्रीहेरूधसो ङीष्' (अ० ४.१.२५) इति ङीषा व्यवहित इति 'संख्याव्ययादेर्ङीप्' (अ० ४.१.२६) इति पुनर्ङीब्विधीयते। यदि व्यवहितस्यापि ङीपो विधानं स्यात् तदा पुनर्ङीब्विधानं निरर्थकं भवेत्। अतो ज्ञायते अनन्तरस्यैव विधिर्भवतीति। एवं प्रतिषेधविषये ज्ञापकं 'न क्तिचि दीर्घश्च' (अ० ६.४.३९) इत्यत्र दीर्घग्रहणमेव। तस्य हि प्रयोजनं 'यन्तिः, तन्तिः' इत्यादिषु प्रयोगेषु दीर्घो मा भूदिति। 'न क्तिचि' इत्येतावति सूत्रे सति यथा 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति' (अ० ६.४.३७) इति प्राप्तोऽनुनासिकलोपो बाध्यते तथैव 'अनुनासिकस्य क्विझलोः क्ङिति' (अ० ६.४.१५) इति प्राप्तो दीर्घोऽपि बाध्येत, तदा दीर्घग्रहणवैयर्थ्यमेव स्यात्। अतो दीर्घग्रहणसामर्थ्यादेवावसीयते यद् दीर्घग्रहणाभावे सति प्रकृत-परिभाषाङ्गीकाराद् 'न क्तिचि' इति निषेधेनानन्तरविधि- रनुनासिकलोप एव बाध्यते न तु व्यवहितः 'अनुनासिकस्य०' इति दीर्घोऽपि।

तदत्र 'सुडनपुंसकस्य' इति हि 'अनपुंसकस्य' इति प्रतिषेधेन 'सुड्' इति कृत्वा या सर्वनामस्थानसंज्ञा प्राप्ता सैव प्रतिषिध्यते। या तु दूरस्था 'शि सर्वनामस्थानम्' (अ० १.१.४१) इति सा न प्रतिषिध्यते। एवञ्च 'कुण्डानि' इत्येवमादिषु सर्वनामस्थाने विहितानि नुम्-दीर्घत्वादीनि कार्याणि सम्पन्नीभवन्ति। अथ च-नेटि' (अ० ७.२.४) इति इडादौ परस्मैपदे सिचि विधीयमानो वृद्धिप्रतिषेधः समीपभूताया 'वदव्रजहलन्तस्याचः' (अ० ७.२.३) इति हलन्तलक्षणाया वृद्धेरेव जायते, न तु 'सिचि वृद्धिः परस्मैपदेषु' (अ० ७.२.१) इति दूरस्थायाः। तेन अलावीत्, अपावीत्' इत्यादिषु हि इडादावपि' सिचि वृद्धिर्भवत्येत्येवमाद्यनेकं प्रयोजनमस्ति।।५४।।

---

'ददति, दधति' इत्येवमादिषु प्रयोगेषु दाधातोर्लटि झिप्रत्यये सति 'दा+झि' इति स्थिते अन्तरङ्गत्वाद् 'झोऽन्तः' (अ० ७.१.३) इति अन्तादेशः पूर्वमेव स्याच्चेद् 'अदभ्यस्तात्' (अ० ७.१.४) इति अभ्यस्तसंज्ञकादुत्तरस्य प्रत्ययादेर्झकारस्य विहितोऽदादेशो व्यर्थ एव स्याद् अथ च अनिष्टा अपि प्रयोगाः प्राप्नुयुः, तदर्थम् उच्यते इदं **लौकिकन्यायसिद्धं परिभाषात्रयम्–**

## ५५. न चापवादविषये उत्सर्गोऽभिनिविशते।
## ५६. पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः।
## ५७. प्रकल्प्य चापवादविषयमुत्सर्गः प्रवर्तते॥

(म० भा० ६.१.५)

तिस्रोऽपि हि इमाः परिभाषा उत्सर्गापवादयोर्व्यवस्थां कुर्वन्ति। अपवादविषये उत्सर्गो न प्रवर्तते इति हि प्रथमा परिभाषा। अपवादाः पूर्वं प्रवर्तन्ते पश्चादुत्सर्गा इति द्वितीया। अपवादविषयं प्रकल्प्य= परित्यज्य ह्युत्सर्गः प्रवर्तते इति तृतीया। तदेवमुपर्युक्ते उदाहरणे 'अदभ्यस्तात्' (अ० ७.१.४) इति अभ्यस्तसंज्ञकादुत्तरस्य प्रत्ययादेर्झकारस्य स्थाने उच्यमानस्य 'झोऽन्तः' (अ० ७.१.३) इत्यस्य अपवादभूतस्य अदादेशस्य विषये उत्सर्गस्य अन्तादेशस्य प्रवृत्तिर्न भवति, अर्थाद् अन्तादेशात् पूर्वमेवाऽपवादः प्रवर्तते। तथा च प्रत्ययादेर्झकारस्य स्थानेऽदादेशेन 'ददति, दधति' इत्येवमादीनि रूपाणि सिध्यन्ति।

अथ च यथा 'पचेयुः, अजागरुः' इत्यादौ पच्धातोः लिङि झौ, जागृधातोश्च लङि झौ 'झोऽन्तः' (अ० ७.१.३) इत्येतस्य अपवादः क्रमशः 'झेर्जुस्' (अ० ३.४.१०८) इति 'सिजभ्यस्तविदिभ्यश्च' (अ० ३.४.१०९) इति च जुसादेशो भवति तथा 'ऐप्सन्'[१] इत्यत्र हि अपवादविषयस्याऽभावात्[२] तन्न प्रवर्तते, उत्सर्गोऽन्तादेश एव तु प्रवर्तते।

**इदमत्र सारम्–** सत्यपवादविषये उत्सर्गो न प्रवर्तते, अथ च सत्यपि उत्सर्गविषये अपवादस्तु प्रवर्तते। उत्सर्गप्रवृत्तिस्तु सर्वथाऽपवादविषयाऽभावे एव भवतीति। लोकेऽपि अनेनैव प्रकारेण सर्वे सामान्यविशेषव्यवहाराः प्रचलन्तीति कृत्वा लौकिकन्यायमूलत्वं चासां स्पष्टमेव॥५५-५६-५७॥

---

१. आप्लृधातोः सनि 'आप्ज्ञप्यृधामीत्' (अ० ७.४.५५) इत्याकारस्य ईत्त्वे द्वितीयैकाचः समुदायस्य द्विर्वचने 'अत्र लोपो०' (अ० ७.४.५८) इति सर्वस्याप्यभ्यासस्य लोपे 'ईप्स' इति जाते लङि झौ-अन्तादेशे शपि च कृते 'ईप्स+अ+अन्ति' 'इतश्च' (अ० ३.४.१००) इति इकारलोपे 'अतो गुणे' (अ० ६.१.९४) इति त्रयाणामकाराणां पररूपे आटि कृते वृद्धौ सत्यां 'ऐप्सन्' इति सिध्यति।

२. तत्= अपवादभूतो जुसादेश इति भावः।

उत्सर्गाऽपवादविषयव्यवस्थापिकाभिः परिभाषाभिरिदं निर्णीतं यदपवादविषये उत्सर्गाणां प्रवृत्तिर्न भवति, परमपवादस्तु स्वविषये उत्सर्गविधीन् बाधते एवेति। एवञ्च सति यम्धातोर्यङन्ते 'यंयम्यते, रंरम्यते' इत्यादौ 'दीर्घोऽकितः' (अ० ७.४.८३) इत्यत्राऽभ्यासस्य दीर्घं वारयितुं किम् अकिद्ग्रहणेन! कथम्? सामान्येनैवाऽजन्तस्याऽभ्यासस्य दीर्घो विधेयः, तस्य चापवादो 'नुगतोऽनुनासिकान्तस्य' (अ० ७.४.८५) इति नुग् भविष्यति। नुकि च सत्यभ्यासस्याऽजन्तत्वस्याऽभावादेव दीर्घत्वन्न भविष्यति। तदेवम् अकिद्ग्रहणं व्यर्थं सद् ज्ञापयतीमां **ज्ञापकसिद्धां परिभाषाम्–**

## ५८. अभ्यासविकारेष्वपवादा उत्सर्गान्न बाधन्ते॥

(म० भा० ७.४.८३)

इह परिभाषायां निर्दिष्टः 'अपवादः' इति बाधकपरः, 'उत्सर्गः' इति च बाध्यपरः। अभ्याससम्बन्धिविकारेषु बाधका न बाधन्ते इति यावत्। तदत्र ज्ञापितायां ह्यस्यां परिभाषायाम् 'दीर्घोऽकितः' इत्यत्र अकिद्ग्रहणाऽभावे 'यंयम्यते' इत्यादौ दीर्घत्वं स्यादेव। अर्थाद् अपवादभूतो नुग् उत्सर्गं दीर्घविधिं न बाधेत। अकिद्ग्रहणसामर्थ्यात्तु दीर्घत्वमत्रापवारितं भवति। एषा एव चाकिद्ग्रहणस्य स्वार्थे चरितार्थता। अन्यत्र चेदं फलम्– ढौकृतौकृधातुभ्यां यङन्ते 'डोढौक्यते–तोत्रौक्यते' इत्यादिषु प्रयोगेषु 'ह्रस्वः' (अ० ७.४.५९) इत्युत्सर्गे प्रवृत्ते सति 'गुणो यङ्लुकोः' (अ० ७.४.८२) इति गुणो भवति। यदि ह्यत्र ह्रस्वापवादः 'दीर्घोऽकितः (अ० ७.४.८३) इत्यौकारस्य औकारः एव दीर्घत्वं प्रसज्येत ततो ह्रस्वस्य बाधितत्वात् पुनर्ह्रस्वो न स्यात्, इगन्ताभ्यासस्य चाऽभावाद् गुणोऽपि न स्यात्, तथा हि 'डौढौक्यते' इत्यभ्यासेऽनिष्ट औकारः श्रूयेतेत्येवमाद्यनेकं प्रयोजनमस्ति।।५८।।

---

तच्छीलादिष्वर्थेषु ण्वुल् (अ० ३.१.१३३) इत्येतस्यापवादः तृन् (अ० ३.२.१३५) इति विधीयते। तृन्ण्वुलौ चासरूपावपि स्तः। धात्वधिकारे चासरूपोऽपवादः 'वाऽसरूपोऽस्त्रियाम्' (अ० ३.१.९४) इति नियमेनोत्सर्गस्य विकल्पेन बाधको भवति, पक्षे उत्सर्गोऽपि प्रवर्तते। तदेवं 'निन्दहिंसक्लिश० (अ० ३.२.१४६) इत्यत्र किमर्थं तृनोऽपवादो वुञ् पठ्यते? यतो हि तृनोऽभावपक्षे

'निन्दकः, हिंसकः' इत्येवमादयो वुञा साध्याः प्रयोगा ण्वुलैव सेत्स्यन्ति। न ण्वुलि वुञि वा स्वरे रूपे वा विशेषोऽस्ति, तदेव रूपं स एव स्वरः – नि॒न्द॑कः इति। ण्वुल्पक्षे हि 'निन्द्+अक' इति स्थिते 'लिति' (अ० ६.१.१८७) प्रत्ययात् पूर्वस्योदात्ते 'निन्द्' इत्येतस्य इकारस्य उदात्तो भवति, वुञि चापि 'ञ्नित्यादिर्नित्यम्' (अ० ६.१.१९१) इत्याद्युदात्तेन तस्यैव इकारस्य उदात्तो जायते। केवलम् 'असूयकः' इत्येकस्मिन् शब्दे ण्वुलि वुञि च स्वरभेदो भवति। ण्वुल्पक्षे हि तत्र 'असूय+अक' इति स्थिते 'अतो लोपः' (अ० ६.४.४८) इत्यकारलोपे 'लिति' (अ० ६.१.१८७) इति प्रत्ययात् पूर्वस्य ऊकारस्य उदात्ते जाते 'अ॒सू॑यकः' इति स्वरो भवति, वुञि तु 'ञ्नित्यादि०' (अ० ६.१.१९१) इत्याद्युदात्तेन 'अ॑सू॒यकः' इत्येवंरूपः। तदत्रासूयव्यतिरिक्तेभ्यो निन्दादिभ्यस्तु वुञ्विधानं व्यर्थमेव जातम्, व्यर्थीभूय च **ज्ञापयत्येतत्–**

## ५९. ताच्छीलिकेषु सर्व एव तृजादयो वाऽसरूपेण न भवन्ति॥ (म० भा० ३.२.१४६)

तच्छीले भवास्ताच्छीलिकास्तेषु। तच्छीलाधिकारे (अ० ३.२.१३४–१७७) हि ये तृजादिभिः सहाऽसरूपा अपवादभूताः प्रत्ययाः सन्ति, ते तृजादीन् नित्यमेव बाधन्ते। वाऽसरूपन्यायेन तृजादयो न भवन्तीति यावत्। एवं हि प्रकृते 'निन्दहिंसक्लिश०' (अ० ३.१.१४६) इत्यनेनाऽसति वुञ्विधाने 'निन्दकः' इत्येवमादयः प्रयोगा न सिध्येयुः। कुतः? तच्छीलाधिकारविहितेन 'तृन्' (अ० ३.२.१३५) इत्यनेन ण्वुलो नित्यमेव बाधितत्वात्। तस्मात् तच्छीलादिष्वर्थेषु 'निन्दकः' इत्यादिशब्दसिध्यर्थं वुञो विधानं सार्थकं भवति। 'असूयकः' इत्यत्र तु स्वरभेदसिध्यर्थं वुञ्वचनम् इत्युक्तमेव। अन्यत्र चेदं फलं यत् 'सनाशंसभिक्ष उः' (अ० ३.२.१६८) इति भिक्षधातोस्तच्छीलादिषु उच्यमान उप्रत्ययो ण्वुलादीन् नित्यं बाधते, न भवति कदाचिद् भिक्षक इत्येवमादि।।५९।।

---

यदि हि धात्वाधिकारे सर्वत्र 'वाऽसरूपोऽस्त्रियाम्' (अ० ३.१.९४) इति प्रवर्तते– 'हसितं हसनं वा छात्रस्य शोभनम्' इति क्तल्युट्–प्रत्यययोर्विषये

'घञ्' ('भावे'- अ॰ ३.३.१८) 'इच्छति भोक्तुम्' इत्यत्र लिङ्लोटौ ('इच्छार्थेषु लिङ्लोटौ'- अ॰ ३.२.१५७) 'ईषत्पानः सोमो भवता' इत्यत्र च खल् (ईषद्दुःसुषु॰'- अ॰ ३.३.१२६) इत्येवमादयः प्रत्यया अप्यसरूपोत्सर्गत्वात् पक्षे प्राप्नुवन्ति। तस्मादिमं संदेहमपसारयितुं भवत्येषा **ज्ञापकसिद्धा परिभाषा–**

## ६०. क्तल्युट्तुमुन्खलर्थेषु वाऽसरूपविधिर्नास्ति॥

(म॰ भा॰ ३.१.९४)

क्त–ल्युट्–तुमुन्–खलर्थ–इत्येतेषां प्रत्ययानां विषयेऽसरूपा उत्सर्गभूताः प्रत्ययाः पक्षे न भवन्ति। अर्थाद् 'हसितम्–हसनम्' इत्येवमादीनां प्रयोगाणां विषये घञादय उत्सर्गप्रत्यया न भवन्तीति।

'अर्हे कृत्यतृचश्च' (अ॰ ३.३.१६९) इत्यत्र कृत्यतृज्ग्रहणं चास्या ज्ञापकम्। तथा हि 'अर्हे' इत्येतस्मिन्नर्थे लिङेव विधेयः, वाऽसरूपोऽस्त्रियाम् (अ॰ ३.१.९४) इति नियमेन चासारूप्यात् सामान्यविहितयोः कृत्यतृचोरपि विशेषविहितेऽर्हेऽर्थे लिङा सह समावेशो भविष्यति। तत्पुनर्व्यर्थीभूय ज्ञापयति– 'वाऽसरूपोऽस्त्रियाम्' (अ॰ ३.१.९४) इति परिभाषाऽनित्याऽस्तीति। एवञ्चो- पर्युक्तेषूदाहरणेषु न प्रवर्तते इति।।६०।।

---

'हशश्वतोर्लङ् च' (अ॰ ३.२.११६) इति हि सूत्रेण भूतानद्यतनपरोक्षकाले लङ्लिटौ विधीयेते। तत्र लङ्लिडादेशयोरसरूपत्वाद् अन्तरेणैव वचनं स्वत एव समावेशो भविष्यति, एवं च सूत्रे लङ्ग्रहणं व्यर्थं भवति। तत्पुनरिदं लङ्ग्रहणं व्यर्थीभूय इमां **परिभाषां ज्ञापयति–**

## ६१. लादेशेषु वाऽसरूपविधिर्न भवति॥ (म॰ भा॰ ३.१.९४)

स्पष्टम्। तदनेन लङो ग्रहणं सार्थकं जातम्। लादेशेषु असरूपविधेर- भावादेव 'लटः शतृशानचा॰' (अ॰ ३.२.१२४) इत्यत्र 'नन्वोर्विभाषा' (अ॰ ३. २.१२१) इत्यतो विभाषाऽनुवृत्तिः क्रियते। तच्च तिङोऽपि समावेशार्थमेव। यदि तु लादेशेष्वपि वाऽसरूपविधिः स्यात् ततः तिङ्समावेशार्थं विभाषानुवृत्तिर- पार्थिका स्यादित्येवमाद्यनेकं प्रयोजनं बोद्धव्यमिति।।६१।।

---

'तस्मिन्निति निर्दिष्टे पूर्वस्य' (अ० १.१.६५) 'तस्मादित्युत्तरस्य' (अ० १.१.६६) इत्येताभ्यां सूत्राभ्यां सप्तमीनिर्दिष्टं कार्यम् अव्यवहितपूर्वस्य पञ्चमीनिर्दिष्टञ्च अव्यवहितोत्तरस्य विधीयते। तद्यथा– 'दधि+अत्र' इत्यादौ 'इको यणचि' (अ० ६.१.७४) 'अचि' इति सप्तमीनिर्दिष्टे पूर्वस्य 'दधि' इत्येतस्य इकारस्य यणादेशः; अथ च 'द्वि+अप' इत्यादौ 'द्व्यन्तरुपसर्गेभ्योऽप ईत्' (अ० ६.३.९६) इति पञ्चमीनिर्दिष्टाद् द्विशब्दाद् उत्तरस्य 'अप' इत्येतस्याऽकारस्य 'ईत्वम्' भवति। परं यत्र क्वचित् एकस्मिन् एव सूत्रे पञ्चम्या सप्तम्या च उभाभ्यामपि निर्देशः क्रियते, तत्र पूर्वस्य वा उत्तरस्य वा कस्य कार्यं स्याद् इति संदेहनिवृत्त्यर्थं भवति इयं **युक्तिरूपा न्यायसिद्धा परिभाषा–**

## ६२. उभयनिर्देशे विप्रतिषेधात् पञ्चमीनिर्देशः॥

(म० भा० १.१.६६)

यत्र सप्तम्या पञ्चम्या चोभाभ्यामपि विभक्तिभ्यां निर्देश उपलभ्यते, तत्र सूत्रपरविप्रतिषेधेन (अ० १.४.२) पञ्चमीनिर्देश एव बलीयान् भवति। तथा 'ङमो ह्रस्वादचि ङमुण् नित्यम्' (अ० ८.३.३२) इत्यत्र ङमः परस्याचः, अचः पूर्वस्य वा ङमः कार्यं स्यादिति संदेहे ह्रस्वात् परो यो ङम् तस्मादुत्तरस्याऽचः कार्यं भवति। तथा च 'तिङ्ङतिङः' (अ० ८.१.२८), 'तस्मिन्निति०' (अ० १.१.६५) कुर्वन्नास्ते इत्येवमादीनि रूपाणि सिध्यन्ति इति॥६२॥

---

इह व्याकरणे 'स्वं रूपं शब्दस्या०' (अ० १.१.६७) इति स्वरूपग्राहिकया परिभाषया 'अतः कृकमिकंसकुम्भपात्र०' (अ० ८.३.४६) इति कुम्भशब्दे पात्रशब्दे च परतो विसर्जनीयस्य स्थाने उच्यमानः सकारादेशः 'पयस्कुम्भी, पयस्पात्री' इत्येवमादिषु प्रयोगेषु न स्यात्; इष्यते च अत्रापि स्यादिति, अतो भवतीयं **ज्ञापकसिद्धा परिभाषा–**

## ६३. प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवति॥

(म० भा० ४.१.१)

प्रातिपदिकस्य ग्रहणम्= प्रातिपदिकग्रहणम्, तस्मिन् यत्र क्वचित् सूत्रेषु प्रातिपदिके परतः पूर्वस्य कार्यमुच्यते प्रातिपदिकाद् वोत्तरस्य प्रातिपदिकस्यैव

वा तत्र पठितलिङ्गाद् भिन्नलिङ्गस्यापि ग्रहणं भवतीति मन्तव्यम्।

तदनेन 'पयस्कुम्भी' इत्येवमादयः प्रयोगाः सिद्धा भवन्ति। अथ च 'आमि सर्वनाम्नः सुट्' (अ० ७.१.५२) इति सर्वनाम्न उत्तरस्य आम्प्रत्ययस्य उक्तः सुडागमो यथा 'येषाम्, तेषाम्' इत्यत्र भवति, तथा 'यासाम्, तासाम्' इत्यादौ स्त्रीलिङ्गविशिष्टसर्वनाम्नोऽपि भवति। यथा च 'द्वितीयाश्रितातीत०' (अ० २.१.२३) इत्युक्तः समासः पुँल्लिङ्गश्रितशब्देन सह 'कष्टं श्रितः= कष्टश्रितः' इत्यत्र भवति तथा स्त्रीलिङ्गेन 'श्रिता' इत्यनेन 'कष्टं श्रिता= कष्टश्रिता' इत्यत्रापि भवति। अथ च यथा 'अचित्तहस्तिधेनोष्ठक्' (अ० ४.२.४६) इति विहितष्ठक् हस्तिनां समूहो 'हास्तिकम्' इत्यत्र भवति, तथा 'हस्तिनीनां समूहो 'हास्तिकम्'[1] इत्यत्रापि भवति। यथा च 'शयवासवासिष्व-कालात्' (अ० ६.३.१७) इति सप्तम्याः विभक्तेरलुक् 'ग्रामेवासी' इत्यत्र भवति तथा 'ग्रामेवासिनी' इत्यत्रापीति।

**'युवा खलतिपलितवलिनजरतीभिः'** (अ० २.१.६६) इति समानाधि-करणेन जरतीशब्देन सह युवशब्दस्य उच्यमानः समासश्चास्याः परिभाषायाः सत्त्वे लिङ्गम्। कथम्? जरतीशब्दः स्त्रीलिङ्गः, युवशब्दश्च पुँल्लिङ्गः, तत्रानयोः सामानाधिकरण्याऽभावात् समास एव न प्राप्नोति, तत् किं पुनरत्र जरतीग्रहणेन! कृतन्तु ज्ञापयति- प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवति। ज्ञापिते त्वस्मिन्नर्थे युवशब्देन स्त्रीलिङ्गस्य युवतिशब्दस्यापि ग्रहणं भवति, तेन 'युवतिर्जरती= युवजरती'[2] इत्यत्र समासः सिद्धो भवति, एवञ्च कृत्वा जरतीशब्दस्य ग्रहणं सार्थकं भवति। अन्यत्र फलन्तु उपरि दर्शितमेव।

'द्विर्बद्धं सुबद्धं भवति' इति न्यायेन 'कुमारः श्रमणादिभिः' (अ० २.१.६९) इत्यत्रापि 'श्रमणा' इति स्त्रीलिङ्गेन शब्देन सह 'कुमारः' इति पुँल्लिङ्गशब्दस्य समासविधानेनाऽयमेवाऽर्थो ज्ञाप्यते इति।

---

१. हस्तिनीशब्दात् ठकि विहिते 'हस्तिनी+ठक्' इति स्थिते 'ठक्छसोश्च पुंवद्भावो वक्तव्यः' (वा० ६.३.३४) इति पुंवद्भावेन 'हास्तिकम्' इति सिध्यति। पुँल्लिङ्गे तु 'हस्तिन्' इत्येतस्मात् ठकि कृते 'नस्तद्धिते' (अ० ६.४.१४४) इति टिलोपेन 'हास्तिकम्' इति भवति। 'ठस्येकः' (अ० ७.३.५०) इति इकादेशस्तु उभयत्रापि समानः।

२. 'पुंवत् कर्मधारय०' (अ० ६.३.४१) इति पूर्वपदस्य पुंवद्भावेन हि युवतिशब्दस्य युवशब्दो जात इति।

**इदमत्रावधेयम्–** प्रातिपदिकसामान्यम्[१], प्रातिपदिकविशेषश्च[२] उभयमप्यस्याः परिभाषाया विषय इति। तथा चैव उदाहृतम्। उक्तञ्च कैयटेनाऽपि (अ० ४.१.१) "यथाकथञ्चित् प्रातिपदिकग्रहणे एषा परिभाषोपतिष्ठते न तु प्रातिपदिकस्वरूपग्रहणे एवेति"।।६३।।

---

प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवतीत्यनया परिभाषया (परि० ६३) 'श्वयुवमघोनामतद्धिते' (अ० ६.४.१३३) इति यथा 'यूनः पश्य' इत्यत्र युवन्शब्दस्य सम्प्रसारणं भवति तथा 'युवतिः पश्य' इत्यत्र स्त्रीलिङ्गेऽपि स्यादित्येवंभूतान् संदेहान् अपाकर्तुं भवतीयं पूर्वस्याः परिभाषाया अपवादभूता **वाचनिकी परिभाषा–**

## ६४. विभक्तौ लिङ्गविशिष्टग्रहणं न।। (म० भा० ७.१.१)

विभक्त्याश्रये कार्ये कर्तव्ये पठितलिङ्गादन्यलिङ्गस्य प्रातिपदिकस्य ग्रहणन्न भवति। तदेवं भसंज्ञाश्रयं[३] सम्प्रसारणं युवतिशब्दस्य न प्रवर्तते। तथा 'गोमान्, यवमान्' इत्यादौ 'उगिदचां सर्वनाम०' (अ० ७.१.७०) इति विहितो नुम्[४] 'सर्वनामस्थाने चासम्बुद्धौ' (अ० ६.४.८) इति च दीर्घत्वम्[४] 'गोमती, यवमती' इत्यादौ स्त्रीलिङ्गे न प्रवर्तते। अथ च यथा 'सखा' इत्यत्र 'अनङ् सौ' (अ० ७.१.९३) इत्यनङ् 'सखायौ, सखायः' इत्यादौ च 'सख्युरसम्बुद्धौ' (अ० ७.१.९२) इति णिद्वच्च भवति, तथा 'सखी, सख्यौ, सख्यः' इत्येवमादौ स्त्रीलिङ्गे विभक्त्याश्रितौ एतौ अनङ्णिद्भावौ न भवतः इति बहुप्रयोजनैषा परिभाषा।।६४।।

---

१. यथा– 'आमि सर्वनाम्नः सुट्' (अ० ७.१.५२)।

२. यथा– 'द्वितीया श्रितातीत०' (अ० २.१.२३)।

३. 'श्वयुव०' (६.४.१३२) इति भसंज्ञायां हि सम्प्रसारणं विधीयते। भसंज्ञा च 'यचि भम्' (अ० १.४.१८) इति स्वादौ प्रत्यये भवति। तदेवं सम्प्रसारणस्य विभक्तिनिमित्तकत्वं जातम्।

४. नुम्–दीर्घत्वे अपि सर्वनामस्थानविभक्तौ विधीयमाने स्पष्टमेव विभक्तिनिमित्तके इति।

'तस्यापत्यम्' (अ० ४.१.९२) इति सूत्रे 'तस्य' इत्ययं पुँल्लिङ्गेन षष्ठ्या एकवचनेन च निर्देशः क्रियते, 'अपत्यम्' इति च नपुंसकलिङ्गेन प्रथमैकवचनेन च। तत्र 'उपगोरपत्यम्= औपगवः' इत्यादावेव प्रत्ययः स्यात्। सुमातुः[१] अपत्यं सौमात्रः, तथा च क्षत्रस्य[१] अपत्यं क्षात्रिः इत्यादौ तु न स्यात्। अथ च 'द्वयोः मात्रोः अपत्यम् इति द्वैमातुरः' इत्यादौ 'मातुरुत् संख्यासंभद्रपूर्वायाः' (अ० ४.१.११५) इति द्विवचनान्तादपि प्रत्ययो न स्यात्। 'भावे' (अ० ३.३.१८) इति विधीयमानाः घञादयो द्विवचने बहुवचने वा न स्युरित्यतो भवतीयं **ज्ञापकसिद्धा न्यायसिद्धा वा परिभाषा–**

## ६५. सूत्रे लिङ्गवचनमतन्त्रम्॥ (म० भा० ४.१.९२)

लिङ्गञ्च वचनञ्चेति लिङ्गवचनम्। तन्त्रशब्दः प्रधानवाची। 'सूत्रे' इति जातावेकवचनम्। सूत्रेषु यानि लिङ्गवचनानि पठितानि सन्ति तान्यतन्त्राणि अप्रधानभूतानि सन्ति। कार्यवेलायां हि तानि नाश्रीयन्ते इति।

अत्र च लिङ्गविषये ज्ञापकं 'अर्धं नपुंसकम्' (अ० २.२.२) इत्यत्र नपुंसकशब्दग्रहणम्। अस्य एतदेव प्रयोजनं यद् 'अर्धपिप्पली' इत्यादौ एकदेशिसमासो यथा स्याद् 'ग्रामार्धः' इत्यादौ तु न स्यादिति। अथ सूत्रे अर्धमिति नपुंसकलिङ्गेन निर्देशादेव समवप्रविभागवाची अर्धशब्दोऽन्यैनैकदेशिना सुपा समस्यते, खण्डार्थे (भागार्थे) योऽर्धशब्दः पुँल्लिङ्गवाची स एकदेशिना न समस्यते। यतो हि समांशोऽर्धशब्दो नपुंसकम्, खण्डार्थे पुँल्लिङ्ग इति नियमात्। ततो ग्रामार्ध इत्यादौ एकदेशिसमासवारणाय नपुंसकमिति शब्दग्रहणं व्यर्थं सज्ज्ञापयति सूत्रेषु लिङ्गस्यातन्त्रत्वम्। अतः 'अर्धं नपुंसकम्' इत्यत्र लिङ्गाप्राधान्यस्वीकरणाद् 'ग्रामार्धः' इत्यादौ य एकदेशिसमासः प्राप्नोति तं निवारयितुं नपुंसकशब्दग्रहणं क्रियत इति स्वार्थे चरितार्थम्।

अथ च 'आ कडारादेका संज्ञा' (अ० १.४.१) इत्यत्र च एकाग्रहणेन वचनस्यातन्त्रत्वं ज्ञाप्यते। तच्चेत्थम्– 'आकडारात् संज्ञा' इत्येतावति सूत्रे निर्मिते सत्यपि एकवचनान्तेन संज्ञाशब्देन एका एव संज्ञा भविष्यति। परम् आचार्य इह पश्यति यद् सूत्रे निर्दिष्टं वचनम् अतन्त्रमिति। तेन एकाधिकाः संज्ञा अपि भविष्यन्ति। तन्मा भूदिति एकाग्रहणं कृतम्। एवम् एकाग्रहणं स्वार्थे चरितार्थं सद् वचनस्यापि अतन्त्रत्वं ज्ञापयति।

---

१. सुमातृशब्दो हि स्त्रीलिङ्गः, क्षत्रशब्दश्च नपुंसकलिङ्गः इति कृत्वा प्रत्ययो न स्यादिति।

तथा च धान्यपलालन्यायेन समाहितं भाष्ये– "नान्तरीयकत्वादत्र पुँल्लिङ्गेन निर्देशः क्रियते एकवचनेन च। अवश्यं कयाचिद् विभक्त्या केनचिच्च लिङ्गेन निर्देशः कर्तव्यः। तद्यथा– कश्चिदन्नार्थी शालिकलापं सतुषं सपलालमाहरति नान्तरीयकत्वात्। स यावदादेयं तावदादाय तुषपलालान्युत्सृजति। एवमिहापि नान्तरीयकत्वात् पुँल्लिङ्गेन निर्देशः क्रियते एकवचनान्तेन च। न ह्यत्र निर्देशस्तन्त्रम्। कयाचिद् विभक्त्या केनचिच्च लिङ्गेन निर्देशः कर्तव्यः" (म॰ भा॰ ४.१.९२)। अन्यत्र चेमामेव वार्तां प्रकारान्तरेणाऽऽह भाष्यकृत्– "प्रातिपदिकनिर्देशाश्च अर्थतन्त्रा भवन्ति, न काञ्चित् प्राधान्येन विभक्तिमाश्रयन्ति[१]। तत्र प्रातिपदिकार्थे निर्दिष्टे यां यां विभक्तिमाश्रयितुं बुद्धिरुपजायते सा साऽऽश्रयितव्या।।"

**विशेषः–** अयञ्च न्यायो वेदेऽपि इत्थमेव स्वीक्रियते। अर्थात् यत्र क्वचित् स्त्रीलिङ्गेन, पुँल्लिङ्गेन, नपुंसकलिङ्गेन वा तथैकवचनेन, द्विवचनेन, बहुवचनेन वा निर्देशः स्यात् तत्र तेनैव पठितलिङ्गेन वचनेनैव वा कार्यं करणीयमिति नास्ति नियमः, किन्तु केनाप्येकेन लिङ्गेन वचनेनैव वा पठनेन सर्वैर्लिङ्गैः सर्वैश्च वचनैः कार्यं भवितुमर्हति। तदनेन 'सौमात्रः, क्षात्रिः, द्वैमातुरः' इत्येवमादयः प्रयोगाः सुसिद्धा भवन्तीत्येवमाद्यनेकं प्रयोजनमस्ति।।६५।।

---

'भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः' (अ॰ ३.१.१२) इति योऽयम् अच्व्यन्तेभ्यो भृशादिभ्यः प्रातिपदिकेभ्यो भवत्यर्थे क्यङ्प्रत्ययो विहितोऽस्ति, स हि 'क्व दिवा भृशा भवन्ति' (ये रात्रौ भृशा नक्षत्रादयस्ते दिवा क्व भवन्ति) इत्येवमादौ कथन्न भवतीत्येवंभूतान् संदेहान् निवारयितुं भवतीयं **न्यायसिद्धा परिभाषा–**

## ६६. नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः।।

(म॰ भा॰ ३.१.१२)

नञ् च इवश्च नञिवौ। नञ्–इवाभ्यां युक्तं नञिवयुक्तम्। अन्यच्च तत् सदृशं च= अन्यसदृशम्। अन्यसदृशं च तदधिकरणञ्च= अन्यसदृशाधिकरणम्; तस्मिन्। हि= यतः। तथा= अनेनैव प्रकारेण। अर्थगतिः, अर्थस्य गतिरवगतिः।

---

१. विभक्तिरिह लिङ्गस्याप्युपलक्षणम्।

भवतीति शेषः। नञ्युक्तं पदम्, इवयुक्तञ्च यत् पदं तत् स्वस्माद् भिन्नस्य तथापि सदृशस्याऽर्थस्य बोधकं भवति। तद्यथा- कश्चित् कञ्चिदाह- 'भोः! अब्राह्मणमानय' न हि स तदा किञ्चिल्लोष्टादिकमानीय कृती भवति, अपितु ब्राह्मणभिन्नं तत्सदृशञ्च कञ्चित् क्षत्रियादिकं यद्यानयति तदैव सफली भवति। लोष्टं हि ब्राह्मणभिन्नं तु अस्ति परं तत्सदृशं नास्ति। तथैव शास्त्रेऽपि निषेधभूतेन पदेन तद्भिन्नः तत्सदृशोऽर्थो गृह्यते। तदत्राऽच्व्यन्तेभ्यो भृशादिभ्य इति योऽयं क्यङ् विधीयते स हि च्व्यन्तभिन्नेभ्यश्च्व्यन्तसदृशेभ्य एव भृशादिभ्यो विज्ञायते, न तु केवलमात्रच्व्यन्तरहितेभ्यो भृशादिभ्यः। च्विप्रत्ययश्च अभूततद्भावेऽर्थे विधीयते इति कृत्वा च्विप्रत्ययान्तरहितेभ्य अभूततद्भाव-विषयभूतेभ्यो भृशादिभ्यः क्यङि सति 'अभृशो भृशो भवति= भृशायते' इत्येवमादयः प्रयोगास्तु सुसिद्धा भवन्ति, परं 'क्व दिवा भृशा भवन्ति' इत्यादौ भृशशब्दस्य च्व्यन्तभिन्नत्वेऽपि अभूततद्भावार्थस्येहाऽविद्यमानत्वात् च्व्यन्तसदृशत्वं नास्ति, तस्मान्न भवत्यत्र क्यङ्।

ननु सत्यां ह्यस्यां परिभाषायां 'छे च' (अ० ६.१.७१) इति विहितस्य तुकश्चाभक्तपक्षे 'तिङ्ङतिङः' (अ० ८.१.२८) इत्यतिङः उत्तरस्य 'दधिच्छादयति' इत्यत्र तिङो विधीयमानो निघातो न स्यात्; तुकस्तिङ्भिन्नत्वेऽपि तिङ्सदृशरूपार्थस्याऽभावात्। निघातश्चेष्यते। एवं तर्हि तुक् पूर्वान्तः करिष्यते, ततश्च 'दधि' इत्येतस्मादुत्तरस्येष्टो निघातो भविष्यति, एवञ्च कृत्वा न कश्चिद् दोषो भवति।

'ओषधेश्च विभक्तावप्रथमायाम्' (अ० ६.३.१३१) इत्यत्र 'विभक्तौ' इत्येतत् परिभाषाया अनित्यताया ज्ञापकं नास्ति, किन्तु परिभाषया प्रतिष्ठापितस्य सिद्धभूतस्यार्थस्याऽनुवादमात्रमेव। नित्यत्वादेव चास्याः परिभाषायाः 'अकर्तरि च कारके संज्ञायाम्' (अ० ३.३.१९) इत्यत्र भाष्यकृता 'कारके' इत्येतस्य वैयर्थ्यं सम्पादितम्। 'अकर्तरि' इति कथनेनैव कर्तृभिन्नः तत्सदृशः 'कारक' इत्ययमर्थो ग्रहीष्यत इति तद्भावः।।६६।।

---

'उपपदमतिङ्' (अ० ३.२.१९) इत्यत्र हि अतिङ्ग्रहणस्यैतत् प्रयोजनं यत् तिङन्तोपपदस्य समासो मा भूदिति, परं तत्तु 'सुप्-सुपा' इत्यनुवृत्त्यैव न स्यात्। एवञ्च तिङन्तोपपदस्य समासस्य न चास्ति प्राप्तिः, अतो नार्थो निषेधेन। कृतन्तु ज्ञापयति एतत्- उपरिष्टात् 'सुपा' इत्येतदनुवर्तमानमपीह सूत्रे

नानुवर्तते (इह न सम्बध्यते) असत्यां च 'सुपा' इत्येतस्य अनुवृत्तौ हि अतिङ्-ग्रहणं सार्थकं भवति, इतरथा हि 'कारको व्रजति' 'हारको व्रजति' इत्यादौ तिङन्तस्य अपि उपपदस्य समासः स्यात्। एवञ्च एतस्य ज्ञापकसिद्धार्थस्यैव अनुवादभूता भवतीयं **ज्ञापकसिद्धा परिभाषा–**

## ६७. गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः॥ (म० भा० ४.१.४८)

गतेः[१] कारकस्य उपपदस्य[२] कृदन्तेन सह योऽयं समासो विधीयते स हि सुबुत्पत्तेः पूर्वमेव भवति। तदेवं 'कुम्भं करोति कुम्भकारः' इत्यादौ 'कुम्भ ङस् कृ अण्'[३] इत्येतस्यामवस्थायामेव 'उपपदमतिङ्' (अ० २.२.१९) इति समासे सति अतिङ्ग्रहणस्य स्वार्थे चरितार्थता जाता। अन्यत्र च ज्ञापकफलमिदं भवति–

**गतिविषये–** प्र+उपपदे स्थाधातोः 'आतश्चोपसर्गे' (अ० ३.३.१०६) इति अङ्प्रत्यये कृते 'आतो लोप इटि च' (अ० ६.४.६४) इत्याकारलोपे 'स्थ' इति निष्पन्ने सुबुत्पत्तेः प्रागेव 'कुगतिप्रादयः' (अ० २.२.१८) इति प्रशब्दस्य गतिसंज्ञकस्य स्थशब्देन सह समासे 'प्रष्ठ'[४] इत्ययं शब्दः सिध्यति। यदि तु सुबन्तेन सह समासः स्यात् तर्ह्यन्तरङ्गत्वात् पूर्वमेव टाप् स्यात्। ततश्चाऽदन्तत्वस्य सम्प्रति व्याघातात् 'पुंयोगादाख्यायाम्' (अ० ४.१.४८) इत्यदन्ताद्[५] विधीयमानो ङीष् न स्यात्, प्रष्ठीशब्दश्च न सिध्येत्। प्रतिष्ठते इति प्रष्ठः। प्रष्ठस्य स्त्री प्रष्ठी। तथा 'व्याघ्री' इत्यत्र 'जातेरस्त्रीविषया०' (अ० ४.१.६३) इति जातिलक्षणो ङीष् न स्याद्- एतस्मादेव हेतोः।

**कारकविषये–** 'वस्त्रेण क्रीता या सा वस्त्रक्रीती, अश्वक्रीती' इत्येवमादौ 'कर्तृकरणे कृता बहुलम्' (अ० २.१.३१) इति वस्त्र-अश्वादि शब्दानां 'क्रीत' इत्यनेनैव सह सुबुत्पत्तेः प्रागेव समासे जाते 'वस्त्रक्रीत, अश्वक्रीत' इत्येवमादिभ्यः 'क्रीतात् करणपूर्वात्' (अ० ४.१.५०) इति ङीष्

---

१. 'गतिश्च' (अ० १.४.५९) इत्येवमादिना प्रकरणेन यस्य गतिसंज्ञा क्रियते इति भावः।
२. 'तत्रोपपदं०' (अ० ३.१.९२) इति यस्योपपदसंज्ञा विधीयते इति।
३. अण्प्रत्यये आगते सति कुम्भशब्दात् 'कर्तृकर्मणोः कृति' (अ० २.३.६५) इति षष्ठी जाता।
४. 'प्रष्ठोऽग्रगामिनि' (अ० ८.३.९२) इति षत्वं भवति।
५. 'अजाद्यतष्टाप्' (अ० ४.१.४) इत्यतः सर्वत्र स्त्रीप्रकरणे 'अतः' इत्यनुवर्तते इति भावः।

प्रत्ययो भवति। सुबन्तेनैव समासे तु सुबपेक्षया लिङ्गविवक्षाया अन्तरङ्गत्वाद-कारान्तात् क्रीतशब्दात् समासविवक्षायामेव टाप् प्रसज्येत, ततश्च अकारान्तनिबन्धनो ङीष् प्रत्ययो न स्यात्, 'वस्त्रक्रीती' इत्येवमादयः प्रयोगाश्च नोपपन्नाः स्युः।

**उपपदविषये–** 'माषान् वप्तुं शीलं यस्याः सा माषवापिणी', व्रीहिवापिणी' इत्यादौ 'प्रातिपदिकान्तनुम्विभक्तिषु च' (अ॰ ८.४.११) इति प्रातिपदिकान्ते विद्यमानस्य नकारस्य णत्वं विधीयते तद् यदि सुबन्तानामेव समासः स्यात् तर्हि समासविवक्षायामेव पूर्ववत् सुबपेक्षया लिङ्गविवक्षाया अन्तरङ्गत्वात् नकारान्ताद् वापिन्–शब्दाद् 'ऋन्नेभ्यो ङीप्' (अ॰ ४.१.५) इति ङीपि सति समासः प्रसज्येत, ततश्च तस्य ङीबन्तस्य माषवापिनीसमुदायस्य 'कृत्तद्धितसमासाश्च' (अ॰ १.२.४६) इति प्रातिपदिकसंज्ञायां सत्यां प्रातिपदिकान्ते हि ईकारस्य विद्यमानत्वात् 'प्रातिपदिकान्त॰' (अ॰ ८.४.११) इत्युपर्युक्तसूत्रेण विधीयमानं णत्वन्न स्यात्। यदा तु कृदन्तेन वापिन्शब्देन सह समासो भवति तदा केवलस्य (ङीप्रहितस्य) 'माषवापिन्' इत्येतस्य नकारान्तस्य प्रातिपदिकसंज्ञायां सत्यां णत्वं भवति। एवञ्च प्रातिपदिकान्ते वर्तमानस्य नकारस्य णत्त्वं सिद्धं भवतीत्येवमाद्यनेकं प्रयोजनम्।

**इदमत्रावधेयम्–** यद्यपि परिभाषायां 'प्राक् सुबुत्पत्तेः' इति सामान्येनोक्तम्; पुनरपि गति–कारक–उपपदभूतानां सुबन्तानामसुबन्तैः सह समासो गृह्यते। अर्थात् उत्तरपदस्यैव सुबुत्पत्तेः प्राक् समासो भवतीत्युच्यते न तु पूर्वपदस्यापि। तेन 'चर्मक्रीती, चर्मकारी' इत्यादौ चर्मन्–शब्दस्य सुबन्तत्वात् पदनिबन्धनो नलोपः सिद्धो भवति। 'वैयाकरणः' इत्यत्र च पदान्ताद् यकारात् पूर्व ऐजागम इति।

न्यासकृता 'गतिकारकोपपदात् कृत्' (अ॰ ६.२.१३८) इत्यत्राऽस्याः परिभाषाया अर्थद्वयं निर्दिष्टम्– गतिकारकोपपदानां कृत्प्रत्ययान्तैः सहैव समासो भवति, स च सुबुत्पत्तेः पूर्वमिति प्रथमः। गतिकारकोपपदानाम् अविशेषेण समासो भवति, कृत्प्रत्ययान्तैस्सह तु सुबुत्पत्तेः पूर्वमिति द्वितीयः। द्वितीयेनार्थेन 'प्रपचतितराम्' इत्यत्राऽकृदन्तेनापि सह समासो भवतीति।

सांकूटिनम्, व्यावक्रोशी, इत्येवमादिकमपि 'गतिकारकोपपदानाम्॰' (परि॰ ६७) इत्येतस्याः परिभाषायाः प्रयोजनं तु भवति, परं 'कृद्ग्रहणे॰' (परि॰ २९) इत्येतस्या अपि साहाय्येनैव तत्प्रयोजनजातं भवति। न केवलया 'गतिकारकोपपदानाम्॰' न चापि कृद्ग्रहणपरिभाषया, अपि तु परिभाषाद्वयेनैव सिध्यति। 'गतिकारकोप॰' इति परिभाषया हि प्राक् सुबुत्पत्तेः समासे सति समासत्वेन च 'संकूटिन्' इत्येवमादिकात् प्रातिपदिकाद् अण्प्रत्यये सति इष्टं सिद्धं भवति। सम्सहितस्य तु इनुणन्तत्वं कृद्ग्रहणपरिभाषया प्रतिपाद्यते। इतरथा हि प्रत्ययग्रहणपरिभाषया संरहितस्यैव इनुणन्तता स्यात्। केवलया कृद्ग्रहणपरिभाषयाऽपि न सिध्यति। तत्परिभाषया हि इनुणन्तत्वमात्रमेव प्रतिपादयितुं शक्यते न तु प्रातिपदिकत्वमपि। कथम्? कृत्तद्धित॰ (अ॰ १.२. ४६) इति सूत्रे हि कृद्ग्रहणपरिभाषा नोपस्थिता भवति इति पुंयोगसूत्रभाष्ये स्पष्टमेवोक्तत्वात्। ततश्च कृद्ग्रहणपरिभाषाऽभावे हि 'कूटिन्' इत्येतन्मात्रस्यैव प्रातिपदिकसंज्ञा स्यात्। एतत् सर्वमालोच्यैव पुंयोगसूत्रे भाष्यकृतोक्तम्– "उभाभ्यां तु खलु सिध्यति"।।६७।।

---

'उगिदचां सर्वनामस्थानेऽधातोः' (अ॰ ७.१.७०) इत्युगितोऽङ्गस्य अञ्चेश्च नुम् विधीयते, धातोस्तु उगितः प्रतिषिध्यते। तेन 'उखास्रत्, पर्णध्वत्'[१] इत्येवमादौ उगिद्धातोर्नुमागमो न भवति। परम् अधातोः' इत्येतस्य यद्येतावन्मात्रमेव प्रयोजनं स्यात् तर्हि तत्तु सूत्रपठितस्य 'अञ्चु' इत्येतस्य नियमार्थकल्पनेनापि साधयितुं शक्यते। कथम्? सामान्येन ह्युगितोऽङ्गस्य नुम्विधानेनैव अञ्चुधातोरपि सेत्स्यति, तस्यापि ह्युगित्त्वात्। तत्पुनः क्रियमाणमस्य नियमार्थतामनुमापयति।[२] किं पुनरत्र नियमस्वरूपं भवति? धातोश्चेदुगितो नुम् स्यादञ्चेरेवेति। तदेवं सूत्रे 'अधातोः' इत्येतस्य ग्रहणं व्यर्थं जातम्; व्यर्थीभूय च तदिमां **परिभाषां ज्ञापयति–**

---

१. 'क्विबन्तो धातुत्वन्न जहाति' इति नियमेन क्विबन्तस्य धातुत्वमिति भावः।

२. 'सिद्धे सत्यारम्भो नियमाय भवति' इति नियमेनेति भावः।

## ६८. साम्प्रतिकाऽभावे भूतपूर्वगतिः॥ (म॰ भा॰ ६.४.३)

यः कश्चिद् पदार्थो वर्तमानकाले स्वस्याः प्रथमावस्थायाः पृथग् जातः; अर्थात् पूर्वस्मादर्थात् सम्प्रति ह्यन्योऽर्थो जातस्तदा तस्य पूर्वावस्थासम्बन्धेन यत् कार्यं प्राप्नोति स्म तदेव कार्यं वर्तमानकालेऽपि भवति। यथा– 'गोमन्तमिच्छति गोमत्यति, गोमत्यतेः क्विप्– गोमान्' इत्यत्र गोमत्प्रातिपदिकात् 'सुप आत्मनः क्यच्' (अ॰ ३.१.८) इति क्यचि 'सनाद्यन्ता धातवः' (अ॰ ३.१.३१) इति क्विपि तस्मिंश्च 'अतो लोपः' (अ॰ ६.४.४८), 'क्यस्य विभाषा' (अ॰ ६.४.५०) इत्यकारयकारयोर्लोपे क्विपः कृदन्तत्वात् प्रातिपदिकसंज्ञायां स्वाद्युत्पत्तौ 'गोमत्+सु' इति स्थिते यद्यपि सम्प्रति दृश्यमानो गोमत्–शब्दः 'क्विबन्तो धातुत्वं न जहाति' इति नियमेन धातुसंज्ञकोऽस्ति, तस्मात् 'उगिदचां सर्वना॰' (अ॰ ७.१.७०) इत्यधातोः प्रतिषेधेन नुमा न भवितव्यम्, तथापि पूर्वायाः प्रातिपदिकसंज्ञाया अनुस्मरणेन साम्प्रतिकाऽभावेऽपि प्रकृतपरिभाषया नुम् भवत्येव, अर्थाद् 'अधातोः' इति प्रतिषेधो न प्रवर्तते। तदेवमधातुग्रहणं धातुप्रतिषेधाय न कृतं, किन्तु यः सम्प्रति धातुरपि भूतपूर्वोऽधातुः तस्मादपि नुम् यथा स्यादित्येवं कृतमिति सार्थकं जातम्। यदि हि अञ्चुग्रहणं नियमाय प्रकल्प्य उगिद्धातोर्नुम्प्रतिषेधः क्रियेत तथा 'गोमान्' इत्युपर्युक्तम् उदाहरणन्न सिध्येत।

तथा च 'अचो यत्' (अ॰ ३.१.९७) इत्यत्राज्ग्रहणमप्यस्याः परिभाषाया ज्ञापकं भवति। कथम्? उच्यते– हलन्ता अजन्ताश्च इति द्विप्रकारा एव धातवः। तत्र हलन्ताद् 'ऋहलोर्ण्यत्' (अ॰ ३.१.१२४) इति ण्यतं वक्ष्यति। अतोऽन्तरेणाज्ग्रहणं धातुमात्राद् यद्विधाने सत्यपि पारिशेष्याद् अजन्तादेव धातोर्यत् स्यात्। एवमज्ग्रहणं विनापि सिद्धे पुनर् अज्ग्रहणं क्रियते तस्यैतदेव प्रयोजनं भूतपूर्वादप्यजन्ताद् यथा स्यादिति। तथा हि दित्स्यम् (दा+सन्+यत्) इत्यत्र सन्नन्ताद् दाधातोरार्धधातुके (कृत्यप्रत्यये) विवक्षिते 'अतो लोपः' (अ॰ ६.४.४८) इत्यार्धधातुकप्रत्ययोत्पत्तेः पूर्वमार्धधातुकविषये एव अतो लोपाद् दित्सधातुर्हलन्त सञ्जात इति ण्यत् स्यात्। पुनरज्ग्रहणसामर्थ्याद् वर्तमाने अजन्तत्वाभावेऽपि भूतपूर्वाजन्तत्वमाश्रित्य यद् भवति।

अथ चास्याः परिभाषाया अन्यत्रापि फलमिदं द्रष्टव्यम्– 'आत्मनः कुमारीमिच्छति– कुमारीयति, कुमारीयतेः कर्तरि क्विप्[१], कुमारी ब्राह्मणः,

---

१. 'कुमार+क्यच्+क्विप्' इति हि स्थितिः। 'कुमारीयतेः' इत्यत्र च श्तिप्निर्देशः।

तस्मै कुमार्यै[1] ब्राह्मणाय' इत्येवमादौ हि कुमारीशब्दः प्रथमावस्थायां स्त्रीलिङ्ग ईकारान्तश्चास्ति तदा 'यू स्त्र्याख्यौ नदी' (अ० १.४.३) इति स्त्र्याख्यत्वाद् नदीसंज्ञा सिद्धा, परं पश्चाद्धि कुमारीम् इच्छन् कश्चिद् ब्राह्मणः कुमारीशब्देनोच्यते, एवञ्चेह पुंल्लिङ्गार्थस्य उपसंक्रान्तत्वान्नदीसंज्ञा न प्राप्नोति। तत् प्रकृतपरिभाषया भूतपूर्वं स्त्रीत्वमर्थं संगृह्य नदीसंज्ञा प्रवृत्ता, तदाश्रयाणि च कार्याणि जातानीत्येवमाद्यनेकं प्रयोजनम्।

अथवा यथा देवदत्तेन हि विक्रीते स्वगृहेऽन्येन च केनचित् क्रीतेऽपि 'देवदत्तस्येदं गृहम्' इति वक्तारो भवन्ति- इति।।६८।।

---

'अन्यपदार्थप्रधानो बहुव्रीहिः' (म० भा० २.१.६) इति पूर्वाचार्याणां वचनेन बहुव्रीहिसमासेऽन्यस्य पदस्य योऽर्थस्तस्य प्राधान्यं भवति। समस्यमानपदापेक्षयेहाऽन्यत्वमुच्यते। अर्थाद् ययोर्येषां वा पदानां समासः क्रियते, तेभ्यः पृथग्भूतेन पदेनाऽभिधीयमानोऽर्थः 'अन्यपदार्थः' इति निगद्यते। यथा चित्रा गावो यस्य स चित्रगुः, शबला गावो यस्य स शबलगुरिति। इह हि चित्रगुणविशिष्टगोभ्योऽन्यः कश्चिदासां स्वामी चित्रगुशब्देनोच्यते। तदेवं 'सर्व आदिर्येषां तानि सर्वादीनि' इत्यत्रापि येषां शब्दानामादौ सर्वशब्दोऽस्ति तेषां तथाभूतानां सर्वव्यतिरिक्तानामेव 'सर्वादि' इत्यनेन शब्देन ग्रहणं प्राप्नोति, ततश्च सर्वशब्दस्य सर्वनामसंज्ञा न स्यात्, तस्माद् भवत्येषा **न्यायसिद्धा ज्ञापकसिद्धा वा परिभाषा–**

## ६९. भवति हि बहुव्रीहौ[2] तद्गुणसंविज्ञानमपि।।

(म० भा० १.१.२७)

बहुव्रीहिसमासो हि द्विप्रकारकोऽङ्गीक्रियते तद्गुणसंविज्ञानः[3],

---

१. ननु सत्यां हि भूतपूर्वगतिपरिभाषायां समाश्रीयमाणायां तद्विषयकं सर्वमिष्टं सिध्यत्येव, तत्पुनः किमर्थं 'कुमार्यै ब्राह्मणाय' इत्येवमादिप्रयोगसिध्यर्थं नदीसंज्ञाकरणाय 'प्रथमलिङ्गग्रहणञ्च' (भा० वा० १.४.३) इति वार्तिकं पठ्यते? सत्यम्; वार्तिकं ह्येकदेशि परिभाषा च सर्वदेशिनी इति कृत्वा परिभाषाया एव प्रपञ्चभूतं वार्तिकमस्तीति गृहाण।

२. 'हि' इति प्रसिद्धार्थे

३. स गुणः (विशेषणम् उपलक्षणम्) यस्य (अन्यपदार्थस्य) असौ तद्गुणः तस्य तद्गुणस्य (विशेषणसहितस्यान्यपदार्थस्य) संविज्ञानम् (संप्रत्ययः) तद्गुणसंविज्ञानम्।

अतद्गुणसंविज्ञानश्च। तद्शब्देन हि अत्र बहुव्रीहिः परामृश्यते। गुणशब्दश्च अत्र विशेषणवाची; समासघटकावयवः, वर्तिपदार्थपरकः, समासावयवभूतपदार्थपरकः, समस्यमानपदार्थपरक इति यावत्। बहुव्रीहिसमासे विशेषणभूतसमस्यमानपदानाम् अर्थस्याप्यन्यपदार्थेन सह संविज्ञानं (=ग्रहणम्) भवति।[१] 'अपि' शब्देन च नापि भवतीति कृत्वाऽतद्गुणसंविज्ञानोऽपि बहुव्रीहिरिति फलति। लोके तु यत्र समासावयवभूतपदानामर्थोऽन्यपदार्थेन सह समवायसम्बन्धेन सम्बद्धोऽस्ति तत्रैव तद्गुणसंविज्ञानोऽपि बहुव्रीहिरिति।

अन्यत्र च प्रायः 'अतद्गुणसंविज्ञानः' इत्येव भवति। यथा– 'लम्बकर्णः, तुङ्गनासिकः, दीर्घबाहुः, क्लृप्तकेशनखश्मश्रुः' इत्येवमादावन्यपदार्थस्य बोधः कर्णादिसहितस्य भवति। यत्र तु चित्रगुर् इत्यादावन्यपदार्थेन सह समस्यमानपदानामर्थस्य संयोगसम्बन्धमात्रं गृह्यते तत्र हि अतद्गुणसंविज्ञान इति।

शास्त्रे तु गणनिर्देशेषु तद्गुणसंविज्ञानो बहुव्रीहिर्भवति। यथा– सर्वादीनि, स्वरादीनि, प्रादय इत्यादि। तेन तत्र-तत्रादिभूतशब्दोऽपि अन्यैः शब्दैः सह परिगृहीतो भवति। गणनिर्देशादन्यत्र तु यथालक्ष्यं व्यवस्था क्रियते, यथा– 'आम्प्रत्ययवत्०' (अ० १.३.६३) इत्यत्र हि अतद्गुणसंविज्ञान इति।

'आढ्यसुभग........च्व्यर्थेष्वच्वौ कृञः करणे ख्युन्' (अ० ३.२.५६) इत्यत्राच्वाविति प्रतिषेधेन एतां ज्ञापयत्याचार्यः। तत्कथम्? 'च्व्यर्थेषु' इत्यत्र बहुव्रीहिः– च्वेरर्थो येषामुपपदानां तानि च्व्यर्थानि, तेषु च्व्यर्थेषु। यदि बहुव्रीहिरतद्गुण एव स्यात्, च्वेरर्थो येषां तेषूपपदेषु एव भविष्यति ख्युन्, न तु च्वौ। पुनः 'अच्वौ' इति किं निषेधेन? तत्करणेन तद्गुणसंविज्ञानमपि भवतीति ज्ञापितमिति दिक्॥६९॥

---

यदा 'उच्चैरुदात्तः' (अ० १.२.२९) इत्यादिषु सूत्रेषु उपरिष्टाद् 'अचः' (अ० १.२.२८) इति नानुवर्तते तदा यत्र हि समासस्यान्तोदात्तत्वं विधीयते तत्र 'ब्राह्मणसमित्, राजदृषद्' इत्येवमादिषु प्रयोगेषु योऽन्ते तकारोऽस्ति, विधानसामर्थ्यात् तस्यैव उदात्तः स्यात्, न च व्यञ्जनस्योदात्तत्वमिष्यते; तदेवंभूतान् संदेहान् निवर्तयितुं भवत्येषा **ज्ञापकसिद्धा परिभाषा–**

---

१. विशेष्यान्वयिनाऽन्वयित्वं भवतीत्याशयः।

## ७०. हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवद् भवति॥

(म० भा० ६.१.२१३)

हलः स्वरप्राप्तिः= हल्स्वरप्राप्तिस्तस्याम्। यत्र क्वचिद् व्यञ्जनस्य उदात्तादिस्वरः प्राप्नोति चेत् तद् व्यञ्जनम् अविद्यमानवद् भवति। तदनेन 'ब्राह्मणसमित्' इत्येवमादिषु प्रयोगेषु अन्त्यस्य तकारस्याऽविद्यमानवद्भावेन तस्मात् पूर्वा इकारादय उदात्ता भवन्ति।

'यतोऽनावः (अ० ६.१.२०७) इत्यत्र हि 'अनावः' इति प्रतिषेधश्च अस्याः परिभाषाया ज्ञापकम्। यत्प्रत्ययान्तस्य हि द्व्यचः प्रातिपदिकस्य तत्राऽऽद्युदात्तत्वं विधीयते, न चेद् नौशब्दात् परो यद् भवति।[1] परं यावता नौशब्दाद्धि यति सति 'नाव्यम्' इत्यत्र आदौ व्यञ्जनस्य भावात् स्वरस्य चाऽभावाद् आद्युदात्तत्वस्य प्राप्तिरेव नास्ति, तत् किम् 'अनावः' इति प्रतिषेधेन? कृतन्तु ज्ञापयति- हलः स्वरप्राप्तौ सत्यां तस्याविद्यमानवत्त्वं भवति। एवञ्चाऽसति 'अनावः' इति प्रतिषेधे आद्युदात्तत्वं स्यादेव। सम्प्रति तु तत्प्रतिषेधनाय तस्य ग्रहणं सार्थकं भवति।

अन्यत्र चापीदं फलं यत् क्वचिदनुदात्तादेरन्तोदात्ताच्च परः प्रत्ययो विधीयते, परस्य वा किमपि कार्यम् उच्यते तत् सर्वं व्यञ्जनादेर्व्यञ्जनान्ताच्चापि प्रकृतपरिभाषया व्यञ्जनस्याऽविद्यमानवद्भावाद् भवत्येव[2]। इतरथा हि तत्र तत्र तत्-तत्कार्यं न स्याद्।

यत्तु कदाचित् कश्चिदेवं मन्येत- उदात्तादयो गुणा व्यञ्जनानामेव सन्ति, तेषान्तु संयोगादचोऽपि तद्धर्माणो भवन्ति, तत्तु न भवितुमर्हति, अचमन्तरेण हि व्यञ्जनानाम् उच्चारणस्यैवाऽसम्भवात्; विनापि व्यञ्जनैश्च केवलानामचामुदात्तादिधर्माणां प्रसिद्धतरत्वात्, तस्मात् स्वातन्त्र्येणोदात्तादयो गुणा व्यञ्जनानान्न भवितुमर्हन्ति। तस्माच्चायमेव राद्धान्तो निष्कर्षरूपेण फलति यदच्संयोगेन व्यञ्जनान्यप्युदात्तादिगुणं प्रतिपद्यन्ते; यथा हि द्वयोः रक्तयोर्वस्त्रयोर्मध्यगतमेकं श्वेतं वस्त्रमपि किञ्चिद् रङ्गितमिव प्रतीयते इति।

---

१. अर्थाद् नौशब्दाद् यति विहिते 'नाव्यम्' इत्यत्र आद्युदात्तत्वन्न भवतीति भावः।

२. तद्यथा- 'अनुदात्तादेरञ्' (अ० ४.२.४३)- कापोतम्। 'अनुदात्तादेश्च' (४.३.१३८)- कापित्थम्। 'आद्युदात्तं द्व्यच्छन्दसि' (६.२.११८)- सुरथा।

तथा चोक्तं याज्ञवल्क्यशिक्षायाम्–

**स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च।**
**स्वरप्रधानं त्रैस्वर्यं व्यञ्जनं तेन सस्वरम्॥**
**मणिवद् व्यञ्जनान्याहुः सूत्रवत् स्वर इष्यते।**
**व्यञ्जनान्यनुवर्तन्ते यत्र तिष्ठति सस्वरः॥**
**उदात्तं नानुवर्तेत नीचं न स्वरितं तथा।**
**विस्वरं तं विजानीयाद् दीर्घह्रस्वविवर्जितम्॥**

(याज्ञवल्क्यशिक्षा, वर्णप्रकरणम् २९–३१)॥७०॥

'वामदेवाद् ड्यड्ड्यौ' (अ० ४.२.८) इत्येतस्मिन् सूत्रे 'ड्यत्–ड्य' इत्येतयोः प्रत्यययोर्डित्करणे एतत् प्रयोजनं यद् डिति 'टेः' (अ० ६.४.१४३) इति विधीयमानो लोपो यथा स्यात्, परं तद्धि 'वामदेव+यत्' इति स्थितौ 'यचि भम्' (अ० १.४.१८) इति भसंज्ञायां जातायां सत्यां 'यस्येति च' (अ० ६.४.१४८) इति लोपेनैव सिद्धम्, तदेवं डित्करणम् अत्र व्यर्थीभूय ज्ञापयतीदं **ज्ञापकसिद्धं परिभाषाद्वयम्–**

## ७१. अननुबन्धकग्रहणे न सानुबन्धकस्य ग्रहणम्॥
## ७२.[१] तदनुबन्धकग्रहणे नातदनुबन्धकस्य ग्रहणम्॥

(म० भा० ४.२.९)

कस्मिँश्चित् सूत्रे यदाऽनुबन्धरहितः प्रत्ययः पठितो भवति तदा स सानुबन्धकस्य प्रत्ययस्य बोधको न भवति।

अथ च यदा कश्चित् प्रत्ययो वाऽप्रत्ययो वा, एकेन वा द्वाभ्यां वा अनुबन्धाभ्यां सह संयुक्तः पठ्यते, तदा स तद्विशिष्टानुबन्धातिरिक्तस्याऽनुबन्धवतः प्रत्ययादेर्बोधको न भवति।

तदेवं सत्योर्ह्येतयोः परिभाषयोरिह शास्त्रे 'यत्–य' इत्येतयोः प्रत्यययोर्ग्रहणेन 'ड्यत्–ड्य' इत्येतयोर्ग्रहणं न भवति। तथा यद्–ग्रहणेन ण्यतः, अङ्–ग्रहणेन चङः, अच्–ग्रहणेन च णचो ग्रहणन्न भवति। यथा– 'ययतोश्चातदर्थे' (अ० ६.२.१५५) इति स्वरविधायकेन सूत्रेण नञः परयोः य–यत्– प्रत्ययान्तयोरन्तोदात्तः

---

१. स एवाऽनुबन्धो यस्य स तदनुबन्धकः। स चान्यश्चानुबन्धो यस्य सोऽतदनुबन्धकः।

स्वरो विधीयते, स हि ङ्यत्-ङ्यप्रत्ययान्तयोर्न भवति, यदि हि तत्राऽनयोरपि ग्रहणं स्यात् तर्हि 'अवामदेव्यम्' इत्यत्राप्यन्तोदात्तः स्वरः प्रसज्येत, पूर्वपदप्रकृतिस्वरश्चेष्यते। एवञ्च कृत्वा 'ङ्यत्-ङ्य' इत्येतयोर्ङित्करणं स्वार्थे चरितार्थं सत् सार्थकं भवति।

अथ चान्यत्रापि यथा- 'श्वयतेरः' (अ० ७.४.१८) इति श्विधातोरङ्प्रत्ययो विधीयमानोऽकारादेशश्चङि न भवति। 'यतोऽनावः' (अ० ६.१.२०७) इति यत्-प्रत्ययान्तस्य विधीयमानमाद्युदात्तत्वं ण्यत्प्रत्ययान्तस्य न भवति। 'चङि' (अ० ६.१.११) इति च विहितं द्वित्वम् अङि न भवति। 'पूरणगुणसुहितार्थसदव्ययतव्य०' (अ० २.२.११) इति सूत्रोक्तस्तव्यप्रत्ययान्तस्य षष्ठीसमासप्रतिषेधस्तव्यत्प्रत्ययान्तस्य न भवति।

इदञ्च परिभाषाद्वयं प्रत्ययाऽप्रत्ययसाधारणविषयम्, तेन 'दिव औत्' (अ० ७.१.८४) इत्यव्युत्पन्नस्य निरनुबन्धकस्य 'दिव्' प्रातिपदिकस्य विधीयमान औकारादेशः क्विबन्तस्य सानुबन्धकस्य दिवुधातोः 'अक्षदिव्' इत्यत्र सौ परतो न भवति।[1]

'औङ आपः' (अ० ७.१.१८) इति भाष्येण च विदितमिदं भवति- वर्णग्रहणे हि परिभाषाद्वयमपि न प्रवर्तते। तथा हि तत्रोक्तम्- 'अथवा वर्णग्रहणमिदं भवति, न चैतद् वर्णग्रहणेषु भवत्यननुबन्धकग्रहणे न सानुबन्धकस्येति।'[2]

'एकानुबन्धग्रहणे न द्व्यनुबन्धकस्य' इति केचित् पठन्ति,' तत्तु न भाष्यसम्मतः पाठ इति बोद्धव्यम्।।७१,७२।।

---

'णचः स्त्रियामञ्' (अ० ५.४.१४) इति णच्प्रत्ययान्तात् स्त्रियां स्वार्थेऽञ् प्रत्ययो विधीयते। 'कर्मव्यतीहारे णच् स्त्रियाम्' (अ० ३.३.४३) इति णच्प्रत्ययस्य स्त्रीलिङ्गे विधानात् तदन्ताद्धि स्वार्थे विधीयमानः सन् स्त्रियामेव भविष्यति, एष एव नाम न्यायो यत् स्वार्थिकाः प्रत्ययाः प्रकृतेर्लिङ्ग-वचनान्यनुवर्तेरन्, तत् पुनः किमत्र[3] 'स्त्रियाम्' इति ग्रहणेन? एवञ्च स्त्रीग्रहणं

१. अत्रापि परिभाषायाः सञ्चारितत्वादिति भावः।

२. 'औङ आपः' इति सूत्रे 'औकारो वर्ण एव निर्दिष्टो न प्रत्ययः, ङकारश्चासंदेहार्थो नानुबन्धार्थः- इति पक्षमाश्रित्य हि भाष्यकृता तत्र एतदुक्तम्।

३. 'णचः स्त्रियामञ्' इत्यत्र इति भावः।

व्यर्थीभूय **ज्ञापयत्येतां परिभाषाम्–**

**७३. क्वचित् स्वार्थिका अपि प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते।।** (म० भा० ५.३.६८)

प्रकृतितः= प्रकृतेः। षष्ठ्यर्थे तसिः। स्वार्थे भवाः स्वार्थिकाः। क्वचिद्धि स्वार्थिका अपि प्रत्ययाः प्रकृतेर्लिङ्गवचनानि नानुसरन्ति, परित्यजन्तीत्यर्थः। एवञ्च ज्ञापितेऽस्मिन्नर्थे 'णचः स्त्रियामञ्' (अ० ५.४.१४) इत्यत्र स्त्रीग्रहणं सार्थकं भवति, मा कदाचिद् अस्य अञन्तशब्दरूपस्याऽन्यस्मिन् लिङ्गे प्रयोगो भूदिति कृत्वाऽऽचार्यः स्त्रीग्रहणं करोति।

तथा चान्यत्रापि– 'अप्कल्पम्' इत्यत्र नियतस्त्रीलिङ्गबहुवचनान्ताद् अप्–शब्दात् 'ईषदसमाप्तौ कल्पब्०' (अ० ५.३.६७) इति कल्पप् प्रत्ययः स्वार्थे सन् स्वस्याः प्रकृतेर्लिङ्गवचनानि परित्यज्य नपुंसकलिङ्गैकवचने जातः। अथ च 'गुडकल्पा द्राक्षा, पयस्कल्पा यवागूः' इत्यादौ गुडशब्दात् पुंल्लिङ्गात् पयःशब्दाच्च नपुंसकलिङ्गात् कल्पप्प्रत्ययो स्त्रीलिङ्गे भवति।

क्वचिदिति वचनस्येदं प्रयोजनम्– 'बहुगुडो द्राक्षा, बहुपयो यवागूः' इत्येवमादिषु 'विभाषा सुपो०' (अ० ५.३.६८) इति स्वार्थिके बहुचि प्रत्यये सति प्रकृतेरेव लिङ्गवचनान्यवतिष्ठन्ते, पूर्ववदतिक्रमणं न भवतीत्यर्थः।।७३।।

---

'प्रतेरंश्वादयस्तत्पुरुषे' (अ० ६.२.१९२) इति तत्पुरुषसमासे प्रतेः परेषाम् अंश्वादीनामुत्तरपदान्तोदात्तत्वं विधीयते। राजन्शब्दोऽपि अंश्वादिगणे पठ्यते। तत्र प्रतिशब्दस्य राजन्शब्देन सह समासे 'राजाहःसखिभ्यष्टच्' (अ० ५.४.९१) इति समासान्ते टचि सति 'चितः' (अ० ६.१.१५७) इति अन्तोदात्तत्वं सिद्धमेव। तत् किम् पुना राजन्शब्दस्याऽन्तोदात्तार्थम् अंश्वादिगणपाठेन? तदेवमंश्वादिगणे राजन्शब्दस्य पाठो व्यर्थीभूय **ज्ञापयतीमां परिभाषाम्–**

**७४. विभाषा समासान्तो भवति।।** (म० भा० ६.२.१९७)

सर्वे समासान्ताः प्रत्यया विकल्पेन भवन्ति। एवञ्च पाक्षिके समासान्ते सति प्रतिपूर्वाद् राजन्शब्दाद् यस्मिन् पक्षे समासान्तष्टज् न भवति तदापि 'प्रतिराजा' इत्यत्रान्तोदात्तता यथा स्यादिति ह्यंश्वादिगणे राजन्शब्दस्य पाठो अर्थवान् भवति।

'द्वित्रिभ्यां पाद्दन्०' (अ० ६.२.१९६) इत्यत्रापि ह्ययमेवार्थो द्विर्बद्धं सुबद्धमिति न्यायेन दार्ढ्यार्थं पुनर्ज्ञाप्यते- तत्र हि बहुव्रीहिसमासे द्वित्रिपूर्वाद् मूर्द्धन्शब्दस्याऽन्तोदात्तत्वं विधीयते। अस्मिन् सूत्रेऽकृतसमासान्तस्य मूर्धन्शब्दस्य उपादानं लिङ्गम्। नित्ये हि समासान्ते यथा पाद् इति दद् इति च 'पादस्य लोपोऽहस्त्यादिभ्यः' (अ० ५.४.१३८) इति 'वयसि दन्तस्य दतृ' (अ० ५.४.१४१) इति कृतसमासान्तौ निर्दिष्टौ तथा मूर्धशब्दोऽपि 'द्वित्रिभ्यां ष मूर्ध्नः' (अ० ५.४.११५) इति कृतसमासान्तो निर्दिष्टः स्यात्। ततश्च मूर्धेष्विति निर्देशः स्यात्। तथा चाकृतसमासान्तनिर्देशः समासान्तविधेरनित्यत्वं ज्ञापयति। तेन द्विमूर्धा त्रिमूर्धा इत्यत्रापि अन्तोदात्तत्वं भवति।।७४।।

---

'शतानि, सहस्राणि' इत्यत्र हि सर्वनामस्थानसंज्ञके शिप्रत्यये परतः 'नपुंसकस्य झलचः' (अ० ७.१.७२) इत्यनेन नुमि सति 'शतन्+शि' इति जाते 'शतन्, सहस्रन्' इत्येवमादीनां शब्दानां नकारान्तत्वाद् यदि 'ष्णान्ता षट्' (अ० १.१.२३) इति षट्संज्ञा स्यात् तर्हि 'षड्भ्यो लुक्' (अ० ७.१.२२) इत्यनेन शेर्लुका भाव्यम् इति- एवंभूतां शंकाम् अपनोदयितुं पठतीमां **न्यायसिद्धां ज्ञापकसिद्धां वा परिभाषाम्-**

## ७५. सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य।।

(म० भा० १.१.३९)

सन्निपातो नाम सम्बन्धस्य (संश्लेषस्य, आनन्तर्यस्य) वाचकः। कस्यचिदाश्रयेण यो ह्यन्यस्य सम्बन्धो जायते स हि 'सन्निपात' इत्युच्यते। लक्षणशब्दश्च निमित्तपर्यायः। 'सन्निपातलक्षण' इति बहुव्रीहिपदम्। सन्निपातो लक्षणं= निमित्तं यस्य स तथा विधिः= विधायकं शास्त्रम्। 'तं (सन्निपातम्) विहन्तीति तद्विघातः' इत्यत्र हि 'कर्मण्यण्' (अ० ३.२.१) इति कर्मोपपदाद् हन्धातोरण्। अस्य च विशेष्यं 'विधेः' इत्यध्याहार्यम्। सन्निपातनिमित्तको विधिरेवंभूतस्य विधिशास्त्रस्य निमित्तं न भवति यद्धि तस्य सन्निपातस्य विघातकः= विघटकः स्यात्।

प्रकृते शंकास्थले हि 'शत+शि' इत्येतस्यामवस्थायां 'शि' इत्येतस्याश्रयेण शतशब्दस्य नुमि सति शतशब्दो नान्तो जातः; यदाश्रयेण च शतशब्दो नान्तत्वं

गुणं लब्धवान्, तस्यैवाऽनेन नान्तगुणेन षट्संज्ञया 'षड्भ्यो लुक्' (अ० ७.१.२२) इति विघातः क्रियते, तदेतन्न भवितुमर्हति। एवञ्च शेर्लुकोऽभावे सति 'शतानि, सहस्राणि' इत्येवमादयः प्रयोगाः सिध्यन्ति। तथा 'इयेष, उवोष' इत्येवमादौ लिटि तिपि णलि सति तदाश्रित्य 'इष्, उष्' इत्येतयोर्धात्वोर्लघूपधगुणे (अ० ७.३.८६) 'एष्, ओष्' इति जाते 'इजादेश्च गुरुमतोऽनृच्छः' (अ० ३.१.३६) इति सम्प्रति इजादेर्गुरुमत्त्वाद् आम् प्राप्तः। सति चामि 'आमः' इत्येतत् तस्यैव णलो विघातकः स्याद् यस्याश्रयेण 'इष्-उष्' इत्येतौ धातू गुरुमन्तौ अभूताम्, तस्मादत्र आम् न भवति- इत्येवमाद्यनेकं प्रयोजनम्।

'उपजीव्येन[1] सहोपजीवकस्य[2] विरोधोऽयुक्तः' इति लोकन्यायोऽस्याः परिभाषाया मूलम्। यः कश्चित् पुरुषो यस्य धनाढ्यस्य धनेन धनवान् जातः, स हि तेनैव धनेन तस्यैव धनिनो विघातं कुर्यादित्यत्यन्तम् अन्यायमेतत्। अर्थाद् यस्य संगेन सहायेन वा यत् किञ्चित् सामर्थ्यं लब्धम्, तेनैव सामर्थ्येन तदेव विहन्यादिति न जातु कदाचिदप्यनेन व्यवहारेण भाव्यम्। 'न तिसृचतसृ' (अ० ६.४.४) इति दीर्घप्रतिषेधवचनेन च एषा ज्ञापिता। 'तिसृ+नाम्', 'चतसृ+नाम्' इत्येतस्यामवस्थायाम् 'ऋन्नेभ्यो ङीप्' (अ० ४.१.५) इति ङीपि 'नामि' (अ० ६.४.३) इति दीर्घस्य प्राप्तिरेव नास्ति, अव्यवहिते नामि अभावात्। पुनः 'न तिसृचतसृ' (अ० ६.४.४) इति दीर्घप्रतिषेधो व्यर्थ एव। इह विभक्त्यानन्तर्य-निमित्तत्वेन 'तिसृचतसृ' इति ऋकारान्तौ आदेशौ अभवताम्- 'त्रिचतुरोः स्त्रियां तिसृचतसृ' (अ० ७.२.९९) इति। अर्थात् विभक्त्यानन्तर्यत्वेनैव ऋकारान्तत्वं सम्पन्नम्, तेनैव ऋकारान्तत्वेन 'ऋन्नेभ्यो ङीप्' इति ङीपि सति विभक्त्यानन्तर्यस्य विघातः सम्भवति, लौकिकन्यायमाश्रित्य तन्न युक्तमिति आचार्यः पश्यति। अर्थात् विभक्त्यानन्तर्यस्य विघाते (ङीप्प्रत्ययविधाने) ऋकारान्तत्वम् अनिमित्तं भवतीति। तस्य अनिमित्तत्वाद् ङीप् न स्यात्। तदसति अव्यवहिते नामि परतो यद् दीर्घत्वं प्राप्तम्, तस्य वारणाय 'न तिसृ०' इति निषेधः स्वार्थे चरितार्थ इति ज्ञेयः।

---

१. उपजीवितुम् (= आश्रयितुम्) योग्य इति उपजीव्यः।

२. उपजीवति (= आश्रयति) इति उपजीवकः।

'कष्टाय क्रमणे' (अ० ३.१.१४) इति निर्देशाच्चानित्येयम् तथा ह्यकारान्तसन्निपातेन 'ङेर्यः' (अ० ७.१.१३) इति 'य' इत्येतस्मिन्नादेशे विहिते, तदेव 'सुपि च' (अ० ७.३.१०२) इति दीर्घत्वस्य निमित्तं जातम्।।७५।।

---

'पञ्चेन्द्राण्यो देवता अस्य स पञ्चेन्द्रः स्थालीपाकः' इत्यत्र पञ्चेन्द्राणीशब्दात् 'सास्य देवता' (अ० ४.२.२३) इत्येतस्मिन्नर्थे विहितस्य अण्-प्रत्ययस्य (अ० ४.१.८६) 'द्विगोर्लुगनपत्ये' (अ० ४.१.८८) इति लुकि सति 'लुक् तद्धितलुकि' (अ० १.२.४९) इति 'ईकारस्य' स्त्रीप्रत्ययस्यापि लुग् भवति। तदत्र ङीप्सन्नियोगेनाऽऽगतस्य 'इन्द्रवरुणभव०' (अ० ४.१.४९) इत्यानुगागमस्य न हि केनचिल् लोपो विहित इति कृत्वा श्रवणमेव स्यात्, ततश्च 'पञ्चेन्द्रः' इत्येवमादयः प्रयोगा न सिध्येयुरिति भवत्येषा **ज्ञापकसिद्धा न्यायसिद्धा वा परिभाषा–**

## ७६. सन्नियोगशिष्टानामन्यतराऽभावे उभयोरप्यभावः।।

(म० भा० ६.४.१५३)

सन्नियोगशिष्टानामिति निर्धारणे षष्ठी। सन्नियोगेन शिष्टाः सन्नियोगशिष्टाः। 'सुप् सुपा' समासः। यावताऽन्यतरशब्दो हि द्वयोरेकमाह, तदत्र सन्नियोग-शिष्टानामपि बहुवचनं कथं जातम्? एकशेषेण इत्याह। सन्नियोगशिष्टौ च सन्नियोगशिष्टौ च सन्नियोगशिष्टौ चेति सन्नियोगशिष्टाः तेषां सन्नियोगशिष्टानाम्। यत्र क्वचिद् द्वयोः सहविधानमस्ति, तयोरेकापाये अपरस्याप्यपायो भवति। तद्यथा– क्वचिन्नियमः क्रियते यद् देवदत्तयज्ञदत्ताभ्यां सम्भूयेदं कार्यं कर्तव्यम्, तत् कदाचिद् देवदत्तो न स्याद् यज्ञदत्तोऽपि तस्मात् कार्यात् स्वयमेवाऽपैति तथेहापि इन्द्रशब्दात् स्त्रीत्वरूपं कार्यं ङीषानुग्भ्याम् उभाभ्यां संपाद्यते, यदा तु कदाचिद् ङीषपोऽभावो भवति तदाऽऽनुगपि स्वत एव निवृत्तो भवति। तथा– 'पञ्चाग्नाय्यो देवता अस्य स पञ्चाग्निः' इत्यत्रापि पूर्ववदेव स्त्रीप्रत्ययस्य लुकि सति 'वृषाकप्यग्निकुसित०' (अ० ४.१.३७) इति विहित ऐकारादेशोऽपि निवृत्तो भवति।

'बिल्वकादिभ्यश्छस्य लुक्' (अ० ६.४.१५३) इत्यस्मिन् सूत्रे

बिल्वकादिभ्यः परस्य छप्रत्ययस्य लुग्विधानं चास्या ज्ञापकम्। कथम्? 'बिल्वकादिभ्यो लुग्' इत्येतावदेव वक्तव्यम्। कुक्सहितस्य पाठसामर्थ्याद् अथ 'प्रत्ययस्य लुक्श्लुलुपः' (अ० १.१.६०) इति नियमेन प्रत्ययमात्रस्यैव लुग्विज्ञानाच्च छस्यैव लुग् भविष्यति, तत् किं 'छस्य' इत्युच्चार्य लुग्वचनेन? एवं मन्यते– 'नडादीनां कुक् च' (अ० ४.२.९०) इत्यत्र नडादौ परिपठितेभ्यो बिल्वादिभ्यश्छप्रत्ययेन सहैव कुग्–आगमस्य विधानात् 'बिल्वकादिभ्यो लुक्' (अ० ६.४.१५३) इतीयत्युच्यमाने प्रकृतपरिभाषाबलेन[1] छस्य लुका सह कुकोऽपि निवृत्तिः स्यात्; छस्यैव तु लुग् यथा स्यात् कुको निवृत्तिर्मा भूदिति 'बिल्वकादिभ्यश्छस्य लुग्' (अ० ६.४.१५३) इति न्यायेन कुक्सहितेभ्यो बिल्वकादिभ्यः परस्य छमात्रस्य लुगुच्यते। तदेवं सत्यां ह्यस्यां परिभाषायां 'छस्य' इत्येतदुच्चार्य लुग्वचनं सार्थकं भवति।।७६।।

---

स्वरूपग्रहण–परिभाषया[2] अण्प्रत्ययाश्रयणेनोच्यमानं कार्यं णप्रत्यये न भवति। एवञ्च 'अन्' (अ० ६.४.१६७) इत्यणि विधीयमानेन प्रकृतिभावेन णप्रत्यये परतो न प्रवर्त्तितव्यम्। तथा च सति कर्मन् शब्दात् ताच्छील्यार्थके णप्रत्यये[3] परतः 'नस्तद्धिते' (अ० ६.४.१४४) इति सामान्येनैव नान्तभसंज्ञकाङ्गस्य टिलोपस्य सिद्धत्वात् 'कार्मस्ताच्छील्ये' (अ० ६.४.१७२) इति किं टिलोपार्थेन निपातनकरणरूपक्लेशेन? तदेवं सूत्रम् इदं व्यर्थीभूय **ज्ञापयतीमां परिभाषाम्–**

## ७७. ताच्छीलिके णेऽण्कृतानि भवन्ति।।

(म० भा० ६.४.१७२)

तच्छीले भवस्ताच्छीलिकः। तदस्य शीलम् (अ० ४.४.६१) इत्येतस्मिन्नर्थे विहिते णप्रत्यये परतोऽप्यण्प्रत्ययाश्रितानि कार्याणि भवन्ति। तदनया परिभाषया हि 'अन्' (अ० ६.४.१६७) इत्यण्प्रत्यये परतोऽन्नन्तस्य भसंज्ञकस्य विधीयमानः प्रकृतिभावः कर्मन्शब्दात् 'छत्रादिभ्यो णः' (अ० ४.४.६२) इति ताच्छील्यार्थके

---

१. 'बिल्वकादिभ्यो लुक्' इति सिद्धे 'बिल्वकादिभ्यश्छस्य लुग्' इति वचनेन परिभाषेयमनुमीयते। असत्यां ह्यस्यां परिभाषायां स्पष्टमेव 'लुक्' इत्यनेन छमात्रस्यैव निवृत्तिः स्यात् न तु कुक इति। सत्यान्तु छस्य लुका सह कुकोऽपि निवृत्तिः स्यादेवेति भावः।

२. 'स्वं रूपं शब्दस्याशब्दसंज्ञा' (अ० १.१.६७) इति।

३. 'छत्रादिभ्यो णः' (अ० ४.४.६२) इति।

णप्रत्ययेऽपि प्राप्नोति, ततश्च टिलोपो न स्यात्। एवञ्च कृत्वा तदर्थं 'कार्मस्ताच्छील्ये' (अ० ६.४.१७२) इति सूत्रे टिलोपनिपातनं सार्थकं जातम्; परिभाषाया ह्येषा स्वार्थे चरितार्थताऽवगन्तव्या। अन्यत्र चेदं फलं यत् 'चुरा शीलं यस्याः सा चौरी, तपः शीलमस्याः सा तापसी' इत्येवमादिषु प्रयोगेषु ताच्छील्यार्थकाद् णप्रत्ययान्तात् 'टिड्ढाणञ्०' (अ० ४.१.१५) इति अणन्ताद् विहितो ङीप् जात इत्येवमाद्यनेकं प्रयोजनम्।।७७।।)

---

'हनस्तोऽचिण्णलोः' (अ० ७.३.३२) इति चिण्-णल्वर्जिते ञिति णिति प्रत्यये परतो हनस्तकारादेशो विधीयते तदनेन 'भ्रूणघ्नो भावः कर्म वा भ्रौणहत्यम्' इत्यत्र ष्यञि प्रत्यये उपर्युक्तसूत्रेणैव सिद्धेऽपि तकारादेशे 'दाण्डिनायनहास्तिनायनाथर्वणिक०' (अ० ६.४.१७४) इत्यस्मिन् सूत्रे तत्त्वनिपातनार्थं भ्रौणहत्यशब्दः किमर्थं पठ्यते? तदिदं व्यर्थीभूय प्रत्ययनिमित्तकं कार्यविशेषं व्यवस्थापयितुमिमां **ज्ञापकसिद्धां परिभाषामाह–**

## ७८. धातोः कार्यमुच्यमानं तत्प्रत्यये भवति।।

(म० भा० ७.२.११४)

सप्तम्यन्तपदेन यत्र प्रत्ययस्य निमित्तत्वमस्ति तत्र ह्यनियमप्रसङ्गे नियमकारिणीयं परिभाषा। धातोः कार्यमुच्यमानं तत्प्रत्यये=धातोर्विहिते प्रत्यये, धातुशब्दमुच्चार्य विहिते प्रत्यये परत एव भवतीत्यवगन्तव्यम्। अर्थात् कदाचित् किञ्चिच्छब्दरूपं धातुरपि[१] भवति प्रातिपदिकञ्च[१] तत्र प्रातिपदिकशब्दमुच्चार्य विहिते सुप्प्रत्यये तद्धितप्रत्यये वा परतो धातोर्विधीयमानं कार्यन्न भवति। तदत्र 'हनस्तोऽचिण्णलोः' (अ० ७.३.३२) इति हन्धातोर्विहितस्तकारादेशः 'भ्रौणहत्य' इत्यत्र भ्रूणहन्प्रातिपदिकाद् विहिते तद्धिते ष्यञि प्रत्यये न भवितुमर्हति स्म। तस्माद् 'भ्रौणहत्य' इत्यत्र तत्त्वनिपातनस्य सार्थक्यं जातम्। अन्यत्र चेदं फलम्- भ्रौणघ्नः इत्यत्र 'तस्येदम्' (अ० ४.३.१२०) इत्यर्थे विहितेऽणि प्रत्यये पूर्ववत् तकारादेशो न भवति। तथा 'कंसपरिमृड्भ्याम्' इत्यत्र प्रातिपदिकाद् विहितायां विभक्तौ परतो 'मृजेर्वृद्धिः' (अ० ७.२.११४) इति मृज्धातोः

---

१. क्विबन्तो धातुत्वं न जहातीति न्यायेन।

उच्यमाना वृद्धिर्न भवति। अथ च 'रज्जुसृड्भ्याम्, देवदृग्भ्याम्' इत्यादौ झलादावकिति विभक्तौ 'सृजिदृशोर्झल्यमकिति' (अ० ६.१.५७) इति सृज्–दृश्–इत्येतयोर्धात्वोर्विधीय- मानोऽमागमो न भवतीत्याद्यनेकं प्रयोजनम्।।७८।।

---

'सर्वके, विश्वके, उच्चकैः, नीचकैः' इत्यादौ 'सर्व–विश्व–उच्चैस्–नीचैस्' इत्येवमादिभ्यः शब्देभ्यः 'अव्ययसर्वनाम्नामकच्०' (अ० ५.३.७१) इत्यकच् विधीयते तदत्र शंकेयं समुत्पद्यते– अकच्सहितानां सर्वादीनां स्वरादीनाञ्च शब्दान्तरत्वात्[1] 'सर्वादीनि सर्वनामानि' (अ० १.१.२६) इति सर्वनामसंज्ञया 'स्वरादिनिपातम्०' (अ० १.१.३६) इत्यव्ययसंज्ञया न भाव्यम्। संज्ञामन्तरेण च तत्तत्संज्ञाश्रयाणि कार्याणि न स्युः, तस्माद् भवतीयं **ज्ञापकसिद्धा परिभाषा–**

**७९. तदेकदेशभूतस्तद्ग्रहणेन गृह्यते।।** (म० भा० १.१.७२)

इह व्याकरणशास्त्रे प्रयुक्ताः सर्व–इत्येवमादयः शब्दा न केवलमात्रं निजस्वरूपस्य बोधका भवन्ति, अपितु यस्तेषामेकदेशभूतः= अवयवभूतस्तस्यापि। एवञ्च प्रकृते सर्वादिशब्दानां मध्ये निपतितोऽकच् सर्वादिग्रहणेनैव गृहीतो भवति। तथा च सर्वनामसंज्ञायां जातायां 'सर्वक+जस्' इत्यत्र 'जसः शी' (अ० ७.१.१७) इति सर्वनामकार्ये निष्पन्ने 'सर्वके' इति सिद्धम्। 'उच्चकैः' इत्यत्र चाव्ययकार्यम् 'अव्ययादाप्सुपः' (अ० २.४.८२) इत्युच्चकैस्शब्दात् सोर्लुक् जातम्। तथा 'अहं पठामकि' इत्यत्र प्रकृतपरिभाषया ह्यकच्सहितस्य तिङन्तत्वात् 'तिङ्ङतिङः' (अ० ८.१.२८) इत्यतिङः उत्तरस्य तिङो निघातो जात इति।

'नेदमदसोरकोः' (अ० ७.१.११) इत्यकोरिति प्रतिषेधवचनञ्चास्या ज्ञापकम्। तथा हि ककारसहितस्य (=अकच्सहितस्य) इदम्–अदसोः शब्दान्तरत्वात् कः प्रसङ्गो यत् तत्रापि भिसः स्थाने ऐसादेशस्य प्रतिषेधः स्यात् यत् तत् प्रतिषेधार्थम् अकोरिति वचनीयं स्यात्। न चास्ति प्राप्तिः, अतो नार्थः प्रतिषेधेन[2]। कृतन्तु ज्ञापयति– तदेकदेशभूतस्तद्ग्रहणेन गृह्यते। ज्ञापितायान्तु

---

१. सर्वादिगणे हि 'सर्व–विश्व' इत्येवमादयः शब्दाः पठिताः सन्ति, स्वरादिगणे च 'उच्चैस्–नीचैस्' इत्यतोऽकच्सहितानां शब्दान्तरत्वमिति भावः।

२. 'नेदमदसोः' इत्यनेन लक्षणेनाऽकच्सहिते प्राप्तिर्नास्ति इति भावः। यदा च प्राप्तिरेव नास्ति तदा अकोरिति प्रतिषेधेनापि न किञ्चित् प्रयोजनमस्ति इति।

परिभाषायां 'प्राप्तौ सत्यां निषेधः' इति कृत्वा अकोरिति चरितार्थं भवति।

लोकेऽपि हीमं न्यायं पश्यामः- यथा गङ्गायां निपतितं जलं गङ्गाग्रहणेनैव गृह्यते। अथ च देवदत्तास्थो गर्भो देवदत्ताग्रहणेन गृह्यते इति॥७९॥

---

'गातिस्थाघुपा०' (अ० २.४.७७) इत्यत्र 'गाति' इति श्तिपा लुग्विकरणस्य निर्देशादादादिकस्य इण्-स्थानिकस्य 'गा' इत्येतस्यैव ग्रहणं न्याय्यम्, परम् 'पा' इत्येतस्मिन् भेदकहेतोरभावात् संदेहो जायते यत् 'पा पाने' (भ्वादि० ६५९) इति वा 'पा रक्षणे' (अदा० ४९) इति वा कतरद् ग्राह्यम्। सामान्येनोभयोरपि ग्रहणं स्याच्चेद् 'अपासीद् धनम्' इत्यत्राऽदादिकेऽपि सिज्लुक् प्रसज्येत तस्मादेवंभूतां शङ्कामपाकर्तुं भवत्येषा **ज्ञापकसिद्धा परिभाषा–**

## ८०. लुग्विकरणाऽलुग्विकरणयोरलुग्विकरणस्यैव ग्रहणम्॥

(म० भा० कैय्यटे-७.२.४४)

यत्र क्वचिद् एवंप्रकारकः संदेहः समुत्पद्येत यत् सूत्रोपात्तधातुना लुग्विकरणस्य[१] ग्रहणं कार्यम् अथवा अलुग्विकरणस्य[२] तत्रेयं व्यवस्थाऽवगन्तव्या- अलुग्विकरणस्यैव ग्रहणं भवतीति तदेवं 'गातिस्थाघुपा०' (अ० २.४.७७) इत्यस्मिन् सूत्रे 'पा पाने' इत्यलुग्विकरणस्य ग्रहणं भवति न तु 'पा रक्षणे' लुग्विकरणस्येति।

'स्वरतिसूतिसूयति०' (अ० ७.२.४४) इति सूत्रे 'सूङ्' इति पठनेनैवोभयोरपि 'सूति-सूयति' इत्येतयोर्ग्रहणे सिद्धे यत् 'सूति-सूयति' इति पृथक्शः पठति तज्ज्ञापयत्याचार्यः- 'लुग्विकरणालुग्विकरणयोः०'। कथम्? द्वावेव षूङौ स्तः- षूङ् प्राणिगर्भविमोचने (अदा० २४) इत्यादादिकः, षूङ्प्राणिप्रसवे (दिवा० २२) इति च दैवादिकः। न चापरः कश्चित् 'षूङ्' अस्ति। तदेवं 'षूङ्' इत्यनेनाऽनयोरेव ग्रहणं भविष्यति। पश्यति त्वाचार्यः- सामान्येन 'षूङ्' इति पठनेन अलुग्विकरणस्य सूयतेरेव ग्रहणं स्याद् लुग्विकरणस्य सूतेस्तु ग्रहणं न

---

१. यस्य सम्बन्धिनो विकरणस्य लुग् जायतेऽर्थाद् यो ह्यदादिगणस्य अस्तीति भावः।

२. यस्य विकरणस्य लुग् न भवति, योऽदादिगणस्य नास्ति, यस्य शबादिर्विकरणोऽस्तीति भावः।

स्यादिति पृथग्रूपेणोभयोरपि निर्देशः कृत इति[१]।।८०।।

---

'हेरचङि' (अ० ७.३.५६) इति चङ्वर्जिते प्रत्यये हिनोतेर्हकारस्य अभ्यासादुत्तरस्य कुत्वं विहितम्। तदत्र शंकेयमुत्थिता भवति- किमुच्यते 'अचङि' इति? 'णिश्रिद्रुस्रु०' (अ० ३.१.४८) इति चङ्प्रत्ययो हि णिजन्ताद् विधीयते, एवञ्च चङ्प्रत्यये परतो णिजन्तमेव हिनोतिरङ्गं भवति न तु केवलो हिनोतिः, तत्राऽभ्यासनिमित्ते प्रत्यये परतो हेरङ्गस्य कुत्वमित्येवंरूपे सूत्रार्थे विज्ञायमाने णिजन्तस्य हिनोतेः कुत्वस्य प्राप्तिरेव नास्ति, तत्किम् 'अचङि' इति प्रतिषेधेन? तदेव चङ्प्रतिषेधो व्यर्थीभूयेमां **परिभाषां ज्ञापयति–**

## ८१. प्रकृतिग्रहणे ण्यधिकस्यापि कुत्वं भवति।।

(म० भा० ७.३.५६)

कुत्वप्रकरणे यत्र मूलप्रकृतेर्ग्रहणं तत्र णिच्सहितस्यापि प्रकृतेर्ग्रहणं विज्ञेयम्। तदेवं ज्ञापिते ह्यस्मिन्नर्थे 'हेरचङि' (अ० ७.३.५६) इत्यस्मिन् सूत्रे 'हि' इत्यनेन 'हायि' इत्येतस्य ण्यन्तस्यापि ग्रहणं भवति। ततश्च 'हि+णिच्+चङ्+त्= अजीहयत्' इत्यत्राप्यभ्यासादुत्तरस्य हेः कुत्वं स्यादेव। एवं कुत्वं वारयितुं 'अचङि' इति प्रतिषेधो सार्थको भवति। अन्यत्र चेदं फलम्- प्रहाययितुमिच्छति= प्रजिघाययिषति इत्यत्र णिजन्ताद् 'हायि' इत्यस्मात् सनि प्रत्ययेऽभ्यासोत्तरस्य हकारस्य कुत्वं सिद्धं भवतीति।।८१।।

---

'ज्यादादीयसः' (अ० ६.४.१६०) इति 'ज्यायान्' इति शब्दसिद्ध्यर्थं 'ज्य' इत्येतस्मात् परस्य 'ईयस्' इत्येतस्य ईकारस्याऽऽकारादेशो विधीयते। परमेतत्तु अन्तरेणाप्याकारादेशविधानं सिध्यति। कथम्? 'बहोर्लोपो भू च

१. अत्र लुग्विकरणस्यैव ग्रहणमिति विपरीतोऽर्थो न ज्ञाप्यते। 'न ह्यनिष्टार्था शास्त्रप्रक्लृप्तिः युज्यते' इति। वेत्तेर्विभाषा' इत्यत्र वेत्तेरिति श्तिपा निर्देशाच्च। तस्य ह्येतद् प्रयोजनम्- लुग्विकरणपरिभाषया रौधादिकस्य 'विद विचारणे' इत्यस्य ग्रहणं मा भूदिति। यदि च लुग्विकरणस्यैव ग्रहणमिति स्यात् तदा विद इत्यपि कृते 'विद ज्ञाने' इत्यस्यैव ग्रहणं भविष्यति किं श्तिपा निर्देशेन। न च यङ्लुग्निवृत्त्यर्थमिति वाच्यम्। 'शीङोरुट्' इत्यत्र शीङोऽयङ्लुग्ग्रहणेन साहचर्याच्च यङ्लुग्ग्रहणाभावसिद्धेः।।

बहोः' (अ० ६.४.१५८) इत्येतस्मात् 'लोपः' इत्यनुवर्त्य 'ईयस्' इत्येतस्य ईकारस्य च लोपं विधाय 'अकृत्सार्वधातुकयो०' (अ० ७.४.२५) इति 'ज्य' इत्येतस्य पूर्वस्याऽकारस्य दीर्घत्वेन सिद्धम्। तदेवं सिद्धे सति यदाचार्य आकारादेशं विदधाति तज्ज्ञापयतीमां **ज्ञापकसिद्धां परिभाषाम्–**

## ८२. अङ्गवृत्ते पुनर्वृत्तावविधिः॥ (म० भा० ६.४.१६०)

अङ्गम्= अङ्गाधिकारः। वृत्तः= निष्पन्नः। अङ्गे वृत्तम् अङ्गवृत्तम्, सुप्सुपा समासः। वृत्तौ= प्रवृत्तौ सत्याम्। अविधिः= अविधानम्। अङ्गाधिकारे (अ० ६.४.१–७.४.९७) कस्मिँश्चित् कार्ये निष्पन्ने सति पुनरन्यस्याङ्गाधिकारीयस्य कार्यस्य प्राप्तौ सत्यां तन्न भवति।

तदेवम् असति 'ज्यादादीयसः' (अ० ६.४.१६०) इत्याकारादेशविधाने 'ज्यायान्' इति न सिध्येत्।[१] एवञ्चाकारादेशविधानं सार्थकं जातम्। तथाऽन्यत्रापि– 'आत्मनो मातरमिच्छति' इत्यत्र 'मातृ अम् क्यच्' इति स्थिते सुब्लुकि सति 'मातृ+क्यच्' इति क्यचि प्रत्यये 'रीङ् ऋतः' (अ० ७.४.२७) इति रीङादेशविधानं सार्थकं भवति। यदि हि 'रिङ्' इत्येव विदध्यात् ततो हि 'अकृत्सार्वधातु०' (अ० ७.४.२५) इति पुनर्दीर्घो न स्यात्, 'मात्रीयति' इति इष्टं रूपञ्च न सिध्येत्। तस्मादाचार्यः 'रीङ् ऋतः' (अ० ७.४.२७) इत्यत्र तु रीङादेशमेव विदधाति, 'रिङ्शयग्लिङ्क्षु' (अ० ७.४.२८) इत्युत्तरसूत्रे च पुना रिङ्ग्रहणं करोति। अथ च 'जानाति-जायते' इत्यादि सिद्ध्यर्थं 'ज्ञाजनोर्जा' (अ० ७.३.७९) इति दीर्घं 'जा' इत्यात्मकम् आदेशविधानमपि अस्यां परिभाषायां सत्यामेव चरितार्थं भवति। यदि हि इयं परिभाषा न स्यात् तर्हि ह्रस्वान्तं 'ज' इत्यादेशं विधाय 'अतो दीर्घो यञि' (अ० ७.३.१००) इति दीर्घत्वेनैवेष्टं सिद्धं स्यात्। तथा 'युष्मभ्यम्' इत्यत्र 'भ्यसो भ्यम्' (अ० ७.१.३०) भ्यमादेशे 'शेषे लोपः' (अ० ७.२.९०) इति युष्मद्शब्दस्याऽन्त्यस्य दकारस्य लोपे सति पुनः 'बहुवचने झल्येत्' (अ० ७.३.१०३) इत्येत्वन्न भवतीति दिक्॥८२॥

---

'परमात्मानं नमस्करोति, नमस्यति वा' इत्येवमादिषु प्रयोगेषु 'नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च' (अ० २.३.१६) इति नमःशब्देन योगे

---

१. लोपरूपे ह्येकस्मिन् कार्ये जातेऽन्यस्य दीर्घत्वस्याप्रवृत्तेरिति भावः।

विधीयमाना चतुर्थी कथन्न भवतीत्येतत् समाधातुं भवत्येषा **वाचनिकी परिभाषा**–

## ८३. उपपदविभक्तेः कारकविभक्तिर्बलीयसी।।

(म० भा० १.४.९५; कैय्यटे– २.३.१६)

सुगमम्। समीपोच्चारितं किञ्चित् पदमाश्रित्य विहिता विधीयमाना वा विभक्तिरुपपदविभक्तिरित्युच्यते। यत्र तु क्रियाकारकसम्बन्धमाश्रित्य कर्मादिषु कारकेषु सत्सु विभक्तेर्व्यवस्था क्रियते सा हि कारकविभक्ति–शब्देनोच्यते। तदेवं 'परमात्मने नमः, गुरवे नमः' इत्येवमादिषु प्रयोगेषु उपर्युक्तसूत्रेणोपपद–विभक्तिर्भवति। परं 'परमात्मानं नमस्करोति' इत्येवमादिषु 'कर्तुरीप्सिततमं कर्म' (अ० १.४.४९) इति करोतिक्रियया ईप्सिततमस्य कर्मसंज्ञयोपपदविभक्तेः बाधितत्वात् 'कर्मणि द्वितीया' (अ० २.३.२) इति द्वितीयैव जाता। अथ 'कुतोऽध्यागच्छति, कुतः पर्यागच्छति' इत्यादौ 'अधिपरी अनर्थकौ' (अ० १.४.९२) इति 'अधिपरि–इत्येतयोः कर्मप्रवचनीयसंज्ञायां सत्यामपि 'कुतः' इति किम्शब्दाद् 'अपादाने पञ्चमी' (अ० २.३.२८) इति पञ्चम्येव भवति न तु कर्मप्रवचनीयाश्रया द्वितीया। तथा 'गवां स्वामी, गोषु स्वामी' इत्येवमादौ 'स्वामीश्वराधिपति०' (अ० २.३.३९) इत्युपपदविभक्ती षष्ठीसप्तम्यौ भवतः। परं 'गाः स्वामी व्रजति' इति विवक्षायां व्रजति क्रियया गवामीप्सिततमत्वात् कर्मसंज्ञत्वात् पूर्ववद् उपपदविभक्तिं बाधित्वा द्वितीयैव जातेत्याद्यनेकं प्रयोजनम्।।८३।।

---

'मिमार्जिषति' इत्यत्र 'मृज्+इट् सन्+तिप्' इति स्थिते 'मृजेर्वृद्धिः' (अ० ७.२.११४) इति परनिमित्तिकां बहिरङ्गां वृद्धिं बाधित्वा अपरनिमित्तके अन्तरङ्गे द्वित्वे सति परत्वाद् 'उरत्' (अ० ७.४.६६), 'सन्यतः' (अ० ७.४.७९) इत्येवमादिषु अभ्यासकार्येषु सत्सु 'मिमृज्+इट्सन्+ति' इति जाते 'पुनःप्रसङ्गविज्ञानात्०' (परि० ४०) मृजेर्वृद्धिरिति वृद्धौ कर्तव्यायाम् इकार–ऋकारयोरुभयोरपि वृद्धिः प्राप्नोति; एवञ्चाभ्यासेकारस्य प्रवृत्ताया वृद्धेर्ह्रस्वापवादत्वात् 'सकृल्लक्ष्ये लक्षणं प्रवर्तते' इति न्यायेन वा पुनर्ह्रस्वो न स्यात् ततश्च 'मिमार्जिषति' इत्येवमादयः प्रयोगा न सिध्येयुरिति भवत्येषा **वाचनिकी परिभाषा**–

# ८४. अनन्त्यविकारेऽन्त्यसदेशस्य कार्यं भवति॥

(म० भा० ६.१.१३)

अन्ते भवम् अन्त्यम्। न अन्त्यम्= अनन्त्यम्। विकारः= आदेशः। यत्र क्वचिच्छास्त्रेऽनन्त्यस्य आदेशो विधीयते तदा स आदेशोऽन्त्यस्य सदेशस्य (= समीपस्थस्य, अव्यवहितपूर्ववर्ति-अनन्त्यस्य) स्थाने एव भवति। समानो देशोऽस्येति सदेशः, निपातनात् समानस्य सभावः। दिशिरुच्चारणक्रियः। यस्याविरलरूपेणोच्चारणमस्ति स 'सदेश' इत्युच्यते। यदा ह्येकस्मिन्नेव प्रयोगेऽन्त्यसदेशस्य[1] अनन्त्यसदेशस्य च युगपत् कार्यं (आदेशः) प्राप्नोति तदाऽन्त्यसदेशस्यैव भवतीति फलितार्थः।

तदनया परिभाषया 'मिमार्जिषति' इत्यादावभ्यासस्य वृद्धिः अन्त्यसदेशस्य अभावान्न भवति, ऋकार एव तु अन्त्यसदेशोऽस्तीति कृत्वा तस्यैव स्थाने भवति। तथा 'अदोऽञ्चति अदमुयङ्' इत्यत्र क्विन्[2]-प्रत्ययान्तेऽञ्चतौ धातौ परतः 'विष्वग्देवयोश्च टेरद्र्यञ्चतौ'० (अ० ६.३.९१) इति सर्वनाम्नोऽदस्शब्दस्य टेः 'अद्रि'-इत्येतस्मिन्नादेशे सति 'अदद्रि अञ्च्' इति स्थिते 'इको यणचि' (अ० ६.१.७४) इति यणादेशे 'अदद्र्यङ्' इति जाते 'अदसोऽसेर्दादु दो मः' (अ० ८.२.८०) इति विहिते उत्वमत्वे उभाभ्यामपि दकाराभ्यामुत्तरस्य दकारयोश्च स्याताम्, ततश्च 'अदमुयङ्' इति रूपन्न सिध्येत्- 'अमुमुयङ्' इत्येव तु स्यात्। तदत्र प्रकृतपरिभाषया- ऽन्त्यसदेशस्य 'द्र्' इत्येतस्य मुत्वं जातम्- इत्येवमाद्यनेकं प्रयोजनम्।

'लिङ्गवती परिभाषा भवति' इत्यन्वेषणप्रक्रियया परिभाषावाक्ये पठितम् 'अनन्त्यविकारे' इति पदम् अस्याः परिभाषाया लिङ्गमस्ति। अर्थाद् यत्रानन्त्यविकारप्रसङ्ग उपतिष्ठते तत्रैव 'अन्त्यसदेशस्य इत्यप्युपतिष्ठते॥८४॥

---

'देहि, धेहि' इत्येवमादिषु प्रयोगेषु 'दा दा+हि' इत्येतस्याम् अवस्थायां 'घ्वसोरेद्धावभ्यास०' (अ० ६.४.११९) इति विधीयमानोऽभ्यासलोपः 'अलोऽन्त्यस्य' (अ० १.१.५१) इति नियमेनाऽन्त्यस्य प्राप्नोति, तथा च 'देहि'

---

१. अन्त्येन समानो देशो यस्य, तस्य।

२. 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चाञ्च' (अ० ३.२.५९)।

इत्येवमादयः प्रयोगा न सिध्येयुरित्यतो भवतीयं **ज्ञापकसिद्धा परिभाषा–**

## ८५. नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे॥

(म० भा० १.१.६५)

षष्ठीनिर्दिष्टस्य विधीयमान आदेशोऽनर्थकशब्दरूपे व्याप्रियते चेदलोऽन्त्यपरिभाषा न प्रवर्तते, परम् अभ्यासविकारे= अभ्यासस्य आदेशविधानप्रकरणे (अ० ७.४.५९-७.४.९७) तु अनर्थकाऽभ्यासस्यापि अलोऽन्त्यकार्यं भवत्येव। यथा– 'बिभर्ति' इत्यत्र 'भृञामित्' (अ० ७.४.७६) इति विहितमित्त्वम् अभ्यासस्याऽन्त्यस्याऽलः स्थाने जातम्। परं परिभाषायाः पातनिकायामुपस्थापिते 'देहि' इति शंकास्थले तु अभ्यासविकारप्रकरणीयस्य कार्यस्याऽभावाद् द्विर्वचनभूतसमुदायस्यैव सार्थकत्वात् तदवयवस्याऽ-भ्यासस्यानर्थकत्वात् प्रकृतपरिभाषया निवारितेऽलोऽन्त्यनियमे सर्वस्याप्यभ्यासस्य लोपो भवति। तथा 'अव्यक्तानुकरणस्यात इतौ' (अ० ६.१.९५) इति विधीयमानम् अत्-भागस्य पररूपमनयैव परिभाषयाऽन्त्यस्यालः स्थाने न भवति, अपि तु 'घटत्+इति= घटिति, पटिति' इत्येवं सर्वस्यैव अत्+शब्दस्य भवतीति बोद्धव्यम् 'नाम्रेडितस्यान्त्यस्य तु वा' (अ० ६.१.९६) इत्यत्र 'आम्रेडितस्य वा' इत्येव न्यासेन सिद्धे एतावत् सूत्रकरणमस्या ज्ञापकम्। तच्चैवम्–

'अव्यक्तानुकरणस्यात इतौ' (अ० ६.१.९५) इत्यनेन इतौ परतो यद् अदन्तस्य अव्यक्तानुकरणस्य पररूपं शास्ति, तद् अलोऽन्त्यविधिना अन्त्यस्यैव स्यात्। एवं च 'पटत्पटदिति, पटत्पटेति' इति रूपद्वयसिद्ध्यर्थं 'नाम्रेडितस्या०' इति सूत्रम् आरभ्यते। एतच्च 'आम्रेडितस्य वा' इत्येव न्यासेन सिद्धं भवति। अत्र हि आम्रेडितेषु इतौ परतः अन्त्यस्य विकल्पेन पररूपविधानात्, प्रवृत्तिपक्षे-पटत्पटेति, निवृत्तिपक्षे च– 'पटत्पटदिति इति इष्टं रूपद्वयं सिध्यति। तथापि तत्किमर्थं 'नाम्रेडितस्या०' इति एतावत्सूत्रन्यासं कुर्वन् आम्रेडितेषु 'अव्यक्तानुकरणस्यात' इति प्राप्तम् अद् इत्यस्य पररूपत्वं निषेध्य पुनः अन्त्यस्य विकल्पेन पररूपत्वं शास्ति। तदिदं महत्तरं यत्नम् आचार्यस्य अभिप्रायं द्योतयति यद् 'अव्यक्तानुकरणस्यात- इति सूत्रोक्तं पररूपत्वम् वस्तुतः अन्त्यस्य (तकारस्य) न भवति अपितु सर्वस्य अत्-समुदायस्य इति। अयमेव ज्ञापकः सामान्यापेक्षत्वेन गृह्यमाणः अन्येष्वपि अनर्थकेषु अलोऽन्त्यविधेः अभावं ज्ञापयति।

अथ च यद् 'अनभ्यासविकारे' इत्युच्यते, तद् 'अर्तिपिपर्त्योश्च' (अ० ७.४.७७) इति पिपर्त्तिग्रहणेन ज्ञाप्यते। पृग्रहणेनैव सिद्धे शितप्निर्देशोऽत्र अनर्थको भवति। नायं शितप्निर्देशः यङ्लुग्निवृत्त्यर्थः, प्रकृते 'श्लौ' इत्यनुवर्तमानेऽत्र यङ्लुक एवाभावात्। न च जुहोत्यादिभिन्नस्य व्यावर्तनाय अयं निर्देशः। अत्रापि 'श्लौ' इत्यनुवर्तमाने अन्यस्य गणस्य ग्रहणाऽसम्भवात्। अतः ज्ञायते यद् आचार्यः शितप्निर्देशेन किमपि विशिष्टं द्योतयितुमिच्छति। तत्किम्? तच्चेदं यद् अभ्यासे विधीयमानम् इत्त्वादिकम् अन्त्यस्य भवति न सर्वस्येति ॥८५॥

---

'पुमान् स्त्रिया' (अ० १.२.६७) इति स्त्रिया सहवचने पुमान् शिष्यते स्त्री निवर्तते, स्त्रीपुंसलक्षणश्चेदेव विशेषो भवतीति कृत्वा यथा 'ब्राह्मणश्च ब्राह्मणी च ब्राह्मणौ, वत्सश्च वत्सा च वत्सौ' इत्येवमादावेकशेषो भवति तथा 'ब्राह्मणवत्सा च ब्राह्मणीवत्सश्च' इत्येवमादावपि प्राप्नोति, तथा च सति 'ब्राह्मणवत्सौ' इत्यनिष्टः प्रयोगः स्यादित्येवंभूताम् आपत्तिं वारयितुं भवत्येषा **न्यायसिद्धा परिभाषा–**

## ८६. प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः॥

यत्र क्वचित् प्रधानेऽप्रधाने चोभयत्रापि किञ्चित् कार्यं प्राप्नोति तत्र प्रधाने एव तत्कार्यं भवति न तु अप्रधाने। तदेवं ब्राह्मणवत्सा च ब्राह्मणीवत्सश्च' इत्यत्राऽप्रधानस्त्रीपुंसकृतस्य विशेषस्यापि विद्यमानत्वान्न भवत्येकशेषः। स्त्रीपुंसयोः सहविवक्षायामेकशेषः, स च प्रधानयोरेव भवतीति यत्र 'ब्राह्मणश्च ब्राह्मणी च' इत्यादौ प्रधानस्त्रीपुंसकृत एव विशेष उपलभ्यते, तत्रैव एकशेषो भवति। इह शंकारूपेणोपस्थापिते उदाहरणे तु पूर्वपदस्थौ ब्राह्मण- ब्राह्मणीशब्दावप्रधानभूतौ स्तः। एवञ्चोत्तरपदस्थाभ्यां प्रधानभूताभ्यां वत्स-वत्साशब्दाभ्यां सह तयोरप्रधानभूतयोरपि विद्यमानत्वान्न भवन्ति एवंभूताः शब्दा एकशेषविधायिनः प्रकृतसूत्रस्य विषया इति।

लौकिकेष्वपि व्यवहारेषु न्यायोऽयमनुस्रियते। तद्यथा– राज्ञा सह बहवो जना गन्तारो भवन्ति, पुनरपि को गच्छतीति पृष्टे 'राजा' इत्येवोत्तीर्यते। अथ च बहुभिः शिष्यैः सार्द्धं केनचिन्महत्त्वशालिना संन्यासिना गुरुकुलं समागते सति 'अमुकस्वामी आगतः' इत्येव गुरुकुलीयाश्छात्राः व्यतिजल्पितारो भवन्ति॥८६॥

---

स्वस्रादिगणे (अ० ४.१.१०) हि मातृशब्दः पठ्यते, तस्माच्च स्त्रियां ङीप् निषिध्यते। मातृशब्दश्च द्विविधः- जननीवचनः परिच्छेत्तृवचनश्च। तत्रोभाभ्यामपि ङीप् प्रतिषिध्यतेऽथवैकस्मादेवेत्येवमादीन् संदेहान् निवर्तयितुं भवत्येषा **न्यायसिद्धा परिभाषा–**

## ८७. अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी॥

शब्दस्य घटकावयवेन प्रकृति–प्रत्ययादिविभागेन योऽर्थः प्राप्यते तदपेक्षया प्रकृतिप्रत्ययादिविभागरहितेन शब्दसमुदायेन गृह्यमाणेऽर्थे प्रसृततरा गतिर्भवति। एवञ्च प्रकृते ङीप्निषेधे शुद्धरूढस्य (यस्मिन् योगः= अवयवार्थः सम्बन्धः किमपि नास्ति तथाभूतस्य) जननीवाचकस्य मातृशब्दस्यैव ग्रहणं भवति, न तु परिच्छेत्तृवाचकस्य (यस्मिन्नवयवार्थः कल्पयितुं शक्यते)। तदत्र परिच्छेत्तृवाचकाद् मातृशब्दात् स्त्रियां ङीपि सति 'मात्री, मात्र्यौ, मात्र्यः' इत्येवमादयः प्रयोगा भवन्ति, पुंसि तु 'माता, मातारौ, मातारः' इति।

अव्युत्पत्तिलभ्यार्थो हि व्युत्पत्तिलभ्यापेक्षया शीर्घं बुद्धावुपतिष्ठते इति कृत्वा न्यायसिद्धः सहजभूतोऽर्थ एव प्राप्यतेऽनया परिभाषया। एतन्न्यायमेव चाधिकृत्य 'रूढिर्योगापहारिणी' इत्युक्तिः प्रचलिताऽस्ति।[१] अथ च–

**अभिव्यक्तपदार्था ये स्वतन्त्रता लोकविश्रुताः।**
**शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिषु॥** इति

तथा मीमांसाप्रोक्तेन रथकाराधिकरणन्यायेन[२] चापि प्रकृतपरिभाषाया एवार्थोऽनूद्यते। 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां पारदौर्बल्यम् अर्थविप्रकर्षात्' (मीमांसा० ३.३.१४) इत्यत्रापि समाख्याया[३] अपेक्षया श्रुतेर्बलवत्ताकथनेनाऽयमर्थो समर्थ्यते इति॥८७॥

---

'अचि विभाषा' (अ० ८.२.२१) इति गॄधातोरजादौ प्रत्यये रेफस्य विभाषा लत्वं विधीयते। तत्र सामान्येन 'गरः, गलः' इति शब्दद्वयं सिध्यति। परमनयोरुभयोरपि शब्दयोर्यद्येकमेवाभिधेयं स्यात् तर्ह्यनिष्टमापद्येत। गरशब्देन

१. 'रूढिर्योगाद् बलीयसी' इत्यपि न्यायः। २. मीमांसा० (६.१.४५-४६)।
३. यौगिकसंज्ञाया इति भावः।

हि 'विषम्' इत्येव गृह्यते, 'गल' इत्यनेन च कण्ठ एव। तदेतत् कथं भवतीति समाधातुं भवत्येषा **वाचनिकी परिभाषा–**

## ८८. व्यवस्थित विभाषयाऽपि कार्याणि क्रियन्ते॥

(म० भा० ३.२.१२४; ७.४.४१)

शास्त्रे व्यवस्थितविकल्पेनापि कार्याणि क्रियन्ते। लक्ष्यानुरोधाच्चेयं व्यवस्थाऽनुस्रियते।[१] अर्थाद् यस्य कार्यस्य विकल्प उच्यते तद्धि कस्मिँश्चिन्नियतार्थवाचके शिष्टप्रयुक्ते शब्दे नित्यमेव प्रवर्ततेऽन्यस्मिंस्तु न जातु कदाचित् प्रवर्तत इति। यत्र तु सर्वस्मिन्नभिधेये प्रयोगद्वयं भवति सा हि 'विभाषा' इति वा 'अव्यवस्थितविभाषा' इति वा मन्तव्या। तदेवं कण्ठाऽभिधेये गलशब्दाभिधाने नित्यमेव लत्वं जातम्, विषाभिधेये च सर्वथैव न जातम्, अथ क्रियापदे (निगरणमित्यर्थे) तु उभयं 'गरः–गलः' इति। 'शाच्छोरन्यतरस्याम्' (अ० ७.४.४१) इति सूत्रभाष्येऽस्या उदाहरणानि निदर्शितानि–

**देवत्रातो गलो ग्राह इतियोगे च सद्विधिः।**
**मिथस्ते न विभाष्यन्ते गवाक्षः संशितव्रतः॥**

'देव एनं त्रायात् देवत्रात इति संज्ञाभूते त्रातशब्दे 'क्तिच्क्तौ च संज्ञायाम्' (अ० ३.३.१७४) इति त्राधातोः क्तप्रत्यये 'नुदविदोन्दत्राघ्रा०' (अ० ८.२.५६) इति विधीयमानो निष्ठातकारस्य नकारादेशो नित्यमेव न भवति; क्रियावाचके तु 'त्राणम्, त्रातम्' इत्युभयं भवति। गलशब्दस्तु परिभाषायाः पातनिकायां व्याख्यात एव।

**ग्राहः–** 'विभाषा ग्रहः' (अ० ३.१.१४३) इति ग्रहधातोर्णप्रत्यये मकराभिधाने नित्यं 'ग्राहः' इत्येव भवति। यदा तु नक्षत्रादिज्योतिर्विवक्षितं भवति तदा सर्वथैव ण-प्रत्ययो न भवति; 'नन्दिग्रहिपचादिभ्यः०' (अ० ३.१.१३४) इत्यजेव तु भवति– 'ग्रहः' इति।

**इतियोगे–** 'लक्षणहेत्वोः क्रियायाः' (अ० ३.२.१२६) इति क्रियायाः, लक्षणे हेतौ च वर्तमानाद् धातोर्लटः स्थाने सत्संज्ञकौ शतृशानचौ विकल्पेन विधीयेते, परं व्यवस्थितविभाषाविज्ञानात् 'इति' शब्दयोगे स विधिः सर्वथैव

---

१. अभिधेयनियमरूपा व्यवस्था इति भावः।

न भवति– हन्तीति पलायते, वर्षतीति धावति। अथवा 'लटः शतृशानचावप्रथमा०' (अ० ३.२.१२४) इति विहितौ शतृशानचौ तत्सूत्रे 'नन्वोर्विभाषा' (अ० ३.२.१२१) इत्यतो 'विभाषा' इत्यनुवर्तनात् तस्य च प्रथमासमानाधिकरणे व्यवस्थितविभाषाविज्ञानात् नित्यमेव न भवतः।

**गवाक्षः–** 'गो+अक्ष' इति स्थिते 'अवङ् स्फोटायनस्य' (अ० ६.१.११९) इत्यवङादेशो विकल्पेन विधीयते स हि वातायनाभिधाने नित्यमेव प्रवर्तते, न कदाचिद् 'गोऽक्षम्' इति भवति। वातायनादन्यत्र गोर्नेत्राभिधाने तु 'गवाक्षम्, गो अक्षम्, गोऽक्षम्'[१] इति प्रयोगत्रयं जायते।

**संशितव्रतः–** 'शाच्छोरन्यतरस्याम्' (अ० ७.४.४१) इति तकारादौ किति प्रत्यये शोधातोर्विधीयमान इकारादेशः 'संशितव्रतः' इत्यत्र विकल्पेन प्राप्तः, व्यवस्थितविभाषाविज्ञानात् नित्यमेव भवति। कारिकायां हि 'मिथो न विभाष्यन्ते' इत्युक्तम्। तस्याऽयमभिप्रायो यदेकस्मिन्नेव विषये विकल्पो न जायते, विषयभेदे तु सति भवत्येवेति॥८८॥

---

'आशंसायां भूतवच्च' (अ० ३.३.१३२) इति आशंसनम् आशंसा उच्यते। अप्राप्तस्य प्रियपदार्थस्य प्राप्तुमिच्छा। तस्याश्च भविष्यत्कालो विषयः, तत्र भविष्यति काले आशंसायां गम्यमानायां धातोर्वा भूतवत् चकाराद् वर्तमानवच्च प्रत्यया भवन्ति। यथा– उपाध्यायश्चेदागमत्, आगतः, आगच्छति, आगमिष्यति, एते व्याकरणमध्यगीष्महि, एते व्याकरणमधीतवन्तः, अधीमहे, अध्येष्यामहे। सामान्यभूत-अनद्यतनभूत-परोक्षानद्यतनभूतभेदात् भूतो हि त्रिधा कल्प्यते। निष्ठा-लुङादयो हि सामान्यभूते भवन्ति, लङ् चानद्यतनभूते, लिट् तु परोक्षानद्यतनभूते। तदयमत्र संदेहो जायते– भूतवदित्यतिदेशेन सामान्यभूते विहितानामेव प्रत्ययानामतिदेशो भवति आहोस्वित् सामान्यविशेषयोरुभयोरपि। तस्मादेवंभूतं संदेहं निवारयितुं भवत्येषा **न्यायसिद्धा परिभाषा–**

---

१. 'अवङ् स्फोटायनस्य' (अ० ६.१.११९) इति स्फोटायनस्य मतेऽवङादेशो भवति। अन्येषां मते तु 'सर्वत्र विभाषा गोः' (अ० ६.१.११८) इति वैकल्पिकेन प्रकृतिभावेन उक्तरूपद्वयं सिध्यति– इति भावः।

## ८९. सामान्यातिदेशे विशेषानतिदेशः॥ (म० भा० १.१.५६)

यत्र क्वचित्सामान्यधर्मवतोऽतिदेशः क्रियते तत्र विशेषधर्मवतोऽतिदेशो न भवति। अर्थाद् सामान्येनेति कृत्वा उभयोरप्यतिदेशे प्राप्ते विशेषस्यातिदेशो न भवति। तदत्र भूतवदिति वचनेन सामान्यभूते विहितयोः 'निष्ठा-लुङ्' इत्येतयोरेवातिदेशो जायते न तु विशेषभूते विहितयोर्लङ्लिटोरिति।

'ब्राह्मणवद् अस्मिन् क्षत्रिये वर्तितव्यम्' इत्यनेन वचनेन यथा ब्राह्मणसामान्यप्रयुक्तमभ्युत्थानादिकं कार्यं गृह्यते न तु माठरकौण्डिन्य-ब्राह्मणविशेषप्रयुक्तं किञ्चिद् विशिष्टं परिवेषणादिकार्यम्, तथेहापि। तस्माल्लोकन्यायमूलेयं परिभाषाऽवगन्तव्येति॥८९॥

---

'सनाशंसभिक्ष उः' (अ० ३.२.१६८) इत्यत्र 'सन्' इत्यनेन सन्धातुर्वा ग्राह्यः प्रत्ययो वेति संदेहमपसारयितुं भवत्येषा **वाचनिकी परिभाषा–**

## ९०. प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम्॥ (म० भा० ६.४.१)

यत्र क्वचित् शास्त्रे प्रयुक्तं शब्दरूपं प्रत्ययोऽपि सम्भाव्येत, अथ चाऽप्रत्ययोऽपि; तदा प्रत्ययरूपस्यैव ग्रहणं भवति न तु अप्रत्ययस्य। तस्मात् 'सनाशंस०' इत्यत्र सन्धातोर्ग्रहणं न भवति, अपि तु सन्प्रत्ययस्यैवेति। तथा च 'सन्प्रत्ययान्ताद्' इत्ययमर्थो जायते। एवञ्च कृत्वा 'जिज्ञासुः' इत्येवमादयः प्रयोगाः सिध्यन्ति। अथ 'अज्झनगमां सनि' (अ० ६.४.१६) इत्यजन्तस्याऽङ्गस्य विधीयमानं दीर्घत्वं 'चिचीषति, तुष्टूषति' इत्येवमादौ सन्प्रत्यये परतो भवति न तु 'दधि सनोति, मधु सनोति' इत्येवमादौ सन् धातौ परतः। 'तित् स्वरितम्' (अ० ६.१.१७९) इत्यत्र च तितः प्रत्ययस्य ग्रहणात् 'किरति' इत्यत्र 'कि' इत्येतस्य स्वरितत्वन्न भवति।

वर्णग्रहणे चेयं न प्रवर्तते। तथा च 'दध्यशान' इत्यत्र 'इको यणचि' (अ० ६.१.७४) इति विहितो यणादेशो प्रत्ययभिन्ने धातावपि जात इति॥९०॥

---

'विपराभ्यां जेः' (अ० १.३.१९) इति 'वि-परा'-इत्येवंपूर्वाज् जिधातोरात्मनेपदं विधीयते। तत्र 'परा[1] सेना जयति' इत्यर्थके वाक्ये 'परा

---

१. परा= परवर्तिनी उत्कृष्टा वा।

जयति सेना' इत्येवंरूपे प्रयुक्ते सति उपर्युक्तसूत्रेण आत्मनेपदं कथन्न भवति? प्रश्नमिममुत्तरयितुं **न्यायसिद्धां परिभाषामाह—**

## ९१. सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम्॥

यत्र क्वचित् साहचर्येण प्रयुक्तः कश्चिच्छब्दः स्वसहचरितस्य सदृशोऽपि सम्भाव्येत विसदृशोऽपि तदा सदृशस्यैव ग्रहणं भवति न तु विसदृशस्येति। तद्यथा– लोके हि 'रामलक्ष्मणौ' इत्युक्ते रामशब्दे सन्देहे सति लक्ष्मणसाहचर्यात् दाशरथो राम एव गृह्यते, न तु परशुरामबलरामौ। एवं हि लक्ष्मणशब्दे सन्देहे सति रामसाहचर्यात् तद्भ्रातुरेव ग्रहणम्, न तु दुर्योधनपुत्रस्य।

तदेवं 'विजयते, पराजयते' इत्येवमादौ तु आत्मनेपदं भवति, परम् 'बहुवि[१] जयति वनम्, परा जयति सेना' इत्यादौ न भवति। प्रकृतसूत्रे हि पठितः 'वि' इत्ययं शब्दोऽव्यभिचारिरूपेणोपसर्ग एवाऽस्ति, यद्यपि पक्षिवाचको विशब्दोऽस्ति तथापि तस्य पुल्लिङ्गत्वाद् विभक्त्या व्यवधानाद् वेः परो जयतिर्न भवति। बहवो वयः (पक्षिणः) यत्र तद् बहुवि (वनम्) इत्यत्र समासावयवस्य विशब्दस्य नपुंसकलिङ्गस्य सत्त्वेपि समासार्थं प्रति तस्योप-सर्जनत्वाद् आनर्थक्याद् अर्थवद्ग्रहणे नानर्थकस्य इति ग्रहणं न भवति। पराशब्दस्तु तत्सदृश उपसर्गोऽप्यस्ति, अथ विसदृशोऽनुपसर्गोऽपि, तस्माद् विशब्देन सदृशस्योपसर्गस्यैव ग्रहणं भविष्यति न तु अनुपसर्गस्येति। 'परा जयति सेना' इत्यत्र हि 'परा इत्येतत् 'सेना' इत्येतस्य विशेषणत्वेन प्रयुज्यते न तूपसर्गत्वेन। तथा 'बहुवि' इत्यत्रापि विशब्दः पक्षिवाचको बहुव्रीहिसमासेन प्रयुक्तोऽस्ति।

अथ 'पञ्चम्यपाङ्परिभिः' (अ॰ २.३.१०) इति कर्मप्रवचनीयसंज्ञकैः 'अप–आङ्–परि' इत्येतैर्योगे पञ्चमी विधीयते। तदत्र यद्यपि परिशब्दस्य अव्यभिचारितया वर्जनार्थो नास्ति तथापि कर्मप्रवचनीयसंज्ञकः 'अप' इत्येतस्य साहचर्येण 'परि' इत्ययमपि तथाविध एव ग्रहीष्यते। तद्यथा 'अस्य गोर्द्वितीयेनार्थः' इत्युक्ते तस्य सहायिभूतो गौरेवानीयते नाश्वो न गर्दभः। एवञ्च 'वृक्षं परि विद्योतते विद्युत्' इत्यत्र लक्षणार्थस्य कर्मप्रवचनीयस्य 'परि' इत्येतस्य योगे पञ्चमी न भवतीत्येवमाद्यनेकं प्रयोजनम्॥९१॥

---

१. बहवो वयः= पक्षिणो यत्रेत्यर्थको 'बहुवि' -शब्दोऽत्र प्रयुज्यते।

यथा हि 'अहो आश्चर्यम्, उताहो इमे' इत्येवमादौ 'ओत्' (अ० १.१.१५) इत्यनेन प्रगृह्यसंज्ञायां सत्यां 'प्लुतप्रगृह्या अचि नित्यम्' (अ० ६.१.१२१) इति प्रकृतिभावो जायते तथा 'अतिरस्तिरः समपद्यत, तिरोऽभवत्' इत्यत्रापि च्विप्रत्ययान्तस्य लाक्षणिकस्य ओकारान्तस्य 'ऊर्यादिच्विडाचश्च' (अ० १.४.६०) इति निपातसंज्ञायां जातायाम् 'ओत्' इति पूर्ववत् प्रगृह्यसंज्ञया भाव्यम्, एवञ्च सति इहापि प्रकृतिभावः स्यात्; तस्माद् एतत् समाधातुं भवत्येषा **ज्ञापकसिद्धा परिभाषा–**

## ९२. लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्॥

(म० भा० १.१.१५)

लक्षणञ्च प्रतिपदञ्च लक्षणप्रतिपदम्। लक्षणप्रतिपदेनोक्ते, तथा– तयोः– 'द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकं सहाभिसम्बध्यते' इति न्यायेन 'उक्तम्' इत्युभाभ्याम् (=लक्षणप्रतिपदाभ्याम्) सहाऽन्वेति। लक्षणोक्तम्= लक्षणेन निष्पादितम्, लाक्षणिकमिति। यच्च स्वरूपेण निर्दिष्टं तत् 'प्रतिपदोक्तम्' इत्युच्यते। यत्र क्वचिद् उभयोरपि ग्रहणं समापद्येत तत्र प्रतिपदोक्तस्यैव ग्रहणं कार्यम्, न तु लाक्षणिकस्येति।

प्रकृतपरिभाषाया ज्ञापकं तु 'कर्तरि भुवः खिष्णुच्खुकञौ' (अ० ३.२.५७) इत्यस्मिन् सूत्रे खिष्णुच इकारादित्वम्। तद्धि रूपसिद्ध्यर्थं न भवति। यावता भूधातोः सेट्त्वादेव इटि कृतेऽभीष्टरूपसिद्धेः। तत इकारादित्वं 'कृत्योकेष्णुच्चार्वादयश्च' (अ० ६.२.१५९) इत्यत्र ग्रहणार्थमेवेत्यवसीयते। किं कारणं तत्र इडागमिनः खिष्णुचो ग्रहणं न स्यात्? प्रकृतपरिभाषा-स्वीकरणादेव अस्य खिष्णुच इकारादित्वं लाक्षणिकमिति कृत्वा ग्रहणं न स्यात् परं 'अलंकृञ्०' (अ० ३.२.१३६) इति विहितस्य इष्णुचः प्रतिपदोक्तस्यैव स्यात्। तस्मादिटा रूपसिद्धे सति खिष्णुच इकारादित्वं क्रियते नास्ति अन्यत् प्रयोजनम्। तदेवं 'तिरोऽभवत्' इत्यत्र 'तिरो' इत्येतस्य ओकारान्तस्य निपातत्वेऽपि लाक्षणिकत्वाद् 'ओत्' इति प्रगृह्यसंज्ञा न भवति, अथ च तत्सम्बद्धः प्रकृतिभावोऽपि न भवति– सन्धिकार्यं जायत एवेति।

तथा 'आशिषा चरति= आशिषिकः' इत्यत्र 'आशिष्' इत्याङ्पूर्वात् शास्धातोः क्वौ उपधाइत्वेन निष्पन्नत्वाल्लाक्षणिकत्वाद् 'इसुसुक्तान्ताद् कः' (अ० ७.३.५१) इति सूत्रेण विधीयमानः ठक्प्रत्ययस्य ककारादेशो न भवति,

'ठस्येकः' (अ० ७.३.५०) इति सामान्यविहित इकादेश एव तु भवति– इति॥९२॥

---

लक्षणप्रतिपदोक्तपरिभाषायां सत्यां हि 'देङ् रक्षणे' (भ्वादि० ६८९), 'दो अवखण्डने' (दिवादि० ३९), 'धेट् पाने' (भ्वादि० ६४३) इत्येतेषां धातूनाम् 'आदेच उपदेशे०' (अ० ६.१.४४) इत्याकारादेशेन लाक्षणिकत्वाद् दाधारूपस्य 'दाधा घ्वदाप्' (अ० १.१.१९) इति दाधारूपाणां धातूनां विधीयमाना घुसंज्ञा न स्यात्; डुदाञ्, डुधाञ् (जुहो० ९–१०) 'दाण् दाने' (भ्वा० ६६४) इत्येतेषामेव स्यात्; तस्माद् इमं संदेहं निवर्तयितुं भवतीयं **ज्ञापकसिद्धा परिभाषा–**

## ९३. गामादाग्रहणेष्वविशेषः॥ (म० भा० १.१.२०)

गाश्च माश्च दाश्च गामादाः। तेषां ग्रहणानि गामादाग्रहणानि, तेषु गामादाग्रहणेषु। द्वन्द्वगर्भषष्ठीतत्पुरुषः। गामादा इत्येतेषां यत्र यत्र ग्रहणं तत्र तत्राविशेषेण सामान्येन प्रतिपदोक्तस्य लाक्षणिकस्य च ग्रहणं भवति। एवं च देङ्प्रभृतीनामपि धातूनां लाक्षणिकानां दारूपाणां घुसंज्ञा भवत्येव।

'दैप् शोधने' (भ्वादि० ६५८) इत्येतस्य धातोः पित्त्वं ह्यस्याः परिभाषायाः सत्त्वे लिङ्गम्। तथा हि पित्करणे एतत् प्रयोजनम्– 'दाधा घ्वदाप्' (अ० १.१.१९) इत्यत्र 'अदाप्' इति घुसंज्ञाप्रतिषेधेन दैपोऽपि[१] प्रतिषेधो यथा स्यात्। पकारसहितपाठेनैव दैप्धातोः स घुसंज्ञाप्रतिषेधो भवितुमर्हतीति कृत्वा पित्त्वं कृतम्। परं 'दै' इत्येतस्य दारूपस्य लाक्षणिकत्वाद् घुसंज्ञा प्राप्नोत्येव न, तत् किं घुसंज्ञाप्रतिषेधार्थेन[२] दैपः पित्त्वेन? कृतं तु ज्ञापयति लाक्षणिकस्यापि दैपो दारूपस्य घुसंज्ञा प्राप्नोति तद्बाधनार्थमेव दैपः पित्त्वं करोति। तदेवं परिभाषाया एकदेशः 'दा' इत्येतस्याऽविशेषग्रहणेन[३] ज्ञाप्यते। एकदेशानुमित्या च सम्पूर्ण एव परिभाषार्थो ज्ञापितो भवतीति।

---

१. पित्करणसामान्येन 'दाप् लवने' इत्यनेन सह दैपोऽपि यथा स्यादिति भावः।

२. प्राप्तौ सत्यां हि प्रतिषेधः सार्थकतां भजते। लक्षणप्रतिपदोक्तपरिभाषाया निरपवादे तु सति तथैव प्रकृते घुसंज्ञाऽपवारिता भविष्यतीति भावः।

३. दाप्–दैपोरुभयोरपि ग्रहणार्थेन दैपः पित्त्वेन इति भावः।

तथा हि 'घुमास्थागापाजहाति॰' (अ॰ ६.४.६६) इत्यत्र मा इत्यनेन मेङ् (भ्वादि॰ ६८८) इत्यादयोऽपि गृह्यन्ते। तेन 'मीयते, मेमीयते' इत्यादावपि प्रकृतसूत्रेण मेङ्धातोरीत्त्वं सिद्धं भवति। अथ 'गा' इत्यनेन हि 'गै' (भ्वादि॰ ६५३)) इत्यादिष्वपि ईत्त्वं भवति- गीयते, जेगीयते। इङ्स्थानिकस्य च गाङादेशस्यापि ग्रहणे सति 'अध्यगीष्ट, अध्यगीषाताम्' इत्यादयः प्रयोगाः सुसिद्धा भवन्तीत्याद्यनेकं प्रयोजनम्।

'दो दद् घोः' (अ॰ ७.४.४७) इत्यत्र 'दः' इति ग्रहणेन ज्ञाप्यते धेटोऽपि घुसंज्ञास्तीति। घुसंज्ञका धातवः षडेव। तत्र दारूपाश्चत्वारो धारूपौ द्वौ। धारूपयोर्ददादेशो मा भूदिति द इत्युच्यते। 'दधातेर्हिः' (अ॰ ७.४.४२) इति डुधाञ् (धारणपोषणयोः) धातोर्ददादेशस्य अपवादो हिरादेशो विधीयते तदर्थं दः इतिग्रहणस्य नास्ति प्रयोजनम्। केवलं धेट् (पाने) इत्यस्य ददादेशनिवृत्त्यर्थं सद् ज्ञापयति भवति धेटोऽपि घुसंज्ञेति।

**इदमत्रावधेयम्–** इयं हि 'गामादाग्रहणपरिभाषा बाध्यसामान्यचिन्तया लक्षणप्रतिपदोक्तपरिभाषायाः (परि॰ ९२) निरनुबन्धकपरिभाषायाः (परि॰ ७१ –७२) अलुग्विकरणपरिभाषायाश्च (परि॰ ८०) इति तिसृणामपि परिभाषाणां बाधिकाऽस्ति।।९३।।

---

'वृद्धिरादैच्' (अ॰ १.१.१) इति 'आ–ऐ–औ' इत्येतेषां त्रयाणां वर्णानां वृद्धिसंज्ञा विधीयते तदयं संदेहो जायते- 'कारकः, ऐतिकायनः, औपगवः' इत्यादिषु उदाहरणेषु त्रयोऽपि इमे संज्ञीभूता वर्णा पृथक्–पृथक् उपलभ्यन्ते न तु एकस्मिन्नुदाहरणे तत् कथमत्र वृद्धिसंज्ञा भवतीति। तदत्र इमं शंकाशङ्कुमुत्पाटयितुं **न्यायसिद्धां ज्ञापकसिद्धां च परिभाषामाह–**

## ९४. प्रत्यवयवं वाक्यपरिसमाप्तिः।। (म॰ भा॰ १.१.१)

वाक्यम्= वाक्यार्थः। अवयवम् अवयवं प्रति= प्रत्यवयवम्। वाक्यार्थस्य परिसमाप्तिः वाक्यगतेन प्रत्यवयवेन सह भवति। वाक्येन यत् किमपि विधीयते= उद्देश्यविषये यत् किमप्युच्यते तत् प्रत्येकमुद्देश्यविषये पृथक् पृथगेव प्रोच्यमानमवगन्तव्यम्। अर्थात् वाक्यस्था विधेयभूता क्रिया उद्देश्यभूतैः प्रत्यवयवैः सह सम्बन्धमन्वेति, एवंकरणेन हि वाक्यं पूर्णं भवति। तद्यथा–

'देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्ताम्' इत्यत्र भोजनक्रियायाः सम्बन्धः प्रत्येकं देवदत्तादिभिः सह पृथक्-पृथगेवास्ति न तु तत्समुदायेन। यथा चोपर्युक्ते वाक्ये प्रत्येकमित्यनुच्यमानेऽपि प्रत्येकमिति गम्यते तथेहापि यद्यपि 'आ-ऐ-औ' इत्येतेषां वृद्धिसंज्ञाविधाने प्रत्येकमिति नोच्यते तथापि गम्यते प्रत्येकमिति कृत्वा न कश्चिद् दोषो भवति। एवं गुणादयोऽपि संज्ञाः संज्ञिनां प्रत्यवयवं प्रवर्तन्ते इति।

ज्ञापकं चात्र 'णलुत्तमो वा' (अ० ७.१.९१) इति उत्तमपदं णल्विशेषणम्। यदि प्रत्येकं वाक्यपरिसमाप्तिर्न स्यात् तदा उत्तमसंज्ञा मिब्वस्मसां त्रिकेण सम्बद्धेति केवलस्य मिप्स्थानिकस्य णलो विशेषणं न स्यात्॥९४॥

---

परं सत्यां ह्यस्यां पूर्वोक्तायां परिभाषायां सर्वत्रैव प्रत्येकम् अवयवे वाक्यपरिसमाप्तिः स्यात्, ततश्च 'हलोऽनन्तराः०' (अ० १.१.७) इति संयोगसंज्ञा, समाससंज्ञा[१], अभ्यस्तसंज्ञा[२] चापि प्रत्येकमेवाऽवयवे प्रवृत्ताः स्युः। तथा च सति 'निर्यायात्, निर्वायात्' इत्यादौ 'या-वा' इत्येतयोर्धात्वोरपि संयोगादित्वाद् 'वाऽन्यस्य संयोगादेः' (अ० ६.४.६८) इत्यनिष्ट एकारादेशः स्यात्। तदेवंप्रकारकान् दोषान् निवारयितुं **न्यायसिद्धां ज्ञापकसिद्धां च परिभाषामाह–**

## ९५. समुदाये वाक्यपरिसमाप्तिः॥ (म० भा० १.१.७)

क्वचिद्धि एवमपि भवति यत् समुदायेनैव वाक्यार्थः सम्बन्धभावमुपयाति। अर्थात् वाक्यस्था क्रिया समुदायेनैव सम्बध्नाति, न तु वाक्यघटकप्रत्यवयवेन, वाक्यगतैः पदैः सह क्रियायाः पृथक्शः सम्बन्धो न भवतीति यावत्। यथा राज्ञा 'गर्गाः शतं दण्ड्यन्ताम्' इत्युक्ते गर्गाणां यत् समुदायभूतं कुलं भवति तस्मादेव दण्डरूपेण शतं गृह्यते न तु प्रत्येकम्।

ज्ञापकं चात्र 'तस्माच्छसो नः पुंसि' (अ० ६.१.९९)। तस्मादिति सर्वनाम्ना 'प्रथमयोः पूर्वसवर्णः' (अ० ६.१.९८) इत्यनेन विधीयमानो दीर्घो निर्दिश्यते। यदि स्वौजसां त्रिकस्य प्रथमसंज्ञा स्यात् तदा तत्सामीप्याद् लक्षणया वृत्त्या अमौट्शसां त्रिकस्यापि प्रथमसंज्ञा स्यात्। तदैव शसि परतः पूर्वसवर्णदीर्घः

---

१. 'प्राक्कडारात् समासः' (अ० २.१.३) इत्येवमादिना प्रकरणेन समाससंज्ञा विधीयते।
२. 'उभे अभ्यस्तम्' (अ० ६.१.५) इति सूत्रेणाऽभ्यस्तसंज्ञा विहिताऽस्ति।

स्यात्। एवं सति तस्माच्छसो नः पुंसि इति पूर्वसवर्णदीर्घं तस्मादिति सर्वनाम्ना निर्दिशन् ततः परस्य शसो नत्वं यत् शास्ति तद् उपपद्यते। नान्यथा। तथेहापि समुदायभूतानां हलामेव संयोगसंज्ञा भवति, न तु प्रत्येकम् अवयवस्य। अथ च समाससंज्ञा, अभ्यस्तसंज्ञा चापि समुदायस्यैव भवति न तु अवयवस्येति॥९५॥

'वृद्धिरादैच्' (अ॰ १.१.१) इति 'आ–ऐ–औ' इत्येतेषां दीर्घवर्णानां वृद्धिसंज्ञा विधीयते। तदत्र किमर्थमाकारस्तपरः क्रियते इति प्रश्न उदेति? यतो हि अणुदित्सवर्णस्येति सवर्णग्रहणपरिभाषया अक्षरसमाम्नाये परिपठिता अण्वर्णा एव सवर्णग्राहका भवन्ति, अर्थादक्षरसमाम्नाये पठितो ह्रस्वोऽकार एव सवर्णं ग्राहयितुमर्हति न तु दीर्घः, तदेवं दीर्घाऽऽकारेण सवर्णग्रहणस्य प्राप्तिरेव नास्ति– यन्निवृत्त्यर्थमाकारस्तपरः[1] क्रियते। तदेतत् समाधातुं भवतीयं **न्यायसिद्धा परिभाषा–**

## ९६. भेदका उदात्तादयः॥ (म॰ भा॰ १.१.१)

येन वर्णेन सह य उदात्तादयो गुणा अनुषक्ता भवन्ति, असत्यपि कालभेदे ते हि तस्य भिन्नत्वमापादयन्ति। दीर्घोदात्ते दीर्घानुदात्ते दीर्घस्वरिते च समाने वर्णे कालकृतभेदस्तु नास्ति, परमुच्चैस्त्वनीचैस्त्वसमत्वादिकृतभेदस्तु अस्त्येव। तद् यद्याकारस्तपरो न क्रियते तर्हि तद्गुणपठितस्यैव ग्रहणं स्यात्। तपरकरणेन[2] पुनस्तत्कालानामुदात्तादिगुणभिन्नानामपि ग्रहणं भवति। एवं ह्याकारस्य तपरकरणं सार्थकं जातम्। अथ चान्यत्रापि दीर्घवर्णानाम् ईकारादीनां तपरकरणे एतदेव प्रयोजनमवगन्तव्यम्।

लोके चाप्युदात्तादेर्भेदो दृश्यते। कश्चिच्छात्र उदात्तस्य स्थानेऽनुदात्तं ब्रवीति चेदध्यापकस्तमाह– 'कथमन्यत्त्वं करोषि'। यदि ह्युदात्तादेर्भेदो न स्यात् नैतच्छासनं युज्येत। अथाऽन्योऽपि दृष्टान्त उपलभ्यते– एकमेव जलं पूर्वं शीतं भवति, पुनस्तदेवोष्णम्, तदेव च लवणमिति गुणभेदाद् भिन्नत्वमुपयातीति॥९६॥

---

१. 'तपरस्तत्कालस्य' (अ॰ १.१.६९) इत्यनेन हि तपरेणाऽणा भिन्नकालिकसवर्णव्यावृत्तिः क्रियते, तच्चेह नास्तीति भावः।

२. अस्मिन् पक्षे 'तपरस्तत्कालस्य' (अ॰ १.१.६९) इत्यत्रोपरिष्टाद् 'अण्' इति नानुवर्तते इति भावः।

अस्मिन् पूर्वोक्ते विषये वैधर्म्येणापि दृष्टान्ता उपलभ्यन्ते यद् एक एव देवदत्तो बालो युवा वृद्धो मुण्डो जटिलो वा न स्वाम् आख्यां जहाति। भिन्नत्वन्नोपगच्छति। तदनेन गुणा अभेदका भवन्तीति फलितम्। तथा हि 'यासुट् परस्मैपदेषूदात्तो ङिच्च' (अ० ३.४.१०३) इति यासुट उदात्तवचनं सार्थकं भवति, इतरथा ह्युदात्तगुणयुक्तमेव पठेत्, गुणानाञ्च भेदकत्वाद् अनुदात्तादेर्ग्रहणन्न स्यात्। पश्यति त्वाचार्यः– 'गुणा अभेदका अपि भवन्ति' इति। एवं च कृत्वा पृथक्श उदात्तवचनं करोति। तस्माद् भवत्येषा **ज्ञापकसिद्धा परिभाषा–**

## ९७. अभेदका गुणाः॥ (म० भा० १.१.१)

उदात्तादयो गुणा अभेदका भवन्ति, अर्थाद् गुणा गुणिस्वरूपं हि न परिवर्तयन्ति। एवञ्च कृत्वा 'अस्थिदधिसक्थि०' (अ० ७.१.७५) इत्यादिषु 'उदात्तः' इति वा 'अनुदात्तः' इति वा पठ्यते। यदि हि तत्रोदात्तादिशब्दन्न पठेत्– अथ च अकारादिमेवोदात्तादिगुणविशिष्टं पठेत् तर्ह्यभेदकत्वात् तत्तद्गुणस्य विशेषगुणिस्वरूपन्न परिज्ञायेत। तस्मात् तत्र तत्रोदात्तादयः शब्दाः पठ्यन्ते। गुणानां चाऽभेदकपक्षे दीर्घा वर्णाः किमर्थं तपराः क्रियन्त इति चेच्छ्रूयताम्– 'आदैच्' इत्यत्र तपरकरणेन 'तपरस्तत्कालस्य' (अ० १.१.६९) इत्यत्र तादपि परस्तपर इति पञ्चमीसमासस्याप्याश्रयणेन ऐचौ वर्णावपि तपरौ जातौ। तथा च सति 'महा+ओजाः= महौजाः' इत्येवमादौ हि चतुर्मात्रिकस्थानिकस्य आदेशस्य चतुर्मात्रिकत्वम्[१] अपवारितं भवति।

क्वचित्तु दीर्घवर्णा मुखसुखार्थमपि[२] तपरा क्रियन्ते। तदनयोर्द्वयोरपि पक्षयोर्मध्येऽस्य ज्ञापकलिङ्गेन समर्थनाद् अयम् अभेदकपक्ष एव बलीयान् भवति– इति।।९७।।

---

'सर्वादीनि सर्वनामानि' (अ० १.१.२६) इत्यत्र सर्वनामशब्दस्य प्रयोगं कुर्वताऽऽचार्येण 'पूर्वपदात् संज्ञायामगः' (अ० ८.४.३) इति प्राप्तस्य णत्वस्य निपातनबुद्ध्या प्रतिषेधः क्रियते तस्य अत्र चरितार्थत्वाद् अन्यत्र तु प्रयोगविषये

१. ऐचोस्तपरत्वाद् द्विमात्रिकयोरेव वृद्धिसंज्ञाया विधानात् तावेवादेशौ भवत इति भावः।
२. उच्चारणसौकर्यार्थमिति भावः। यथा 'ईदूदेद्०' (अ० १.१.११) इत्यत्रासति तपरे सन्धिकार्ये जाते उच्चारणेऽसौविध्यं स्यादिति भावः।

णत्वेन भवितव्यमेवेति कश्चिच्छङ्केत चेत् तस्य शङ्कां निवारयितुम् उच्यत एषा **न्यायसिद्धा परिभाषा–**

## ९८. बाधकान्येव निपातनानि।। (म० भा० १.१.२७)

क्वचिदपि यस्याऽप्राप्तस्य कार्यस्य विधानं प्राप्तस्य वा प्रतिषधो निपातनेन कृतं भवति, स हि येन नाप्राप्तिन्यायेन (परि० ५१) सर्वकालायैव प्रवर्तते। तदनेन 'सर्वनामः' इत्यादिषु शब्देषु णत्वनिषेधादिकं कार्यं सिद्धं भवति।

'पुराणप्रोक्तेषु०' (अ० ४.३.१०५) इति निपातितेऽपि पुराणशब्दे पुरातनशब्दप्रयोगः; अथ च 'विभाषा फाल्गुनीश्रवणा०' (अ० ४.२.२२) इति निपातितेऽपि श्रवणा (पौर्णमासी) इति श्रावणीशब्दप्रयोगः पृषोदरादिषु (अ० ६.३.१०८) द्रष्टव्यः।

लोके तक्रकौण्डिन्यन्यायोऽस्य मूलम्।

अबाधकान्यपि निपातनानीति तु भाष्यविरुद्धः पक्षः।।९८।।

---

स्यन्दूधातोः 'स्वरतिसूतिसूयति०' (अ० ७.२.४४) इति विधीयमान इड्विकल्पोऽन्तरङ्गः, अथ च 'न वृद्भ्यश्चतुर्भ्यः' (अ० ७.२.५९) इति निषेधो बहिरङ्गः। तदेवमन्तरङ्गबहिरङ्गयोर्बहिरङ्गासिद्धत्वे हि 'स्यन्त्स्यति' इत्यत्रापि इड्विकल्पेन भवितव्यम्। तदिमं संदेहं निवर्तयितुमाह इमां **ज्ञापकसिद्धां परिभाषाम्–**

## ९९. प्रतिषेधाश्च बलीयांसो भवन्ति।। (म० भा० १.१.६३)

परनित्याऽन्तरङ्गेभ्योऽपि प्रतिषेधा बलीयांसो भवन्ति। अस्याः परिभाषाया ज्ञापकं 'तसिलादिष्वाकृत्वसुचः' (अ० ६.३.३५) इत्यत्र जातीयर्देशीयर्ग्रहणमेव। तद्यथा पाचिकाभार्य इत्यादिषु उदाहरणेषु 'न कोपधायाः' (अ० ६.३.३६) इत्यादिनिषेधकाण्डस्य सावकाशत्वम्। दत्तजातीया इत्येवमादिषु 'पुंवत्कर्मधारय-जातीयदेशीयेषु' (अ० ६.३.४१) इत्यस्य सावकाशत्वम्। पाचकजातीया इत्येवमादिषु उभयोः निषेधविध्योः प्राप्तौ सत्यां 'विप्रतिषेधे परं कार्यम्' (अ० १.४.२) इति विधिरेव स्यात्। एवं सिद्धेऽपि यत्पुनः 'तसिलादिष्वाकृत्वसुचः' (अ० ६.३.३५) इत्यत्र 'जातीयदेशीयग्रहणं करोति तेन ज्ञापयति आचार्यः

प्रकृतपरिभाषा अस्तीति। तदत्रान्तरङ्गोऽपि इड्विकल्पो नित्येट्प्रतिषेधेन बाध्यते।।९९।।

---

'अइउण्' इत्यादिषु प्रत्याहारसूत्रेषु ये हि 'ण्, क्' इत्येवमादयः अनुबन्धाः पठ्यन्ते तेषाम् अज्ग्रहणेन ग्रहणं स्यात् तर्हि 'दधि णकारीयति, ऊरी करोति' इत्यादौ णकारे ककारे वा परतः पूर्वस्य इकारस्य ईकारस्य वा यणादेशेन भाव्यम्; तस्माद् भवत्येषा **परिभाषा–**

## १००. सर्वविधिभ्यो लोपविधिर्बलीयान्।।

लोपविधिरन्येभ्यो विधिभ्यः पूर्वमेव भवति। तेन 'आदिरन्त्येन सहेता' (अ० १.१.७०) इति प्रत्याहारप्रवृत्तेः प्रागेव 'ण्-क्' इत्यादीनाम् अनुबन्धानां लोपो जायते। तथा च सति अच्प्रत्याहारे णकारककारादीनाम् असमावेशात् 'दधि णकारीयति, ऊरी करोति' इत्येवमादौ 'इको यणचि' (अ० ६.१.७४) इति यणादेशो न प्रवर्तते।।१००।।

---

'अर्थं प्रत्याययति स प्रत्ययः' इति व्युत्पत्तिलभ्येनाऽर्थेन स्वार्थे विहितानां प्रत्ययानां प्रत्ययसंज्ञा न स्यात्, न हि ते प्रकृतेरतिरिक्तं कञ्चिद् अर्थविशेषमभिदधति; तस्माद् अस्त्येषा **ज्ञापकसिद्धा परिभाषा–**

## १०१. अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति।।

(म० भा० ३.२.४)

येषां प्रत्ययानां कश्चिदर्थविशेषो न निर्दिश्यते ते हि स्वार्थे भवन्ति। अर्थात् प्रकृत्यर्थस्यैव सहायका बोधका वा भवन्तीत्येतावता एव ते 'प्रत्ययाः' इत्युच्यन्ते। तच्च 'प्रकृत्या प्रत्याय्यते इति प्रत्ययः' इति कर्मणि प्रत्ययेनाऽयमर्थो लभ्यते। यथा– 'गुप्तिज्किद्भ्यः सन्' (अ० ३.१.५) 'यावादिभ्यः कन्' (अ० ५.४.२९) इत्येवमादयः प्रत्ययाः स्वार्थे भवन्ति– जुगुप्सते, यावकः– इति

'प्रत्ययः' (अ० ३.१.१) इति महासंज्ञाकरणाद् अन्वर्थसंज्ञा विज्ञायते। तत्र एवंभूते प्रत्ययसंज्ञाधिकारे च सन्-कन्-इत्यादीनां प्रत्ययानां पाठेन ज्ञापयत्याचार्यो-भवत्येषा परिभाषा इति।।१०१।।

---

'सुपि स्थः' (अ० ३.२.४) इति सूत्रेण कर्तरि प्रत्ययो विधीयते, तस्मात् 'आखूनामुत्थानम्= आखूत्थः' इत्येवमादिषु प्रयोगेषु भावे 'कः' प्रत्ययो न स्याद्, इत्यतो भवत्येषा **परिभाषा–**

## १०२. योगविभागादिष्टसिद्धिः॥

यत्र क्वचिदिष्टं न सिध्यति तद् योगविभागेन साधनीयम्। 'योगः' इति सूत्रमुच्यते, तस्य विभागं कृत्वेष्टं सम्पादनीयम्, परं न तेनाऽनिष्टे प्रसक्तव्यम्। 'सुपि' इति पृथक् सूत्रं विभज्य ह्ययमर्थो लब्धः 'सुबन्ते उपपदे आकारान्ताद् धातोः 'कः' प्रत्ययो भवति'। तदनेन 'कच्छेन पिबति कच्छपः, कटाहपः, द्वाभ्यां पिबति द्विपः' इत्येवमादयः प्रयोगाः सुसिद्धाः।

पुनश्च 'स्थ' इति सूत्रं पृथक् कृत्वा 'स्थाधातोः सुबन्ते उपपदे कः प्रत्ययो भवति' इत्ययमर्थः सम्प्राप्तः। यदि चात्रापि कः प्रत्ययः कर्त्तर्य्येव स्यात् तर्हि पुनर्विधानमनर्थकं स्यादिति कृत्वा कर्तुरयमपकृष्यते। न चान्यः कश्चिदर्थो निर्दिश्यते। अनिर्दिष्टार्थाः प्रत्ययाश्च पुनः स्वार्थे भवन्ति। स्वार्थश्च धातूनां भाव एव। तदेवम् आखूत्थादयः शब्दाः सिद्धा भवन्तीत्यनया धिया सर्वत्राप्यवगन्तव्यम्॥१०२॥

---

वैयाकरणनिकाये 'अर्द्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः' इति हि प्रसिद्धिर्वर्तते, एतदनुसृत्य लाघवगौरवचर्चा सर्वदैव प्रचलति, यत् कथमपि लघीयसा वचनेन महान् अर्थः सम्प्राप्येत। परन्तु पर्यायशब्दानां विषये भवत्येषा **ज्ञापकसिद्धा परिभाषा–**

## १०३. पर्यायशब्दानां लाघवगौरवचर्चा[१] नाद्रियते॥

१. अस्याः परिभाषायाः प्राचीनपाठः 'पर्यायशब्दानां गुरुलाघवचर्चा नाद्रियते' इत्येवंभूतोऽस्ति (द्र० सीरदेवकृतपरिभावृत्तिः- १२२)। नागेशेन 'गुरुलाघवम्' इतिपदमपशब्दमवबुध्य 'लाघवगौरवचर्चा (परिभा० १ २४) इति पाठः परिवर्तितः। परं गुरुलाघवपदप्रयोगो बहुत्र प्राचीनग्रन्थेषु सम्प्राप्यते। यथा– 'गुरुलाघवचिन्तेयं प्रायेणाऽल्पबलान् प्रति' (चरक सूत्रे २.७. २४२)। 'आरभेत ततः कार्यं संचिन्त्य गुरुलाघवम्' (मनु० ९.२९९)। गुरुलाघवसंप्रयुक्तम्' (भरतनाट्यशास्त्रे ५.१८२)। 'भवन्तमेवात्र गुरुलाघवं पृच्छामि' (शाकुन्तलनाटके ५.३१)। 'आपिशल्युपज्ञं गुरुलाघवम्' (काशिकायाम् ६.२.१४)।

पर्यायशब्दानां प्रसङ्गे लघुरयं गुरुर्वा इति विचारो न क्रियते। अर्थात् लघीयसा शब्देनैव सिद्धेऽभिधाने कथमधिकाक्षरः शब्दः पठ्यत इति न विचार्य्यते। यथा– अन्यतरस्याम्, विभाषा, वा, उभयथा, एकेषाम्– इत्येकार्थेषु शब्देषु कमप्येकं शब्दं गृहीत्वा पठति। अधिकाक्षरः शब्दो न पठनीय इति नास्ति नियम इति।

'आपोऽन्यतरस्याम्' (अ० ७.४.१५) इत्यादौ बहुत्र स्थलेषु 'वा' इत्यनेनैव लघुनोपायेन कार्ये सिद्धे यत्तत्पर्यायम् 'अन्यतरस्याम्' इति गृहीत्वा गरीयांसं यत्नं करोति तेन ज्ञापयत्याचार्यो भवत्येषा परिभाषा– 'पर्यायशब्दानां लाघवगौरवचर्चा नाद्रियते' इति।।१०३।।

---

ज्ञापकरूपाणां परिभाषाणां तत्तल्लक्ष्ये किमविशेषेण प्रवृत्तिर्भवति आहोस्विद् विशेषेण– इत्यत आह इमां **न्यायसिद्धां परिभाषाम्–**

## १०४. ज्ञापकसिद्धं न सर्वत्र।। (म० भा० ४.१.१)

सुगमम्। अस्याः परिभाषाया अयमस्ति परमार्थः– ज्ञापकसिद्धपरिभाषया हि नानिष्टार्थप्रसक्तौ यत्नः कार्यः, अपितु इष्टार्थम् उपपादयितुमेवाऽलम्। यथा ज्ञापकसिद्धस्याऽऽत्मनेपदस्याऽनित्यताम् अङ्गीकृत्य एधादयो धातवः परस्मैपदे न यत्र-तत्र स्वमनीषया प्रयोक्तुमर्हाः। किं तर्हि? यत्र क्वचित् शिष्टप्रयोगः समुपलभ्यते तत्रैव समादरः करणीय इति।

लोके खल्वपि दरीदृश्यते यत् काषायवस्त्रजटादिधारिणं संन्यासिनं दृष्ट्वा - सामान्येन अयं तपस्वी, विद्वान्, महात्मा इत्यनुमीयते। परं यो य एतादृशः संन्यासी स स तपस्वी, विद्वान्, महात्मा इति न नियमः, क्वचित् कपटिषु, धूर्तेषु भिक्षुषु गुप्तचरेषु च तद्दर्शनात् तापसत्वादिगुणानां चाभावदर्शनात्।।१०४।।

---

सम्प्रति शङ्केयमुत्पद्यते यद् 'द्रोग्धा द्रोग्धा, द्रोढा द्रोढा' इत्येवमादिषु 'सर्वस्य द्वे' (अ० ८.१.१) इत्येतस्मिन्नधिकारे 'नित्यवीप्सयोः' (अ० ८.१.४) इत्यनेन द्विरुच्यते। 'द्रोग्धा द्रोढा' इत्यत्र 'वा द्रुह-मुह-ष्णुह-ष्णिहाम्' (अ० ८.२.३३) इति वैकल्पिकं घत्वम् (ह् इत्येतस्य घ्) ढत्वञ्च (ह् इत्येतस्य ढ्) भवति। 'पूर्वत्रासिद्धम्' (अ० ८.२.१) इति त्रैपादिकं घत्वं

ढत्वञ्च सपादसप्ताध्यायीगते द्विर्वचने कर्तव्ये असिद्धमस्ति। एवं हि पूर्वं द्विर्वचने सति 'द्रोह्+ता, द्रोह्+ता' इति स्थिते सम्प्रति घत्वं ढत्वञ्च विकल्पेन प्रवर्तनाद् 'द्रोग्धा द्रोढा' इत्येवंप्रकारकमनिष्टं रूपं प्रसज्येत, 'द्रोग्धा द्रोग्धा, द्रोढा द्रोढा' इति इष्यते, तस्मादिमां शङ्कां निवारयितुं भवत्येषा **वाचनिकी परिभाषा–**

**१०५. पूर्वत्रासिद्धीयमद्विर्वचने॥** (म॰ भा॰ ८.१.१)

पूर्वत्रासिद्धे भवम्= पूर्वत्रासिद्धीयम्– गहादित्वाच्छ[१]। पूर्वत्रासिद्धीयं[२] शास्त्रम् पूर्वशास्त्रं= सपादसप्ताध्यायीं प्रत्यसिद्धं भवति, परं द्विर्वचनस्य तु कर्तव्यतायामेवं न भवति। एवञ्चोपर्युक्ते शङ्कास्थले कृते खलु घत्वे ढत्वे द्विर्वचनं प्रवर्तत इति न किञ्चिदनिष्टमापद्यते। 'द्रोग्धा द्रोग्धा, द्रोढा द्रोढा' इतीष्टं रूपं सुलभं भवति।

अथ च 'नुन्नं नुन्नम्, नुत्तं नुत्तम्' इत्यत्र 'नुदविदोन्दत्राघ्रा॰' (अ॰ ८.२.५६) इति द्वित्वस्य एकस्मिन् भागे नत्वम्, अपरस्मिंश्च तत्वं प्राप्नोति, तत् प्रकृतपरिभाषया एव न भवतीति॥१०५॥

---

सम्प्रति– इयमत्र शङ्का भवति– 'स्वामीश्वराधीपतिदायाद॰' (अ॰ २.३.३९) इति स्वामिन्– इत्यादिशब्दानां योगे षष्ठीसप्तम्यौ विहिते। तत्र यथा 'गोष्वश्वेषु च स्वामी' इति सप्तमी भवति, अथ 'गवामश्वानाञ्च स्वामी इति षष्ठी; तथा 'गोषु अश्वानाञ्च' इत्येवंरूपः प्रयोगोऽपि साधुः स्यात्, तदस्याः शङ्कायाः समाधानार्थं भवत्येषा

**न्यायसिद्धा परिभाषा–**

**१०६. एकस्या आकृतेश्चरितः प्रयोगो द्वितीयस्याः तृतीयस्याश्च न भवति॥** (म॰ भा॰ ३.१.४०)

आकृतिः= स्वरूपम्। यदा ह्येकस्य शब्दस्वरूपस्य[३] प्रयोगश्चरितार्थस्तदा

---

१. गहादिभ्यश्च' (अ॰ ४.२.१३७)।

२. 'पूर्वत्रासिद्धम्' (अ॰ ८.२.१) इत्यारभ्य अष्टमाध्यायपर्यन्तम्।

३. प्रकृते शंकास्थले हि षष्ठीविभक्तिः सप्तमीविभक्तिर्वा शब्दस्वरूपेण गृह्यते इति भावः। षष्ठ्यन्तस्य प्रयोगे सति तस्मिन्नेव वाक्ये सप्तम्यन्तस्य प्रयोगो न भवतीति फलितार्थः।

तस्माद् भिन्नस्वरूपस्य प्रयोगस्तस्मिन्नेवार्थे न भवति[1]। परिभाषेयं तत्रैव व्याप्रियते यत्र भिन्नस्वरूपस्य प्रयोगेणाऽर्थान्तरं प्रतीयते। तथा हि 'गोष्वश्वानां स्वामी' इति कथनेन 'अश्वानां स्वामी गोषु तिष्ठति' इत्यर्थान्तरस्य प्रतीतिर्जायते- इति।

**वेदलोकप्रसिद्धोऽयं न्यायः। तत्राह कैय्यटः- "यथा हि खादिरे बध्नाति पालाशे बध्नातीत्यादौ विकल्पितेषु साधनेषु** येनैव साधनेन उपक्रान्ता क्रिया तेनैव निर्वाह्यते। तत्र यदि कदाचित्खदिरस्य भ्रंशो भवति तदा तत्सदृशो बुर्बुरः सादृश्यात् खदिरबुद्ध्या प्रतिनिधीयते न तु पलाशः परिगृह्यते। साधनभेदेन क्रियान्यत्वाद् उपक्रान्तक्रियाऽनिर्वाहप्रसङ्गात्। लोकेऽपि यदा स्वस्वामिभाव-प्रतिपादनाय गवां स्वामीति षष्ठ्युपक्रम्येत तदा अश्वानां चेत्यत्रापि तत्प्रतिपादनाय सैव निर्वाह्यते। अन्यथाऽश्वेषु चेत्युक्तेऽधिकरणप्रतिपत्तिरपि स्यादश्वेषु च तिष्ठतीति। तस्माद्योऽर्थो यया शब्दाकृत्या प्रतिपादयितुमुपक्रान्तस्तथैवासौ निर्वाह्यो न त्वन्यथा शब्दाकृत्येत्यर्थः। एवं हि प्रतिपत्तिलाघवं भवति"।।१०६।।

---

व्यध्धातोर्लिटि 'विव्याध' इत्यत्र 'व्यध् व्यध्' इति द्विर्वचने जाते 'लिट्यभ्यासस्योभयेषाम्' (अ० ६.१.१७) इति सम्प्रसारणाऽपेक्षया 'हलादिः शेषः' (अ० ७.४.६०) इत्यस्य परत्वाद् पूर्वमेवाऽभ्यासयकारस्य लोपे सति वकारस्य सम्प्रसारणं प्राप्नोति, एवञ्च 'विव्याध' इति रूपं न सिध्येत्, तस्माद् भवत्येषा **ज्ञापकसिद्धा परिभाषा-**

## १०७. सम्प्रसारणं सम्प्रसारणाश्रयं च कार्यं बलीयो भवति।।

(म० भा० ६.१.१७)

'सम्प्रसारणाच्च' (अ० ६.१.१०४) इति विधीयमानं पूर्वरूपं सम्प्रसारणाश्रयं कार्यमुच्यते। सम्प्रसारणं तदाश्रयं कार्यञ्चान्यकार्यापेक्षया बलवत्तरं भवति। तदत्र 'हलादिः शेषः' (अ० ७.४.६०) इति प्राप्तं परलोपमपि बाधित्वा पूर्वमपि सत् सम्प्रसारणमेव प्रवर्तते। तथा च 'न सम्प्रसारणे सम्प्रसारणम्' (अ० ६.१.३६) इति वकारस्य सम्प्रसारणे प्रतिषिद्धे यकारस्य च सिद्धे[2] 'हलादिः शेषः' (अ० ७.४.६०) इति धकारस्य लोपो जायते। अथ च

---

१. प्रायिकोऽयं नियमः। एकस्मिन्नेव वाक्ये क्वचिद् वैकल्पिकविभक्तेः प्रयोगोऽपि यथा- 'अनस एव यजूंसि सन्ति, न कुम्भस्य नकोष्ट्यै' (श० ब्र० १.१.२.७)।

२. 'लिट्यभ्यासस्योभयेषाम्' (अ० ६.१.१७) इति भावः।

'जुहुवतुः, जुहुवुः' इत्यत्र ह्वेञ्धातोः लिटि 'ह्वा+अतुस्, ह्वा+उस्' इति स्थिते 'ह्वः सम्प्रसारणमभ्यस्तस्य च' (अ० ६.१.३२) इति सम्प्रसारणस्य 'आतो लोप इटि च' (अ० ६.४.६४) इत्याकारलोपस्य च सम्प्रधारणायां परत्वाल्लोपेन भाव्यम्, सम्प्रसारणस्य बलीयस्त्वात् पूर्वं सम्प्रसारणमेव भवति। कृते चापि सम्प्रसारणे 'हु आ+अतुस्, हु+आ+उस्' इति जाते परत्वादाकारलोपेन (अ० ६.४.६४) भवितव्यम्; परं सम्प्रसारणाश्रयस्य पूर्वरूपस्य कार्यस्य बलवत्त्वात् 'सम्प्रसारणाच्च' (अ० ६.१.१०४) इति पूर्वरूपमेव भवतीति 'लिट्यभ्यासस्योभयेषाम्' (अ० ६.१.१७) इत्यत्र 'उभयेषाम्'-ग्रहणमस्या ज्ञापकम्। अत्र 'वचिस्वपि०' (अ० ६.१.१५) इति वच्यादीनां, 'ग्रहिज्यावयि०' (अ० ६.१.१६) इति ग्रह्यादीनां च ग्रहणाय 'उभयेषाम्' पठ्यते। परम् एतत्तु अनुवृत्त्याश्रयणादेव सिद्धम्। अतो निश्चीयते यद् 'उभयेषां'-ग्रहणेन आचार्यः किमपि विशिष्टं द्योतयितुमिच्छतीति। तथा च 'शब्दाधिक्याद् अर्थाधिक्यम्' इति न्यायः। एवं चात्र उभयशब्दस्य अधिकोच्चारणात् फलरूपेणास्य प्राबल्यं द्योतते। तच्च एवंरूपम्- उभयेषां सम्प्रसारणमेव यथा स्याद्, यद् अन्यत् प्राप्नोति तन्मा भूदिति। किं चात्र अन्यत् प्राप्नोति? 'हलादिः शेषः' (अ० ७.४.६०) इत्यादयः। सम्प्रसारणस्य प्रवृत्तेः पश्चात् पुनः प्रसङ्गविज्ञानाद्धि ते भवन्ति।।१०७।।

---

शुक्ल-नील-पीतादयो गुणवाचकाः शब्दा गुणवचना एव सन्तो न किञ्चित् पुंल्लिङ्गादिविशिष्टं लिङ्गमेकत्वादिवचनं वाऽऽश्रयन्तः प्रतीयन्ते, पुनर्यदैते द्रव्येण समानाधिकरणाः स्युस्तदा कतमल्लिङ्गं वचनं वाश्रयेयुरित्याह इमां **वाचनिकीं परिभाषाम्-**

## १०८. गुणवचनानां हि शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति।।

(म० भा० १.२.६४)

यदा हि गुणवचनाः शब्दा यत् किञ्चिद् द्रव्यमाश्रिताः स्युस्तदा द्रव्यवाचकस्य शब्दस्य यल्लिङ्गं यच्च वचनं स्यात् तदेव लिङ्गं वचनं वा गुणवचनस्यापि स्यादिति। यथा- शुक्लं वस्त्रम्, शुक्ला शाटी, शुक्लः कम्बलः, शुक्लौ कम्बलौ, शुक्लाः कम्बला इति सर्वत्रावगन्तव्यम्।।१०८।।

---

यथा हि 'कष्टं श्रितः कष्टश्रितः' इति 'द्वितीया श्रितातीत०' (अ० २.१.२३) इति समासो भवति तथा 'महत् कष्टं श्रितः' इत्यत्रापि समासेन भवितव्यम्, न चेष्यते, तदर्थं भवत्येषा **न्यायसिद्धा परिभाषा–**

**१०९. सापेक्षमसमर्थं भवति॥** (म० भा० २.१.१)

अपेक्षया सह वर्तत इति सापेक्षम्। वृत्तिश्च[१] समर्थानामेव भवति। सम्बद्धार्थाश्च समर्था भवन्ति। परं सम्बद्धार्थान्यपि पदानि यदि कञ्चिदन्यमर्थमपेक्षन्ते तदा तानि सापेक्षत्वाद् असमर्थान्येव भवन्ति। प्रकृते हि यद्यपि 'कष्टं श्रितः' इत्येतावर्थौ सम्बद्धार्थौ (=सम्प्रेक्षितार्थौ) स्तः, परं 'कष्टम्' इत्येतत् पदम् 'महद्' इति विशेषणभूतमर्थमपेक्षते इति कृत्वा 'कष्टम्' इत्येतद् असमर्थं जातम्। तस्मान्न भवति श्रितशब्देन सह समासः।

तथा ऋद्धस्य राज्ञः पुरुष इत्यत्र 'राज्ञः' इति षष्ठयन्तं पदं 'ऋद्धस्य' इत्यनेन पदेन सापेक्षमिति न समस्यते पुरुषपदेन। समस्यमानानि पदानि यदाऽन्यं कञ्चिदर्थं नापेक्षन्ते तदैव समासो[२] भवतीति फलितम्।।१०९।।

---

'परीयात्, अतीयात्' इत्यादौ 'परि+इयात्' इति स्थिते द्वयोरपि पूर्वपरयोरिकारयोः 'अकः सवर्णे दीर्घः' (अ० ६.१.९७) इति दीर्घैकादेशो भवति। यद्यत्र 'अन्तादिवच्च' (अ० ६.१.८२) इत्यन्तवद् आदिवद्भावश्च स्यात् तर्हि 'एतेर्लिङि' (अ० ७.४.२४) इत्युपसर्गादुत्तरस्य 'एतेः' अङ्गस्य विधीयमानं ह्रस्वत्वं स्यात्; तदेतत् समाधातुमाह **न्यायसिद्धां परिभाषाम्–**

**११०. उभयत आश्रये नान्तादिवत्॥** (म० भा० ६.१.८५)

पूर्वपरयोः स्थाने योऽयमेकादेशो जातः, स हि पूर्वाश्रयं कार्यमथ च पराश्रयं कार्यं प्रति युगपद् अन्तवद्भावमादिवद्भावञ्च न लभते। प्रकृते हि योऽयं पूर्वपरयोः स्थाने ईकारादेशो जातः स पूर्वस्याऽन्तवत् परस्यादिवच्च युगपदेवाश्रीयत इति न भवत्यन्तादिवद्भावः इति।

---

१. परार्थाभिधानं वृत्तिः, 'कृत्-तद्धित-समास-नामधातु-एकशेषाः' इति पञ्च वृत्तयो भवन्ति।

२. इह 'समास' इत्यन्यासामपि वृत्तीनामुपलक्षणम्। अन्या अपि वृत्तयः सापेक्षत्वे सति न भवन्ति। यथा 'भार्या उपगोर् अपत्यं देवदत्तस्य' इति विवक्षायाम् उपगुशब्दात् 'प्राग्दीव्यतोऽण्' (अ० ४.१.८३) इति अपत्यार्थे विधीयमानोऽण् न भवतीति।

लौकिकन्यायसिद्धेयम्। उक्तं च भाष्ये (६.१.८५)- 'लोके द्वयोस्तुल्यबलयोरेकः प्रेष्यो भवति, स तयोः पर्यायेण कार्यं करोति। यदा तु तमुभौ युगपत् प्रेषयतः, नानादिक्षु च कार्ये भवतः, तत्र यद्यसाववविरोधार्थी भवति, उभयोर्न करोति। किं पुनः कारणमुभयोर्न करोति? यौगपद्येनासम्भवात्। नास्ति यौगपद्येन सम्भवः'॥११०॥

---

ये हि टितः कितो मितो वाऽऽगमा भवन्ति, तत्र हि केनाऽप्यनुबन्ध-विशेषेण कश्चिदुदात्तादिस्वरो न विहितश्चेत् कथन्तत्र स्वरव्यवस्था स्यादिति जिज्ञासायामाह **ज्ञापकसिद्धां परिभाषाम्–**

## १११. आगमा अनुदात्ता भवन्ति॥ (म० भा० ३.१.३)

टित्-इत्यादय आगमाः सामान्येनाऽनुदात्ता भवन्ति। 'अर्थवत आगमास्तद्गुणीभूताः०' (परि० १२) इति परिभाषया प्रत्ययस्य वा प्रकृतेर्वा यः स्वरो भवति स एव आगमस्यापि स्याच्चेद्- एकस्मिन्नेव पदे स्वरद्वयं प्रसज्येत, तच्चानिष्टमिति कृत्वा 'भविता' इत्यादिषु ह्यागमा अनुदात्ता विधीयन्ते।

'यासुट् परस्मैपदेषु०' (अ० ३.४.१०३) इति यासुट उदात्तवचनञ्चास्याः परिभाषायाः सद्भावे लिङ्गम्। कथम्? यासुटः प्रत्ययभक्तत्वाद् 'आद्युदात्तश्च' (अ० ३.१.३) इति प्रत्ययस्वरेणैव सिद्धमेवाद्युदात्तत्वमिति किमुदात्तवचनेन। कृतन्तु ज्ञापयति- आगमस्य प्रत्ययस्वरादन्य एव स्वरो भवति, स चोदात्ताद् भिन्नोऽनुदात्त एव। तथा चाऽनुदात्ते प्राप्ते उदात्तविधानं सार्थकं भवतीति॥१११॥

---

गुप-तिज-कित-मान-बध-प्रभृतिभ्यो धातुभ्यः स्वार्थे सन् (अ० ३.१.५-६) प्रत्ययो विधीयते। तस्य च नित्यत्वात् सनमन्तरेण न कदाचिच्छुद्धधातोः प्रयोगो भवति। तदत्र संदेहो जायते यदेतेषु धातुषु कृतमनुदात्तेत्त्वं क्व खलु चरितार्थं स्यादिति? तमिमं शङ्कापङ्ककलङ्कं निवारयितुं भवत्येषा **न्यायसिद्धा परिभाषा–**

## ११२. अवयवे कृतं लिङ्गं तस्य समुदायस्य विशेषकं भवति यं समुदायं सोऽवयवो न व्यभिचरति॥ (म० भा० अ० ३.१.५)

अवयवे कृतं लिङ्गं तस्य समुदायस्य विशेषकं भवति, यस्मात् समुदायात् यदि सोऽवयवो न कदाचिद् पृथग् भवति। तदत्र गुपादिषु धातुषु अनुदात्तेत्त्वं चिह्नं कृतमस्ति, ते च सनमन्तरेण न क्वचित् स्वातन्त्र्येण प्रयुज्यन्ते, अर्थात् पूर्वं सन् भवति पश्चाल्लडादयः प्रत्यया इति गुपादीनामनुदात्तत्त्वेन 'जुगुप्स-मीमांस' इत्येवमादयः सनन्ताः समुदाया एव विशिष्यन्ते। ततश्च 'जुगुप्स-मीमांस' इत्येवमादिकात् समुदायाद् 'अनुदात्तङितः०' (अ० १.३.१२) इत्यात्मनेपदं जातम्; सना व्यवधानं नाभूत्- जुगुप्सते, मीमांसते इति। जुगुप्सयति जुगुप्सयते, मीमांसयति मीमांसयते, इत्येवमादौ तु अनुदात्तेद्धर्मणाऽऽत्मनेपदन्न भवति। कथम्? 'जुगुप्सि, मीमांसि' इति णिजन्तं समुदायं हि स गुपरूपोऽवयवो व्यभिचरति (=परित्यजति) णिजन्ते विनाऽपि केवलस्य सन्नन्तस्यैव प्रयोगात्; सन्नन्तं तु न कदाचिद् व्यभिचरति, तद् विना तस्याऽप्रयोगात्। तस्माद् 'जुगुप्सयति' इत्यादौ 'णिचश्च' (अ० १.३.७४) इति सामान्येन विहितमात्मनेपदं परस्मैपदञ्च उभयमपि भवति।

तथा 'पण व्यवहारे स्तुतौ च' (भ्वादि० २९८) इति धातुरनुदात्तेदस्ति। तस्य च 'गुपूधूपविच्छिपणि०' (अ० ३.१.२८) इति आयप्रत्ययान्तस्य प्रयोगेऽनुदात्तेत्त्वस्यार्धधातुकविषये पक्षे[1] चरितार्थत्वाद् आयप्रत्ययान्तात् परस्मैपदमेव भवति- 'पणायति' इति। आयप्रत्ययो हि पणधातोर्नित्यो नास्तीति कृत्वाऽऽय-प्रत्ययान्तं समुदायं पणधातुर्व्यभिचरतीति तस्यानुदात्तेत्त्वं समुदायस्य विशेषकं न भवति। एवञ्चायप्रत्ययपक्षे तेन व्यवधानादात्मनेपदं न भवति।

लोके चाप्ययं नियमो दृश्यते- यदा हि कश्चिद् गौर्वृषभो वा चिह्नितः क्रियते, तत् चिह्नं तस्यैव गोर्वृषभस्य वा विशेषकं भवति न तु गोमण्डलस्य। यतो हि तच्चिह्नं चिह्नितं गां वृषभमेव वा न व्यभिचरति, अन्याँस्तु गा वृषभान्

---

१. 'आयादय आर्धधातुके वा' (अ० ३.१.३१) इत्यायादयो ह्यार्धधातुकविषये विकल्पेन विधीयन्ते। तथा चायप्रत्ययाऽभावपक्षे' पेणे-पेणाते' इति भवति। अथ च पनिना साहचर्याद् आयप्रत्ययस्य स्तुत्यर्थे एव विधानात् व्यवहारार्थेऽपि 'शतस्य पणते' इत्यत्राऽनुदात्तेत्त्वं चरितार्थं भवतीति भावः।

वा व्यभिचरत्येव। अमुकचिह्नवन्तं वृषभमानयेत्युक्ते तद्विशिष्ट एवानीयते न तु अन्य इति।।११२।।

---

'अपृक्त एकाल्प्रत्ययः' (अ० १.२.४१) इति सूत्रे एकग्रहणस्येदमेव प्रयोजनं यद् 'दर्विः, जागृविः' इत्यत्र विप्रत्ययस्याऽपृक्तसंज्ञा मा भूत्। यद्यत्रैकग्रहणन्न क्रियेत, 'अल् प्रत्ययः' इत्येव उच्येत तदापि तदेव फलं लभ्येत। कथम्? यदि हि 'अल् प्रत्ययः' इत्यनेनाऽनेकाल् प्रत्ययोऽप्यपृक्तसंज्ञकः स्यात् तर्हि अल्ग्रहणमनर्थकं स्यात्; एवं हि 'अपृक्तः प्रत्ययः' इत्येव वदेत्। तदेवमेकग्रहणं व्यर्थं सदिमां **परिभाषां ज्ञापयति–**

## **११३. वर्णग्रहणे जातिग्रहणम्।।** (म० भा० १.२.४१)

इह शास्त्रे वर्णस्य ग्रहणे वर्णजातेर्ग्रहणं जायते। तदनेन ह्येकग्रहणं सार्थकं जातम्। इतरथा 'अल् प्रत्ययः' इत्येतावति उच्यमाने हि अल्जातेर्ग्रहणं स्यात्। ततश्चानेकस्याप्यलो ग्रहणं प्रसज्येत, एकग्रहणेन हि नातिप्रसङ्गो भवति।

अन्यत्र चेदं फलम्–'धिप्सति–धीप्सति' इत्यादौ दम्भधातोः सनि 'दम्भ इच्च' (अ० ७.४.५६) इतीत्त्वे 'दिम्भ्+स' इति स्थिते 'हलन्ताच्च' (अ० १.२.१०) इत्यत्र 'हल्' इत्यनेन हल्जातेर्ग्रहणात् सनः कित्त्वं सिद्धं भवति- इत्याद्यनेकं प्रयोजनं विदांकुर्वन्तु विचक्षणा इति।।११३।।

---

'सेदुषः' इत्यत्र (एत्वाभ्यासलोपयोः कृतयोः 'सेद्+इवस्+अस्') हि लिडादेशः क्वसुर्वलादि-आर्धधातुकप्रत्ययरूपेणाऽवतिष्ठते, तदाश्रित्य 'वस्वेकाजाद्घसाम्' (अ० ७.२.६७) इति इट् भवति, तच्च 'पूर्वोपस्थितनिमित्तकम् अन्तरङ्गम्' इति कृत्वाऽन्तरङ्गम्। शसमाश्रित्य प्रवृत्तं सम्प्रसारणञ्च बहिरङ्गम्। 'असिद्धं बहिरङ्गमन्तरङ्गे' (परि० ४४) इति परिभाषया बहिरङ्गस्य सम्प्रसारणस्यासिद्धत्वाद् इटः श्रवणं प्रसज्येत। तामिमाम् आपत्तिं निरासयितुमाह **ज्ञापकसिद्धां परिभाषाम्–**

## **११४. अकृतव्यूहाः पाणिनीयाः।।** (म० भा० कैयटे- ४.१.८२)

'अकृतव्यूहाः' इति बहुव्रीहिगर्भितो नञ्तत्पुरुषः। कृतो व्यूहो यैस्ते कृतव्यूहाः। ते न भवन्ति= अकृतव्यूहाः। विशिष्ट ऊहो व्यूहः। ऊहो निश्चयः।

'कार्यम् प्रति भाविनिमित्तविनाशे'- इति शेषभूतम् अध्याहार्यम्। पाणिनिना प्रोक्तं शास्त्रमधीयते पाणिनीयाः, पाणिनिशिष्याः। भगवत्पाणिनेः शिष्याणां मतमिदमस्ति यद् बहिरङ्गेण कार्येणाऽन्तरङ्ग कार्यस्य यन्निमित्तं तद्विनाशस्य संभावनायामुपस्थितायाम् अन्तरङ्गं कार्यं न क्रियते।

अथवा कृतमपि शास्त्रं निवर्तयन्ति= प्रवर्तितमपि लक्षणं व्यावर्तयन्तीत्यर्थः। तथा हि यद्यपि सेदिवस्-शब्दात् शस् विहितः तथापि 'अकृतव्यूहा' इति वचनात् 'सेद्+वस्+शस्' इति स्थिते सम्प्रसारणबलीयस्त्वात् पूर्वं सम्प्रसारणं ततो वलादित्वाऽभावादिण् न भवति।

ज्ञापकं चास्याः 'गोरतद्धितलुकि' (अ॰ ५.४.९२) इत्यत्र तद्धितग्रहणम्। अलुकि इतीयति उच्यमाने गोशब्दान्तात् तत्पुरुषे विधीयमानस्य टचो 'राजगवीयति' इत्यादौ सुब्लुकि प्रतिषेधः प्राप्नोतीति तद्वारणाय तद्धितग्रहणं क्रियते। राज्ञो गौ राजगवः (राजन् ङस् गो सु टच्) तमिच्छति (राजगव+ अम्+क्यच्) राजगवीयति इत्यत्र क्यजुत्पत्तेः पूर्वमेव निष्पन्नस्य टचः पश्चात् क्यचि सति सुपि लुकि यदि निवृत्तिः न स्यात् तदा तद्धितग्रहणमनर्थकमेव भवति व्यावर्त्याभावात्। एवं तद्धितग्रहणमेव ज्ञापयति पूर्वं निष्पन्नस्यापि कार्यस्य पश्चाद् आगते निमित्ते निवृत्तिर्भवतीति।

इयं परिभाषा भाष्ये 'समर्थानां प्रथमाद्वा' (अ॰ ४.१.८२) इत्यत्र समर्थग्रहणेन ध्वनिता। तत्र हि 'अर्थाभिधाने यत्समर्थं' तद् गृह्यते। तत्पुनः कृतवर्णानुपूर्वीकं पदं- 'सौत्थितिः, वैक्षमाणिः' इत्यादि भवति। यतः तद्धि लोकेऽर्थप्रतिपादनाय समर्थं भवति। विभज्यान्वाख्याने तु सूत्थितस्यापत्यं सौत्थितिरित्यत्र सु उत्थित इत्यस्मादपि प्रत्ययोत्पत्तिः स्यात्। तदा वार्णादाङ्गं बलीय इति सवर्णदीर्घं बाधित्वा वृद्धिरभविष्यत्, ततश्च सावुत्थितिरित्य-निष्टप्रसङ्गः स्यात्। नन्वात्रान्तरङ्गत्वाद् सवर्णदीर्घे कृते पश्चात् प्रत्ययः स्यात्। एवं तर्ह्येतदनेन समर्थवचनेन ज्ञाप्यते- अस्तीयं परिभाषा 'अकृतव्यूहाः पाणिनीयाः' इति। तेन 'पपुषः, तस्थुषः' इत्यादि सिद्धं भवति। अन्तरङ्गत्वात्पूर्वं कृतोऽपीडागम एतत्परिभाषावशान्निवर्तते। तत्र 'पपा+वस् (क्वसु)+ अस् (ङस्)' इति स्थिते इट् च प्राप्नोति, सम्प्रसारणं च। तत्र सम्प्रसारणं बलीयः प्रतिपदविधानादिति। तत्र कृते वलादित्वाभावादिट् नास्तीति सिद्धं- पपुष इति।

न हि प्रवृत्तं वचनशतेनापि निवर्तते इति न्यायस्य इयमपवादभूता लक्ष्यस्थित्या क्वचिदेवाश्रीयते। अन्यथा हि आनुपूर्व्या सिद्धत्वमिति वचनमिदम् अनर्थकं स्यात्।।११४।।

---

'पपुषः, तस्थुषः' इत्यादिषु 'पा+क्वसु+ङस्, स्था+क्वसु+ङस्' इति स्थिते उत्पद्यमानं इट्प्राप्तिदोषं निवारयितुं 'अकृतव्यूहाः पाणिनीयाः' (परि॰ ११४) इति परिभाषा उपन्यस्ता। तत्र कैश्चिद् आचार्यैरेवं प्रकारकाणां दोषाणां परिहाराय प्रस्तूयते एषा **ज्ञापकसिद्धा न्यायसिद्धा च परिभाषा–**

## ११५. निमित्तापाये नैमित्तिकस्याप्यपायः।।

तद्यथा– छत्रनिमित्ता छाया छत्रापाये न भवति। शास्त्रेऽपि ज्ञापकं यदयम् 'उपसर्गात् सुनोति॰' (अ॰ ८.३.६५) इत्यत्र 'स्तौति' इति पठति। कथं कृत्वा ज्ञापकम्? अत्र हि 'ष्टु' इति शब्दः उपदेशे पठितः। तस्य 'धात्वादेः॰' (अ॰ ६.१.६४) इति षकारस्य सकारः कृतः। षत्वनिमित्तञ्च ष्टुत्वम्। तस्यापाये ष्टुत्वस्यापायो भवति। ततः 'स्तौति' इति भवति। एवञ्च कृत्वा 'निमित्तापाये॰' इति सिद्धम्। अन्यत्र च फलम्– 'पपुषः, तस्थुषः' इत्यादौ वल्निमित्तक इट् वलभावे तस्याऽप्यभावः।

निमित्तेन निर्वृत्तं नैमित्तिकम् कार्यम् इत्यर्थः। निमित्तस्य कारणस्य अपाये= नाशे नैमित्तिकस्य कार्यस्याऽभावो भवति।

अकृतव्यूहपरिभाषाया एवेयं प्रपञ्चभूता। तथा च कुलालस्य दण्डचक्रादिना समुत्पन्नो घटो नष्टेऽपि दण्डादिकेऽवस्थीयते एवेति दृष्टान्तेन अकृतव्यूहपरिभाषावद् इयमप्यनित्या।।११५।।

---

आचार्येण 'चक्षिङ् व्यक्तायां वाचि' इति धातुपाठे पठितम्। 'चक्षिङ्' इत्यत्र च ङित्त्वमपि कृतम्, अनुदात्तेत्त्वमपि। इत्संज्ञकः 'इकारः' अनुदात्तोऽस्तीति भावः। तदत्राऽनुदात्तेत्त्वादेव 'अनुदात्तङित आत्मनेपदम्' (अ॰ १.३.१२) इति चक्षिङ आत्मनेपदं सिद्धम्, किमर्थं ङित्त्वम्? ज्ञापनार्थम्। किं ज्ञाप्यम्? क्वचिदनुदात्तेतोऽपि सत आत्मनेपदन्न भवति। अतः तद्यथा स्यादिति कृतं ङित्त्वं चरितार्थम्। तदेवं भवतीयं **ज्ञापकसिद्धा परिभाषा–**

## ११६. अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम्॥

लक्षणम्= निमित्तम्। अनुदात्तेत्त्वं लक्षणं यस्य तत् तथा। अनुदात्तेत्त्वधर्ममाश्रित्य विहितमात्मनेपदम् अनित्यमस्ति। तेन 'धनक्षये वर्धति जाठराग्निः' इत्यत्राऽनुदात्तेतो वृध्–धातोरात्मनेपदन्न जातम्। आत्मनेपदं प्रायिकम्, तदभावः क्वचित्क इति। 'केचिदाहुः' 'भ्राजृ दीप्तौ– इत्यत्र पठितोऽपि 'एजृ भ्रेजृ भ्राजृ दीप्तौ' इत्यत्र पुनः भ्राजधातोः पाठात् परिभाषेयं ज्ञाप्यत इति॥११६॥

---

आचार्येण 'तनादिकृञ्भ्य उः' (अ० ३.१.७९) इत्यत्र कृञ्धातोः पृथग्ग्रहणं कृतम्, यावता कृञ् तु तनादिष्वेव पठ्यते। तनादिभ्यो विधीयमान उप्रत्ययः कृञोऽपि स्यादेव। तदनेन ज्ञायते– सर्वस्यापि गणस्योच्यमानं कार्यं गणस्थस्य (= गणान्तर्गतस्य) कस्यचिदेकस्य धातोर्विषये नापि भवति। तच्चैवं भवतीयं **ज्ञापकसिद्धा परिभाषा–**

## ११७. गणकार्यमनित्यम्॥

गणेन प्रयुक्तं कार्यं गणकार्यम्। शिष्टं सुगमम्। सत्याञ्चाऽस्यां परिभाषायां 'न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत्' इत्येवमादयः प्रयोगाः सिद्धा भवन्ति। श्वसधातोरादादिकत्वेऽपि शप्–लुक् न जात इति॥११७॥

---

'स्तोः श्चुना श्चुः' (अ० ८.४.३९) इति सूत्रे स् च तुश्च इति समाहारद्वन्द्वे ङसि नुमि स्तुनः इति निर्देष्टव्ये नुममकृत्वा यत् स्तोः इति निर्दिशति तेन ज्ञाप्यते भवतीयं **ज्ञापकसिद्धा परिभाषा इति।**

## ११८. आगमशास्त्रमनित्यम्॥

आगमविधायकं शास्त्रम् अनित्यं भवति। कदाचिद् य आगमो विधीयते स नापि भवति। तेन 'अपि शाकं पचानस्य' इत्यत्र 'आने मुक्' (अ० ७.२. ८२) इति मुग्–अभावः सिद्धो भवति। 'क्षुब्धो राजा', 'सागरं तर्तुकामस्य' इत्यादौ इडभावश्च।

'क्षुब्धस्वान्त०' (अ० ७.२.१८) इत्यत्र मन्थार्थे 'क्षुब्ध' इति निपातनादन्ये तु न एतत् सहन्ते॥११८॥

---

विनाऽर्थकस्य 'नञ्' इत्येतस्य समासे सति 'अनुदात्तं पदमनेकम्' इति सूत्रन्यासेन सिद्धे कार्ये यदयम् 'अनुदात्तं पदमेकवर्जम्' (अ० ६.१.१५२) इति वर्जसहितं दीर्घं न्यासं करोति तत्सिध्यतीयं **ज्ञापकसिद्धा परिभाषा–**

## १११९. नञ्घटितम् अनित्यम्॥

यस्मिन् शास्त्रे 'नञ्' इत्यस्य प्रयोगो भवति, तदनित्यं भवति। अर्थाद् तद्विहितं कार्यं नावश्यं भवति। तदनेन 'अनुदात्तं पदमेकवर्जम्' इति वर्जसहितो गरीयान् यत्नः सार्थको भवति। इतरथा हि (= नञ्घटिते 'अनेकम्' इत्येवंरूपे पठिते सति) नित्यो विधिर्न विज्ञायेत। कदाचिदेकम् (उदात्तं स्वरितं वा) वर्जयित्वा शिष्टमनुदात्तं नापि भवेत्। अन्यत्र चेदं फलम्– 'नेयङुवङ्स्थानावस्त्री' (अ० १.४.४) इति विहितो नदीसंज्ञाप्रतिषेधः क्वचिन्नापि भवति। तेन 'हा पितः! क्वासि हे सुभ्रु इत्येवं विललाप सः' (भट्टि) इत्यत्र 'सुभ्रू' इत्येतस्य नदीसंज्ञायां जातायां 'अम्बार्थनद्योर्ह्रस्वः' (अ० ७.३.१०७) इति ह्रस्वत्वं सिद्धम्॥११९॥

---

केचन वैयाकरणा अभिदधति– आचार्येण 'ओर्गुणः' (अ० ६.४.१४६) इत्येतस्य स्थाने 'ओरोत्' इत्येतत् सूत्रं पठनीयं स्यात्, लघुत्वात्। ततो भवतीयं **ज्ञापकसिद्धा परिभाषा–**

## १२०. संज्ञापूर्वको विधिरनित्यः॥

यस्मिन् शास्त्रे (=सूत्रे) किमपि कार्यं संज्ञया बोधितं भवति, तच्छास्त्रम् अनित्यं भवति। 'ओर्गुणः' इत्यत्र हि भसंज्ञकस्य उकारान्तस्य गुणो विधीयते, तदिदं शास्त्रं न नित्यं प्रवर्तते, क्वचिन्नापि प्रवर्तत इत्यर्थः। अत एव 'धाम स्वायम्भुवं ययुः' (कु० सं०) इति प्रयोगे स्वयम्भुव इदं स्वायम्भुवम् इत्यत्र गुणो न जातः। परिभाषा चेयं तदा एव प्रवर्तते यदा सूत्रोपात्ता संज्ञा विधेयस्य बोधिका भवति।

ज्योतिरधिकृत्य कृतो ग्रन्थो ज्योतिषम्– इत्यत्र अणि आदिवृद्धिर्न भवति। 'पञ्चबाणः क्षिणोति' इत्यत्र च उपधागुणो न भवति॥१२०॥

---

**इतोऽग्रे काश्चन परिभाषाः संक्षेपेण प्रस्तूयन्ते–**

## १२१. आतिदेशिकमनित्यम्॥

अतिदेशेन लभ्यं कार्यं नित्यं न भवति। 'स्थानिवदादेशोऽनल्विधौ' (अ० १.१.५५) इति सूत्रेणैवातिदेशे सिद्धे यदयं 'प्रत्ययलोपे प्रत्ययलक्षणम्' (अ० १.१.६१) इत्याह, तेन ज्ञायते भवतीयं परिभाषा। तेन 'जुह्वतु' इत्यत्र लङ्वदतिदेशेन 'सिजभ्यस्तविदिभ्यश्च' (अ० ३.४.१०९) इति लोट्सम्बन्धिनो झेर्जुस् न भवति। इयं परिभाषा भाष्येऽनुक्ताऽपि कैश्चिद् आचार्यैराश्रीयते॥१२१॥

## १२२. सर्वविधिभ्य इड्विधिर्बलवान्॥

'सनि ग्रहगुहोश्च' (अ० ७.२.१२) इत्यत्र चकारस्य 'श्र्युकः किति' (अ० ७.२.११) इत्यत 'उक' इत्येतस्याऽनुकर्षणार्थत्वात् परिभाषेयं ज्ञाप्यते। यदि हि इड्विधिर्बलवान् न भवेत् तदा 'बुभूषति, रुरूषति' इत्यादौ 'भू+स' इत्येतस्यामवस्थायाम् इडागमात् पूर्वं सन्प्रत्ययस्य झलादित्वात् 'इको झल्' (अ० १.२.९) इति सनः कित्त्वे सति 'श्र्युकः किति' (अ० ७.२.११) इत्येव इट्निषेधस्य सिद्धत्वात् उकोऽनुकर्षणाय चकारकरणं व्यर्थं स्यात्॥१२२॥

## १२३. प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम्॥

प्रकृतिं गृहीत्वा यत् कार्यं विधीयते तद् यङ्लुगन्तस्यापि भवति। ज्ञापकं चात्र 'ऊदुपधाया गोहः' (अ० ६.४.८९) इत्यत्र उपधाग्रहणमेव। गोहतेर्धातोरुपधाभूतस्य उकारस्य स्थाने ऊत्वं विधीयते। तच्च लाघवार्थं 'ऊदोर्गोहः' इत्येव वक्तव्यम्। एवं लाघवेन सिद्धे सति यद् गरीयांसं यत्नमारभते तेन ज्ञायते प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणं भवतीति। तथा च जोगुहीति इत्यत्र यङ्लुकि अभ्यासस्थोकारस्य स्थाने ऊकारादेशो मा भूत् इति क्रियमाणमुपधाग्रहणं सार्थकं भवति।

अन्यत्र च 'गमहनजनखनघसां लोपः' क्ङित्यनङि' (अ० ६.४.९८) इति हन्धातोरुच्यमान उपधालोपो जङ्घ्नति इति यङ्लुक्यपि भवति। 'विदो लटो वा' (अ० ३.४.८३) इति विधीयमाना वैकल्पिकणलादयो वेवेद, वेविदतुः, वेविदुः इति यङ्लुक्यपि भवन्ति।

## १२४. शितपा शपानुबन्धेन निर्दिष्टं यद्गणेन च यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि॥

'प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणं भवति' इति परिभाषाया

अतिप्रसक्तिवारणरूपं वचनमभियुक्तैः पठ्यते। कारिकायाम् 'अनुबन्धेन निर्दिष्टम्' इत्यस्याऽभिप्रायो द्विधा गृह्यते– स्वरूपेण= धातोः अनुबन्धसहितपठनेन अथ च 'अनुदात्तङितः०' (अ० १.३.१२) इति 'ङित्' इत्येवंरूपेण। शास्त्रे धातोः शितप्निर्देशेन= शितप्प्रत्ययान्तस्य धातोर्निर्देशेन, शपा= शबन्तस्य निर्देशेन, अनुबन्धनिर्देशेन, गणनिर्देशेन तथा 'एकाच्' इत्येतस्य ग्रहणेन यत् कार्यं विधीयते तद् यङ्लुकि न भवति।

तद्यथा 'नेर्गदनद०' (अ० ८.४.१७) इत्यत्र हन्ति-याति-वाति- इति शितप्निर्देशेन उपसर्गस्थान्निमित्तादुत्तरस्य 'नि' इत्येतस्य नकारस्य णत्वं विधीयते तद् एतेषां धातूनां यङ्लुगन्ते रूपे परतो न प्रवर्तते– प्रन्यजङ्घनीत् (प्र नि हन् यङ्लुक्+लङ् तिप्)। 'सनीवन्तर्ध०' (अ० ७.२.४९) इत्यस्मिन् सूत्रे 'भर' इति (=भृ+शप्) निर्देशस्य सत्त्वात् 'बर्भरिषति'[1] इति इड्विकल्पो न भवति, नित्य एव तु इड् भवति। 'शीङः सार्वधातुके गुणः' (अ० ७.४.२१) इत्यनुबन्धनिर्देशेन विधीयमानो गुणो यङ्लुकि न भवति– शेशीतः (शीङ्+यङ्लुक्+तस्), 'अनुदात्तङितः०' (अ० १.३.१२) इति चात्मनेपदं न भवति– शेशयीति। गणनिर्देशेन च 'रुधादिभ्यः श्नम्' (अ० ३.१.७८) इति रौधादिकस्य भिदेर्यङ्लुकि न भवति– बेभिदीति। 'एकाच उपदेशे०' (अ० ७.२.१०) इति च एकाज्ग्रहणेनोच्यमान इट्प्रतिषेधो यङ्लुकि न भवति– बेभेदिता।।१२४।।

## १२५. चानुकृष्टं नोत्तरत्र।।

चकारेण अनुकृष्टं पदम् अग्रिमेषु सूत्रेषु न सम्बध्यते। कथं ज्ञायते? उच्यते– 'अव्यये यथाभिप्रेताख्याने कृञः क्त्वाणमुलौ' (अ० ३.४.५९) इत्यत्र णमुल्ग्रहणं न कर्तव्यं क्त्वा च इत्येव वक्तव्यम्। चकारेण प्रकृतो णमुलनुकृष्यते एवं लाघवेन सिद्धे सति पुनर्णमुल्ग्रहणं करोति तेन ज्ञापयति चानुकृष्टस्योत्तरत्र अनुवृत्तिर्न भवतीति। अत उत्तरत्र द्वयोरपि क्त्वाणमुलोर्युगपदनुवृत्तिर्यथा स्यादिति पुनर्णमुल्ग्रहणं करोति।

तेन 'वदः सुपि क्यप् च' (अ० ३.१.१०६) इत्यत्र चकारेणानुकृष्टो यत्प्रत्ययः 'भुवो भावे' (अ० ३.१.१०७) इत्यत्र नानुवर्तते। क्यबेव भवति ब्रह्मभूयमिति।

---

१. भृधातोर्यङ्लुगन्तात् सनि एतद् रूपम् (बर्भर्+स+ति)।

अनित्या च इयम्। तथा च 'प्रातिपदिकान्तनुम्विभक्तिषु च' (अ० ८.४.११) इत्यत्र चानुकृष्टमपि विकल्पं निवर्तयितुं 'एकाजुत्तरपदे णः' (अ० ८.४.१२) इति पुनर्णग्रहणादवसीयते। तेन 'तृतीया च होश्छन्दसि' (अ० २.३.३) इति चकारेणानुकृष्टापि द्वितीया उत्तरत्र 'अन्तरान्तरेणयुक्ते' (अ० २.३.४) इत्यत्र अनुवर्तत एव॥ १२५॥

## १२६. क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते॥

क्वचिद् अपवादस्य विषयेऽप्युत्सर्गः प्रविशति। अर्थात् प्रवृत्ते अप्यपवादे पश्चादुत्सर्गस्य प्रवृत्तिर्दृश्यते। परिभाषायामपवादशब्दो बाधकपर इति।

तदनेन 'प्रदीयतां दाशरथाय मैथिली' इति 'अत इञ्' (अ० ४.१.९५) विषये 'प्राग्दिव्यतोऽण्' (अ० ४.१.८३) इति सिध्यति। ज्ञापकं चात्र 'कटं कारको व्रजति' इति द्वितीयार्थम् 'अकेनोर्भविष्यदाधमर्ण्ययोः' (अ० २.३.७०) इति षष्ठीनिषेधवचनम्। तद्धि भविष्यति 'अण् कर्मणि च' (३.३.१२) इति अपवादविषये ण्वुलि सत्युपपद्यते नान्यथा। क्वचिद्ग्रहणेन च परिहृत्याऽपवादविषयमुत्सर्गोऽभिनिविशते (परि० ५५) इति व्यवस्था सूच्यते इति॥१२६॥

## १२७. अपवादो यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यते॥

अन्तरङ्गोत्सर्गेणाऽपवादस्य बाधेऽयमेव हेतुरस्ति यदपवादो यदा निरवकाशो न भवति अर्थात् अन्यत्र चरितार्थो भवति तदा बाधकताबीजात् शून्यं जायते। तदेवं समानाश्रयः (समाननिमित्तकः) सवर्णदीर्घैकादेशः (अयज् शप् लङ्= अयज् अ+इ+इन्द्रम् इत्यादौ) अन्तरङ्गेण गुणैकादेशेन बाध्यते। यद्यपि यणो गुणस्य चोभयस्यापि सवर्णदीर्घोऽपवादोऽस्ति तथापि अपवादभूतः सवर्णदीर्घोऽन्यत्र (श्री+ईशः= श्रीशः इत्यत्र यणं बाधित्वाऽथ च दण्ड+अग्रम्= दण्डाग्रम् इत्यत्र 'आद्गुणः' (अ० ६.१.८४) इति प्राप्तं गुणं बाधित्वा) चरितार्थोऽस्ति। सवर्णदीर्घविधिश्च यणा गुणविधिना च सह समानाश्रयोऽप्यस्ति। 'आश्रय' इत्यनेन स्थानी निमित्तञ्च उभयमपि गृह्यते। यान् वर्णान् उपादाय सवर्णदीर्घः प्राप्नोति तानेव यण् गुणश्चेति।

अस्याश्च परिभाषाया विषय एवंभूतोऽन्तरङ्गविधिर्भवति यस्य निमित्तानि बहिरङ्गाऽपवादापेक्षया उच्चारणक्रमेण पूर्वोपस्थितानि भवन्ति। यत्र तु स्थानिनो

निमित्तस्य च एकतायामपि सत्यां पूर्वोपस्थितिनिमित्तरूपान्तरङ्गता न भवति, तत्राऽपवाद एव उत्सर्गं बाधते इति।।१२७।।

## १२८.उपजनिष्यमाणनिमित्तोऽप्यपवाद उपसञ्जातनिमित्तमप्युत्सर्गं बाधते।।

## अथवा–

## उपसञ्जातनिमित्तोऽप्युत्सर्ग उपजनिष्यमाणनिमित्तेनापवादेन बाध्यते।।

तेन 'ददति' इत्यत्र उपजातनिमित्तमप्यन्तरङ्गं 'झोऽन्तः' (अ० ७.१.३) इत्यन्तादेशमुपजनिष्यमाणनिमित्तः 'अदभ्यस्तात्' (अ० ७.१.४) इत्यदादेशो बाधते। स्पष्टं चैतत् 'उभे अभ्यस्तम्' (अ० ६.१.५) इति सूत्रे भाष्ये।।१२८।।

## १२९. यो ह्यनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवत्।।

यो हि 'अचः परस्मिन्'० (अ० १.१.५६) इति स्थानिवद्भावः सोऽनादिष्टादचः पूर्वस्य कार्ये भवति। तेन 'पटयति' इत्यत्र टुशब्दो-कारादनादिष्टादचः पूर्वो यः पशब्दस्याऽकारस्तस्य 'अत उपधायाः' (अ० ७.२.११६) इति वृद्धिं प्रति लोपः स्थानिवद् भवति। आदिष्टादचः पूर्वस्य कार्ये तु न स्थानिवत्त्वं यथा 'वैयाकरणः, सौवश्वः' इति। तेन 'एचोऽयवायावः' (अ० ६.१.७५ इति न भवति। अत्र ह्यचः पूर्वयोरैचोः संभवो नास्ति यकारवकाराभ्यां पूर्वयोरैचोर्विधानात्। ज्ञापकं चास्याः 'अभ्यासस्यासवर्णे' (अ० ६.४.७८) इत्यत्रासवर्णग्रहणम्। यदि ह्यादिष्टाचः पूर्वस्यापि कार्ये स्थानिवत्त्वं स्यात् तदा 'इयेष, उवोष' इत्यादिषु प्रकृतसूत्रोदाहरणेषु गुणस्य स्थानिवत्त्वेन असवर्णपरत्वं न स्यादिति असवर्णग्रहणं व्यर्थमेव स्यात्। अतो अवसीयते अनादिष्टाचः पूर्वस्यैव विधौ स्थानिवदिति। अथ चास्य वचनस्याऽभावे हि 'अपीपचत्' इत्याद्यपि न सिध्येत्, अपपचत् इति स्यात्। तथा हि णिजन्ताल्लुङि द्विर्वचनात् पूर्वमुपाधाह्रस्वत्वम् इति सिद्धान्तात् पूर्वमुपधाह्रस्वत्वे ततो द्विर्वचनेऽनादिष्टाद्=स्थानिभूतादचः पूर्वस्याऽभ्या- सस्याऽभावात् सन्वद्भावे कर्तव्ये प्रकृतपरिभाषया 'अचः परस्मिन्' इति स्थानिवद्भावो न भवति। तथा च सति लघुनि धात्वक्षरे अभ्यासस्य विधीयमानः सन्वद्भावो जायत एवेति।।१२९।।

## १३०. औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणम्॥

उपदेशे भव औपदेशिकः, प्रयोगे भवः प्रायोगिकः। 'अध्यात्मादित्वाट् ठञ्' (वा० ४.३.६०)। तयोर्मध्ये औपदेशिकस्यैव ग्रहणम्। तद्यथा 'तरप्तमपौ घः' (अ० १.१.२१) इति प्रत्ययस्यैव तरपो घसंज्ञा ब्राह्मणितरेति। न तु तॄधातोरप्प्रत्यये[१] कृते यः प्रयोगस्तस्य 'नदीतरः' इति। यदि तु स्याद् 'घरूप०' (अ० ६.३.४२) इति ह्रस्वः स्यात्।

तत्र तत्रोपदेशग्रहणं कुर्वतः सूत्रकृतोऽसंमतेयम्। तथा हि सत्यां ह्यस्यां परिभाषायामुपदेशग्रहणं न कुर्यात्॥१३०॥

## १३१. वत्स्र्यत्प्रवृत्त्येह कार्याणि क्रियन्ते॥

भविष्यन्तीं प्रवृत्तिमाश्रित्य कार्याणि क्रियन्ते इत्यर्थः। 'शदेः शितः' (अ० १.३.६०) इत्यनेन भाविना शित्त्वेन 'शीयते' इत्यत्रात्मनेपदम्। तथा 'निन्यतुर्निन्युः' इत्यादौ भविष्यदनेकाच्त्वेन द्विर्वचनात् प्रागेव 'एरनेकाचोऽसंयोगपूर्वस्य' (अ० ६.४.८२) इति यणादेशोऽन्यथेयङ् स्यात्।

'अन उपधालोपिनोऽन्यतरस्याम्' (अ० ४.१.२८) इति भविष्यदुपधा-लोपिनो ङीब्विधानं चास्या ज्ञापकम्। अन्यथा सति ङीपि उपधालोपः, सति चोपधालोपे ङीबित्यसङ्गतिः स्यात्।

केचित्तु 'वस्वेकाज्०' (अ० ७.२.६७) इत्यत्र एकाज्ग्रहणम् अस्या ज्ञापकं वर्णयन्ति। तद्धि लिटि द्विर्वचनस्यावश्यकत्वान्न कश्चिद् एकाजस्तीति भविष्यदभ्यासलोपप्रवृत्तेरुत्तरकालं भावी य एकाच् तदर्थं कृतमिति॥१३१॥

## १३२. पर्जन्यवदिह लक्षणप्रवृत्तिः॥

इह व्याकरणे पर्जन्यवत् मेघवल्लक्षणं प्रवर्तते। तदुक्तं कृतकारि खल्विदं शास्त्रं मेघवन्नाकृतकारि अग्निवत्, अग्निर्हि दग्धं न दहति। तेन 'खट्वा+आढकम्' इत्यादौ दीर्घः सिध्यति। मेघो हि जलेऽपि वर्षति। ज्ञापकं चात्र 'प्रवाहणस्य ढे' (७.३.२८) इति वृद्धस्यापि वाहनशब्दस्य पुनर्वृद्धिप्रतिषेधं शास्त्रि॥१३२॥

---

१. 'ॠ दोरप्' (अ० ३.३.५७) इत्यनेन।

## १३३. गर्भवट्टाबादयो भवन्ति॥

यथा मध्ये गर्भस्तथा टाबादयः स्त्रीप्रत्ययाः प्रातिपदिकस्वाद्योर्मध्ये भवन्ति। का के काः इति कादेशे कृते टाब् भवति। आदिग्रहणात् 'अर्वणस्त्रासावनञः' (अ० ६.४.१२७) इति विभक्तौ त्रादेशे कृते 'उगितश्च' (अ० ४.१.६) इति ङीप् 'अर्वत्यौ, अर्वत्यः' इति केचिदाहुः। क्रोष्टुशब्दाद्विभक्तौ 'स्त्रियां च' (अ० ७.१.९६) इति तृज्वद्भावे क्रोष्ट्रीभ्यां क्रोष्ट्रीभिरित्यन्ये।

ज्ञापकं चात्र 'न यासयोः' (अ० ७.३.४५) इतीत्त्वप्रतिषेधार्थं वचनम्। यदि गर्भवट्टाबादयो न स्युस्तदा विभक्तौ त्यदाद्यत्वे कृते गर्भवट्टापोऽभावात् 'यका सका' इति न स्यात्। एवं च 'प्रत्ययस्थात्०' (अ० ७.३.४४) इतीत्त्वप्राप्तेरभावात् 'न यासयोः' (अ० ७.३.४५) इत्यनर्थकं स्यात्।।१३३।।

## १३४. विधौ परिभाषोपतिष्ठते नानुवादे॥

तेन 'क्ङिति च' (अ० १.१.५) इत्यत्र 'क्ङिति' इत्यस्य गुणवृद्धिभ्यां सम्बन्धात् 'तस्मिन्निति निर्दिष्टे०' (अ० १.१.६५) इति परिभाषा नोपतिष्ठते। तेन क्ङिन्निमित्ते प्रत्यये निषेधात् 'भिन्नम्' इत्यादावपि निषेधः सिद्धो भवति।

प्रधानाऽप्रधानन्यायलब्धोऽयमर्थः। ज्ञापकं चात्र 'उदीचामातः स्थाने०' (अ० ७.३.४६) इत्यत्र स्थानप्रतिपत्त्यर्थं स्थानग्रहणम्। यदीयं परिभाषा न स्यात् 'षष्ठी स्थानेयोगा' (अ० १.१.४८) इत्येव 'स्थाने' इत्यर्थो लब्धः स्यात्।।१३४।।

## १३५. पूर्वत्रासिद्धीये न स्थानिवत्॥

तेन पापक्तिः[1] यायष्टिरित्यादौ पूर्वत्रासिद्धाधिकारीये कुत्वे षत्वे च कर्तव्येऽतो लोपस्याऽस्थानिवत्त्वाज्झलादौ कुत्वं षत्वं च सिध्यति। अनित्या चेयं। 'न पदान्त०' (अ०१.१.५७) इत्यत्र द्विर्वचनग्रहणाद्- इति।।१३५।।

## १३६. णौ कृतं स्थानिवत्॥

णौ परतो यद् वृद्ध्यादिकं कृतं तद् द्विर्वचने कर्तव्ये स्थानिवत् स्यात्। तेन 'शुशावयिषति, जुहावयिषति' इत्यादावभ्यासस्य उवर्णान्तत्वं सिद्धं भवति। अशूशवदित्यत्र तु श्विधातोर्वकारस्य संप्रसारणं णौ कृतमपि द्विर्वचने न स्थानिवद् भवति। अजादेशस्यैव णौ कृतस्य द्विर्वचने स्थानिवदित्यभ्युपगमात्। एतच्च द्विर्वचनेऽचि भाष्ये उक्तम्।

---

१. पापच्य+ति= पापच्य्०+ति= पापच्+ति।

ज्ञापकं चात्र 'ओः पुयण्ज्यपरे' (अ० ७.४.८०) इत्यत्राऽभ्यासविशेषणम् 'ओः' इति पदम्। तेन हि पवर्गे यणि जकारे चाऽच्परेऽभ्यासस्य इत्त्वं विधीयते- 'बिभावयिषति' इत्यादिषु। यदि च णौ कृतं वृद्धि-आवादेशादिकार्यं स्थानिवन्न स्यात् कथमभ्यासस्य उकारस्य इत्त्वं विधीयते। तुल्यजातीयापेक्षत्वाच्च ज्ञापकस्य अवर्णपराणां पुयण्जां सदृशा अन्ये अवर्णपरा एव स्थानिवद्भावं भजन्ते। तेन 'अचिकीर्त्तत्' इत्यादौ न स्थानिवद्भावः। अथवा 'ज्ञापकसिद्धं न सर्वत्र' (परि० १०४) इति दिगनुसंधेया।।१३६।।

## १३७. इतरेतराश्रयाण्यपि कार्याणि शास्त्रे प्रकल्पन्ते।।

इतरेतराश्रयाणि कार्याणि विरोधान्न प्रवर्तन्त इति न्यायः। यदुक्तमितरेतराश्रयत्वादप्रसिद्धिरिति तदपवादोऽयमारभ्यते। अपिशब्दः क्वचिदर्थे तदयमर्थः क्वचिदितरेतराश्रयाणि प्रवर्तन्ते इति। यथा वनसिंहयोः परस्पराश्रयापि रक्षा प्रवर्तते तथा शास्त्रे गार्गीय इत्यादौ वृद्धिसंज्ञया भावितस्यापि वृद्धिसंज्ञाप्रक्लृप्तिः अन्यथा शाला-रै-नौ प्रभृतिषु सावकाशा वृद्धिसंज्ञा इतरेतराश्रयत्वान्न स्यात्। ज्ञापकं चात्र 'इग्यणः सम्प्रसारणम् (अ० १.१.४४) इत्यत्र सम्प्रसारणसंज्ञेति इतरेतराश्रयत्वम्।।१३७।।

## १३८. विधिविधानविधिभाजां त्रयाणां सन्निधाने तदन्तविधि-र्भवति।।

तेन 'एरच्' (अ० ३.३.५६) इति इवर्णान्तादच् प्रत्ययो भवति। इयं परिभाषा 'येन विधिः०' (अ० १.१.७१) इति सूत्रस्यैव लब्धोऽर्थः पठ्यते। येनेति करणे तृतीया, न चाकर्तृकं करणमस्तीति कर्ताऽप्याश्रितः। स पुनरिह संबन्धिशब्दत्वादन्तशब्देनाऽवयववाचिना संनिधापितः समुदायो विज्ञायते। स च कर्ता त्रिभिः प्रकारैः संनिहितो भवति। क्वचिन्निर्देशात्। यथा 'ईदूदेद् द्विवचनम्०' (अ० १.१.११) इति द्विवचनं कर्तृभूतं निर्दिष्टं सत् तद् ईदादिभिः करणैः प्रगृह्यसंज्ञां विदधाति। क्वचित् प्रकरणात्। यथा 'अचो यत्' (अ० ३.१.९७) इत्यत्र धातोरित्यधिकारात् प्रकरणाद् धातुः कर्ता संनिधापितः स अचा करणेन यतं विदधाति। क्वचिच्च सामर्थ्यात्। यथा 'इको झल्' (अ० १.२.९) इत्यत्र धातोरेव च सन् विधीयते इति सामर्थ्याद्धातुः कर्ता संनिधापित इका करणेन सनः कित्त्वं विदधाति। तदेवं 'येन विधिः०' (अ० १.१.७१) इत्यस्य सूत्रस्यार्थ एवायमेवंविधो यद् विधिविधानविधिभाजां त्रयाणां संनिधाने

तदन्तविधिर्भवति। 'एचोऽयवायावः' (अ० ६.१.७५) इत्यादौ विधिभाजोऽसंभवान्न प्रवर्तते। शब्दरूपं तु कर्तृत्वेन नाश्रीयतेऽति- प्रसङ्गाद्।।१३८।।

## १३९. असति संभवे बाधनं भवति। अस्ति च संभवे यदुभयं स्यात्।।

कार्ययोर्विरोधाद् असति समावेशसद्भावे बलवता एकेन अपरस्य बाधनं भवति। तद्यथा- 'गोदः' इति कप्रत्ययेनाऽण्प्रत्ययस्य बाधनं भवति। यथा च 'वृक्षेभ्यः' इत्यत्र एत्वेन दीर्घस्य। यदि त्वस्ति सम्भवस्तदा उभयमपि भवति। यच्शब्दो यद्यर्थे तदाशब्दश्चाऽध्याहार्यः। यथा 'केकयमित्रयु प्रलयानां०' (अ० ७.३.२) इत्यत्र इयादेशेऽपि कृते वृद्धिः। कैकेयः। प्रालेयः। अथ 'तथाजातीयः' इत्यत्र च थाल्जातीययोः सम्भवः।।१३९।।

नन्वेवमौपगव इत्यादौ आदिवृद्ध्या अन्त्यवृद्धिबाधो न स्यादित्याह-

## १४०. सत्यपि संभवे बाधनं भवति।।

स्पष्टम्। तद्यथा लोकेऽपि दृश्यते- ब्राह्मणेभ्यो दधि दीयतां तर्कं कौण्डिन्याय। सत्यपि सम्भवे तक्रदानं दधिदानस्स बाधकं भवति। एवञ्च कृत्वा तक्रकौण्डिन्यन्यायमूलकमेतदिति।।१४०।।

## १४१. क्वचिद् विकृतिरपि प्रकृतिं गृह्णाति।।

तेन 'निसमुपविभ्यो ह्वः' (अ० १.३.३०) इति ह्वाधातोरात्मनेपदम् उच्यमानं प्रकृतिभूतादपि भवति। निह्वयते। अथवा 'दाधा घ्वदाप्' (अ० १.१.१९) इत्यत्र दाधाग्रहणे प्रकृतिभूतयोरपि देङ्धेटोर्ग्रहणम्। प्रणिदयते, प्रणिधयति- इति।।१४१।।

## १४२. क्रियाविशेषणानां कर्मत्वं नपुंसकलिङ्गता च।।

तद्यथा- मृदु पठति। शोभनं पचति। 'तत्प्रत्यनुपूर्वमीपलोमकूलम्' (अ० ४.४.२८) इति क्रियाविशेषणकर्मद्वितीयान्ताट् ठग्विधानं चास्याः सत्त्वे लिङ्गम्।।१४२।।

## १४३. श्रुतानुमितयोः श्रौतः सम्बन्धो बलीयान्।।

तेन 'अचो रहाभ्यां द्वे' (अ० ८.४.४८) इत्यत्र रहाभ्यामिति साक्षाच्छ्रुतेन निमित्तभावेन यरन्तर्भावादनुमितं कार्यित्वं= कार्याश्रयित्वं बाध्यते। तेन 'मद्रह्रदः'

इत्यत्र रेफस्य द्वित्वं न भवति।

अयं च लौकिकन्यायलब्धोऽर्थः। तथा च पठन्ति– 'साक्षाच्छिष्टेन अनुमितं बाध्यते', 'प्रत्यक्षानुमितयोः प्रत्यक्षं बलीयः'। एतदेव कुतः? अनुमानात् प्रत्यक्षमन्तरङ्गं प्रत्यक्षपूर्वकत्वादनुमानस्य।।१४३।।

## १४४. विधिनियमसम्भवे विधिरेव ज्यायान्।।

तेन 'ह्वावामश्च' (अ० ३.२.२) इत्यत्र सोपसर्गादण् सिद्ध एभ्य एव सोपसर्गेभ्यो नान्येभ्य इति नियमो न भवति। तथा हि भाष्यम्– कैमर्थक्यान्नियमो भवति? विधेयं नास्तीति कृत्वा। अर्थात् सति विधेये नियमो न भवति।।१४४।।

## १४५. संदेहे बहुवचनं प्रयोक्तव्यम्।।

यथा कति भवतः पुत्रा इति। तथा चाह भाष्यकारः– 'अनिर्ज्ञातेऽर्थे बहुवचनं प्रयोक्तव्यम्' इति (म० भा० २.२.२५)।।१४५।।

## १४६. अर्थवशाद् विभक्तिविपरिणामः।।

यथा 'उच्चानि देवदत्तस्य गृहाणि आमन्त्रयस्वैनम्' इति। तेन 'लिङः सलोपोऽनन्त्यस्य' (अ० ७.२.७९) इत्यत्र सप्तम्यन्तं सार्वधातुकपदं षष्ठ्यन्ततया विपरिणम्यते।।१४६।।

## १४७. अगत्या हि खलु परिभाषाश्चाश्रीयन्ते।।

इदमपि वचनं युक्तमेव। परिभाषा हि नाम न साक्षात् पाणिनीयवचनानि। किं तर्हि? नानाऽऽचार्याणाम्। तत्र पाणिनीये शब्दानुशासने यत्रैव क्वचिदिष्टविषये मुख्यलक्षणेन न सिद्धिस्तत्रैवैता गत्यन्तरम्– पश्यद्भिराश्रीयन्ते। यत्र त्वेतत्समाश्रयणे दोष एव प्रसज्यते तत्र नाश्रीयन्ते। एतत्परिभाषाश्रयणेन नानिष्टासञ्जनं कर्तव्यमित्युक्तं भवति।।१४७।।

## १४८. पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण।।

तेन धातूपसर्गस्यात्र दर्शने बहिरङ्गत्वेन सुटोऽसिद्धत्वात् 'संस्कृषीष्ट' 'समस्कृत' इत्यादौ 'ऋतश्च संयोगादेः' (अ० ७.२.४३) इति इण् न भवति। तथा 'संस्क्रियते' इत्यत्र 'ऋतश्च संयोगादेर्गुणः' (अ० ७.४.१०) इति गुणो न भवति। नन्वस्मिन् दर्शने समचिस्करदित्यत्र ण्यन्ताल्लुङि चङि सुटोऽसिद्धत्वात् 'दीर्घो लघोः' (अ० ७.४.९४) इति प्राप्नोति। यदि दीर्घत्वं नेष्यते तदा

प्रतिविधेयम्। क्रियासाधनयोर्निमित्तिनिमित्तभावेन सम्बन्ध- स्यान्तरङ्गत्वात् पूर्वं धातुः साधनेन युज्यत इतीदमेव सम्यग् दर्शनमिति केचिदाहुः। धातुरेवाऽनेकार्थाभिधायी, उपसर्गास्तु तत्-तदर्थस्य द्योतका इति कृत्वा भूधातुरेवाऽनुभवनार्थे वृत्तः कर्मणि लकारम् उत्पादयिष्यतीति अनुभूयते सुखं देवदत्तेन' इत्यत्र पूर्वं साधनयोगेऽपि न कश्चिद् दोषः। पश्चात्तु सोऽर्थोऽनुना द्योत्यत इति।।१४८।।

## १४९. अन्ये तु पूर्वं धातुरुपसर्गेण युज्यते पश्चात् साधनेनेत्याहुः।।

तेन 'नेर्विशः' (अ० १.३.१७) इत्यत्रात्मनेपदनियम उपपद्यते। अन्यथादौ साधनसम्बन्धे शेषत्वेन परस्मैपदप्रसङ्गात् कथन्तद् उपपद्येत।

एतयोरुभयोरपि वचनयोर्वैयाकरणनिकाये प्रसिद्धत्वात् लक्ष्यसिद्धिवशात् क्वचित्तु किञ्चिदाश्रीयत इति।।१४९।।

## १५०. लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिः।।

उखधातोर्लिटि ऊखतुरित्यादौ ह्रस्वस्यापि पर्जन्यवल्लक्षणप्रवृत्त्या अभ्यासह्रस्वत्वे ततो सवर्णदीर्घे पुनर्ह्रस्वो न भवति। लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिरिति। 'इरयो रे' (अ० ६.४.७६) इति द्विवचननिर्देशोऽस्या ज्ञापक इति भाष्यकैयटयोः।।१५०।।

## १५१. समासकृत्तद्धितेषु भावप्रत्ययेन सम्बन्धाभिधानमन्यत्र रूढि-अभिन्नरूप-अव्यभिचरितसम्बन्धेभ्यः।।

समासकृत्तद्धितेषूत्पन्नो भावप्रत्ययः सम्बन्धमाह। यथा नीलोत्पलत्वं पाचकत्वं दण्डित्वमिति। रूढि-अभिन्नरूप-अव्यभिचरितसम्बन्धेभ्यस्तु न भवति सम्बन्धाभिधानम्। रूढिर्यथा तैलपायिकात्वम् इति। कुम्भकारत्वमित्यादौ समासादुत्पन्नो भावप्रत्ययः क्रियासम्बन्धं नाभिदधाति। किं तर्हि? जातिम्। अभिन्नरूपं यथा 'पूरणाद् भागे तीयादन्' (अ० ५.३.४८) इति 'तृतीयः' इत्यत्र हि भावप्रत्ययेऽपि कृते भागमात्रमुच्यते न तु सम्बन्धः। अव्यभिचरितसम्बन्धेभ्यो यथा सत्ताशब्दः। अयं सच्छब्दः उत्पत्तिमत्स्वपि पदार्थेषु न सम्बन्धं व्यभिचरतीति तदुत्पन्नो भावप्रत्ययः सामान्यमभिदधाति न तु क्रियासंबन्धम्।।१५१।।

## १५२. अव्यक्ते गुणसंदेहे नपुंसकलिङ्गं प्रयोजयेत्॥

अव्यक्तेषु पुंस्त्वादिषु धर्मेषु नपुंसकलिङ्गं प्रयोजयेत्। यथा किं तस्या गर्भे जातम्। इदमपि युक्तमेव नपुंसकलिङ्गस्य सर्वनामतुल्यत्वात्॥१५२॥

## १५३. निमित्तिकार्यं न तन्निमित्तस्य॥

निमित्तित्वेन कार्यं निमित्तिकार्यं यत् तत् निमित्तस्य निमित्तत्वेन उपात्तस्य न भवति। यथा– 'अचो रहाभ्यां द्वे' (अ० ८.४.४६) इति, 'अनचि च' (अ० ८.४.४७) इति यरो द्विर्वचनं यरन्तर्भावे सति रहोर्न भवति, रहाभ्यामिति निमित्तत्वेनोपादानात्। ज्ञापकं चात्र 'कन्थापलद...ग्रामह्रदोत्तरपदात्' (अ० ४.२.१४१) 'स्पर्धायामाङः' (अ० १.३.३१) इति यथाक्रमम् 'अचो रहाभ्यां द्वे' इति 'अनचि च' इति द्विर्वचनाकरणमिति। श्रुतानुमितपरिभाषाया एवायं प्रपञ्च इति॥१५३॥

## १५४. परार्थाभिधानं वृत्तिः॥

अभिधीयतेऽनेन इत्यभिधानम्, करणे ल्युट्, सामान्ये नपुंसकम्। परश्चासौ अर्थः= परार्थ, परार्थस्य अभिधानम्= परार्थाभिधानम्। विग्रहवाक्याऽ-वयवपदार्थेभ्यः परः= अन्यो योऽयं विशिष्टैकार्थरूपः, तत्प्रतिपादिका वृत्तिर्भवति। समासादिषु प्रयुज्यमानानि पदानि यदा स्वीयमर्थं पूर्णतो अंशतो वा त्यक्त्वा किञ्चिद् विशिष्टमर्थम् अभिदधति तदा तद् पूर्वाचार्यैर्वृत्तिरित्युच्यते। वृत्तौ हि पृथक्– पृथक् पदानामर्थो मिश्रीभूय एकाकारतामिव आपद्यते। यथा 'राजपुरुषः' इत्यत्र राजविशिष्टः पुरुष इत्येको नवीनोऽर्थः समुत्पन्नः। अत एव वृत्तौ पदार्थैकदेशत्वाद् विशेषणसम्बन्धो न भवति। अर्थात् न कदाचिद् भवति 'ऋद्धस्य राजपुरुषः' इति॥१५४॥

## १५५. यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यम्॥

## १५६. यस्य च लक्षणान्तरेण निमित्तं विहन्यते तदप्यनित्यम्॥

नेमे वाचनिक्यौ। सप्तमे (म० भा० ७.१.२३) कैयटेन एतदुपष्टम्भकं लोकव्यवहारद्वयमुदाहृतम्– बालिसुग्रीवयोर्युध्यमानयोर्भगवता बालिनि हतेऽपि सुग्रीवस्य बालिनः प्राबल्यं न व्यवहरन्ति, कृष्णसहायैः पाण्डवैर्जये लब्धेऽपि पाण्डवानां प्राबाल्यं व्यवहरन्ति चेति। एवञ्च सर्वमिदं लक्ष्यानुरोधाद् व्यवस्थितम्॥१५५-१५६॥

## १५७. स्वरभिन्नस्य प्राप्नुवन् विधिरनित्यो भवति॥

(म॰ भा॰ २.४.८५)

यत्र त्वेकस्यैव कार्यस्य परत्वं नित्यत्वञ्च, तत्रेच्छयाऽन्यतरद् उभयं वा तस्य बलवत्त्वे नियामकम् उल्लेख्यम्। अत एव तत्र तत्र परत्वान्नित्यत्वाच्चेति भाष्य उच्यते॥१५७॥

नन्वनुदात्तादेरन्तोदात्ताच्च यदुच्यते तद् व्यञ्जनादेर्व्यञ्जनान्ताच्च न प्राप्नोतीत्यत आह–

## १५८. स्वरविधौ व्यञ्जनमविद्यमानवत्॥ (म॰ भा॰ ६.१.२२३)

स्वरविधौ= स्वरोद्देश्यके विधावित्यर्थः। 'नोत्तरपदेऽनुदात्तादावपृथि–वीरुद्रपूषमन्थिषु' (अ॰ ६.२.१४१) इति सूत्रे पृथिव्यादिपर्युदासोऽस्या ज्ञापकः। कथम्? पृथिव्यादीनामनुदात्तादित्वाऽभावात् किं प्रतिषेधेन? तत्तु पुनरुक्तार्थस्य ज्ञापकमेव।

परिभाषाया अस्या ज्ञापकस्थलसाधर्म्यात् स्वरोद्देश्यकविधिविषयमिदम्। अत एव 'शतुरनुमो नद्यजादी' (अ॰ ६.१.१६७) 'अचः कर्तृयकि' (अ॰ ६.१.१८९) इत्यादौ 'अजादी' 'अचः' इत्यादेश्चारितार्थ्यम्। अत एव 'राजवती' इत्यादौ नलोपस्यासिद्धत्वाद् अन्वतीशब्दत्वाद् 'अन्तोऽवत्याः' (अ॰ ६.१.२१४) इति स्वरो न, 'उदश्वित्वान्' इत्यत्र च 'ह्रस्वनुड्भ्यां मतुप्–(अ॰ ६.१.१७०) इति मतुबुदात्तत्वञ्च नेति॥१५८॥

**इत्याचार्यप्रद्युम्नकृतं संस्कृतभाषामयं 'पारिभाषिको' नाम परिभाषाव्याख्यानं पूर्त्तिमगात्।**

# प्रथमं परिशिष्टम्

## संज्ञापरिभाषाणां यथोद्देशकार्यकालविषयको गुह्याभिप्रायः

संज्ञानां परिभाषाद्वयमाह–

**कार्यकालं संज्ञापरिभाषम्।**
**यथोद्देशं संज्ञापरिभाषम्।**

'कार्यस्य कालः (देशः) एव कालो यस्य तत् कार्यकालम्' अथवा कार्येण काल्यते स्वसन्निधिं प्राप्यते इति कार्यकालः।[१]

उद्देशम् अनतिक्रम्य यथोद्देशम्- अव्ययीभावः। उत्पूर्वाद् उच्चारणार्थकाद् दिश्धातोरधिकरणे घञ्प्रत्ययः। उद्दिश्यते उच्चार्यतेऽत्रेत्युद्देशः। उच्चारणदेशः= आम्नानप्रदेशः। संज्ञाश्च परिभाषाश्च संज्ञापरिभाषम्।

इह व्याकरणशास्त्रे संज्ञाः परिभाषाश्च तत्तद्विधिशास्त्रस्य संस्कारिकाः, तत्तत्शास्त्रविहितकार्यस्य निर्वाहिकाः, अथवा कार्यस्य निर्वाह उपकारिका भवन्तीति विषये निम्नोक्तं पक्षद्वयं प्रतिष्ठितमस्ति–

**१. कार्यकालः–** संज्ञा वा परिभाषा वा स्वलिङ्गलिङ्गिते विधिशास्त्रे साक्षाद्रूपेणैव उपस्थिता भवन्ति। विधिवाक्येषु उपस्थितासु हि तासु विधिवाक्यानां पूर्णो निश्चयात्मको बोधो जायते, अन्यथा हि तानि विधिवाक्यानि अपूर्णार्थकानि कार्यनिर्वाहे चासमर्थान्येव। इयं शास्त्रीयभाषायां 'पदैकवाक्यता' इत्युच्यते।[२]

**२. यथोद्देशम्–** संज्ञा वा परिभाषा वा स्वीयम् उद्देशम् (= उच्चारणस्थानम्) अपरित्यजन्त्यः स्वकीयम् अर्थम् (यद्धि विधिशास्त्रेण अपेक्षितमस्ति) स्वलिङ्गलिङ्गिते विधिशास्त्रे समर्पयन्ति, न त्वेतास्तत्रोपस्थिता भवन्ति। एवंविधाम् एकवाक्यतां शाब्दिकाः 'वाक्यैकवाक्यता' इत्याहुः। यथा- 'मृजेर्वृद्धिः' (अ० ७.२.११४) इति उपजीवकम् (उपकार्यम्) अस्ति। 'वृद्धिरादैच्' इति च उपजीव्यम् (= उपकारकम्)। स्वरूपेणोपस्थिते एकत्र संनिहिते इमे द्वे अपि (विधिशास्त्रं संज्ञा च) स्वीयं स्वीयम् अर्थम् (यद्धि

१. नागेशभट्टेन कार्यकालशब्दस्य उपपदतत्पुरुषसमासाऽनुसारी द्वितीयोऽर्थः स्वीक्रियते।
२. यथा 'क्ङिति च' (अ० १.१.५) इति निषेधवाक्यं परिभाषारूपमङ्गीकृत्य 'पुगन्तलघूपधस्य च' (अ० ७.३.८६) इति गुणविधायकशास्त्रेण सह पदैकवाक्यतयाऽन्वीयते क्ङिद्भिन्नयोः सार्वधातुकार्धधातुकयोः पुगन्तलघूपधस्याङ्गस्येको गुण इति।

वाक्यस्वरूपमस्ति) मिथः संयुज्य एकं नवीनं वाक्यं निर्मिमाते। एवञ्चाऽयमर्थः सम्पद्यते– वृद्धिशब्दार्थेन लक्षिता आदैचो मृजेरङ्गस्य इकः स्थाने भवन्ति। अर्थाद् उपजीव्योप– जीवकभावापन्न–बोधजनकत्वं हि वाक्यैकवाक्यता भवति। उपजीव्योप– जीवकभावश्च उपकार्योपकारकभाव इत्युच्यते।

कार्यकालपक्षे तु तस्मिंस्तस्मिन् विधिवाक्ये परिभाषासंनिधानाद् एकवाक्यता भवति, तदनेन तस्मिंतस्मिन् विधिशास्त्रे तस्यास्तस्याः परिभाषायाः सन्निधेर्बोधे जातेऽपि सा सा परिभाषा विधिशास्त्रस्य समानदेशा न भवति। भाष्यस्थो हि प्रदीपदृष्टान्तोऽत्र प्रमाणम्– "परिभाषा पुनरेकदेशस्था सति सर्वं शास्त्रमभिज्वलयति, यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयति" (महा० २.१.१) अर्थात् तस्याः परिभाषायाः स्वदेशः (= उच्चारणदेशः) एव देशो भवति, यथा दीपप्रभया सर्वस्मिन् गृहे व्याप्तेऽपि (= संचरिते) दीपस्तु स्वकीय एव स्थानेऽवतिष्ठते। अन्यत्रापि व्यवहारायाऽनेकस्मिन् देशे गतेऽपि वणिग्भिः अभिजनदेशेनैव[1] तेषां व्यपदेशो भवति न तु व्यवहारदेशीयास्ते भवन्ति। एवञ्च कृत्वा कार्यकालपक्षेऽपि द्वयोः परिभाषयोः पौर्वापर्ये न काचित् क्षतिः। तदाश्रितायां 'विप्रतिषेधे परं कार्यम्' (अ० १.४.२) इति व्यवस्थाप्रकल्पनायां न काचिद् बाधोपतिष्ठते इति।

परं संज्ञाशास्त्रस्य तु कार्यकालपक्षे विधिप्रदेशे एव देशो भवति। यतो हि नास्मिन् पक्षे संज्ञासूत्रस्य कश्चित् पृथगर्थो बुद्धिस्थो भवति। यावद्धि तद् विधिना सहैकवाक्यापन्नं न भवति तावत् लक्ष्यसंस्काराय अनुपयोग्यमेवा ऽवतिष्ठते। सफलो वाक्यार्थबोधो विधिदेशे एव भवति– इति युक्तमेव विधिदेशीयत्वमस्य। एतस्मादेव 'अयादिभ्यः परैव प्रगृह्यसंज्ञा' इत्येवंपरम् 'अदसो मात्' (अ० १.१.१२) इति सूत्रस्थं भाष्यं सङ्गच्छते। 'अदसो मात्' (अ० १.१.१२) प्रगृह्यसंज्ञाविधायकशास्त्रस्य 'अणोऽप्रगृह्यस्याऽनुनासिकः' (अ० ८.४.५६)) इत्यनेन विधिसूत्रेण एकवाक्यतायां जातायाम् 'अदसो मात्' (अ० १.१.१२) इत्येतत् प्रति 'अमी' इत्यत्र 'एत ईद् बहुवचने' (अ० ८.२.८१) इति विहितस्य मीत्वस्याऽसिद्धत्वन्न भवति। असिद्धता हि शास्त्रीयकार्यार्थं विधीयते। तच्च सति कार्यज्ञाने एव भवितुमर्हति, कार्यज्ञानञ्च विधिप्रदेश एवाऽवगन्तुं शक्यते। एवञ्च 'अदसो मात्' इत्यस्य विधिप्रदेशस्थे जाते सति न तत् सम्प्रति पूर्वं भवति। प्रदेशदेशे एव वाक्यार्थबोधे गृहीते सति विरोधस्य ज्ञानं भवतीति कृत्वा विप्रतिषेधसूत्रस्य (अ० १.४.२) प्रवृत्त्यर्थं प्रदेशदेशस्थत्वं

परत्वं गृह्यते। अतः 'एचोऽयवायावः' (अ० ६.१.७५) इत्यस्मात् 'अदसो मात्' इति विहिता प्रगृह्य संज्ञा परा भवतीति भाष्यं सूपपन्नं भवति।

अस्मिन् शास्त्रे संज्ञानां परिभाषाणाञ्च विषये यथोद्देशं कार्यकालश्चेति द्वावपि पक्षौ प्रतिष्ठितौ- इत्यसकृद् उक्तम्। परं प्रत्येकं संज्ञायाः परिभाषाया वा विषये इदं पक्षद्वयमस्तीति न वक्तुं शक्यते। 'आकडारादेका संज्ञा' (अ० १.४.१) इत्यस्मिन्नधिकारे भ-पद-संज्ञाविषये यथोद्देशपक्ष एव साधीयान्। अतस्तत्र पाठदेशस्थेन परत्वेनैव बाध्यबाधकभाव सिद्धो भवति। यदि चात्र कार्यकालपक्षोऽङ्गीक्रियते, ततो हि यत्र कार्यं तत्रैव संज्ञाया उपस्थानात् 'दण्डिन्+आ' इत्यत्र भसंज्ञाप्रयुक्तस्य कार्यस्याऽभावात् 'यचि भम्' (अ० १.४.१८) इति भसंज्ञाया अप्राप्तेः 'स्वादिष्वसर्वनाम०' (अ० १.४.१७) इति सामान्यविहिता पदसंज्ञा प्रवर्तेत। ततश्च 'नलोपः प्राति०' (अ० ८.२.७) इति पदसंज्ञानिबन्धनो नलोपः प्रसज्येत। तथा 'नदी+आ' इत्यत्रापि भसंज्ञासम्बन्धिनः कार्यस्याऽभावाद् भसंज्ञाया अप्रवृत्तेः सामान्यविहितायां पदसंज्ञायामेव जातायाम् 'इकोऽसवर्णे शाकल्यस्य०' (अ० ६.१.१२७) इति पदनिबन्धने प्रकृतिभावे प्रसक्तेऽनिष्टं रूपं श्रूयेत। अथ च 'ध्रुवमपायेऽपादानम्' (अ० १.४.२४) इत्याकडारीया संज्ञा। कार्यकालपक्षे 'अपादाने पञ्चमी' (अ० २.३.२८) इति विधिशास्त्रेण एकवाक्यतापन्नाऽपादानसंज्ञा 'कर्मणि द्वितीया' (अ० २.३.२) इत्यनेन सहैकवाक्यतां प्राप्तायाः 'कर्तुरीप्सिततमं कर्म' (अ० १.४.४९) इति कर्मसंज्ञायाः परा भवति। ततश्च 'अपादानमुत्तराणि कारकाणि बाधन्ते। (म० भा० १.४.१) इति भाष्यवचनम् असङ्गतं स्यात्। तदिदम् असाङ्गत्यं निरसयितुमत्र यथोद्देशपक्ष एवाङ्गीकार्य इति।

पदादिसंज्ञाया उच्चारणदेशे एव बोधस्य सत्त्वात् त्रिपादीस्थे विधिशास्त्रेऽपि निर्बाधरूपेण व्यवहारो भवति। अन्यथा संज्ञाया उपजीव्यत्वात् (= उपकारकत्वात्) त्रिपादीस्थानाम् उपजीवकानाम् (= उपकार्याणाम्) विधिशास्त्राणां न कश्चिद् वाक्यार्थबोधः सम्पत्स्यत इति त्रैपादिके प्रकरणे व्यवह्रियमाणा अपि इहत्याः संज्ञा यथोद्देशपक्षेऽपि स्वीयमर्थमुपस्थापयन्ति।

'कार्येण काल्यते स्वसन्निधिं प्राप्यत इति कार्यकालः' इत्यर्थेन कार्यशास्त्रेण स्वीयकार्यशास्त्रस्य निश्चितार्थस्य बोधाय स्वस्मिन् विद्यमानेन लिङ्गेन लिङ्गिताः परिभाषा आक्षिप्यन्ते। एतस्मादेव कारणात् 'पूर्वत्रासिद्धम्' (अ० ८.२.१) इत्यत्र भाष्ये त्रिपाद्या असिद्धत्वात् सपादसप्ताध्यायीस्थानां

परिभाषाणां प्रवृत्तिस्त्रैपादिके काण्डे न स्यादिति शङ्कितं यतो हि यथोद्देशपक्षे संस्कारकाणां (= परिभाषाशास्त्राणाम्) सिद्धत्वेऽपि संस्कार्याणां (= विधिसूत्राणाम्) असिद्धत्वात् संस्कारो न भवितुमर्हति। स च दोषः कार्यकालपक्षाश्रयेण समाहितः। त्रिपाद्यामुपस्थितं परिभाषाशास्त्रं त्रैपादिकं विधिशास्त्रं पश्यति। कुतः? देशमाहात्म्येन।

कार्यकालपक्षे 'नृकुट्यां भवः नार्कुटः, नृपतेरपत्यं नार्पत्यः' इत्यादौ बहिर्भूतप्रत्ययनिमित्तकत्वाद् बहिरङ्गायां वृद्धौ कृतायां 'खरवसान- योर्विसर्जनीयः' (अ॰ ८.३.१५) इति बहिरङ्गवृद्ध्यङ्गभूतस्य रेफस्य स्थानेऽन्तरङ्गो विसर्जनीयः प्राप्नोति। तदत्र 'असिद्धं बहिरङ्गमन्तरङ्गे' (परि॰ ४४) इति परिभाषेयमन्तरङ्गकार्यविधायकेन 'खरवसानयोर्विसर्जनीयः' इत्यनेन सहैकवाक्य-तापन्नैकदेशस्था सति बहिरङ्गभूताया वृद्धेरसिद्धतामापादयति, तस्मादेव च रेफस्य विसर्जनीयोऽपवारितो भवति। यदि त्वत्र यथोद्देशपक्षः स्वीक्रियेत तर्हि षाष्ठ्याः[1] असिद्धपरिभाषाया दृष्टौ आष्टमिकस्य 'खरवसानयोः॰' (अ॰ ८.३. १५) इत्येतस्याऽसिद्धत्वेऽन्तरङ्गकार्यस्याऽभावेऽसिद्धपरिभाषा न प्रवर्तेत, ततश्च रेफस्य सिद्धत्वे 'खरवसानयोः॰' इत्येतस्य प्रवृत्तौ विसर्जनीये सत्यनिष्टं रूपं स्यादिति। नागेशस्तु कार्यकालपक्षेऽपि त्रिपाद्यामस्याः परिभाषायाः (परि॰ ४४) अप्रवृत्तिमेवाह। कथम्? लिङ्गवती परिभाषा भवति इति अन्तरङ्गबहिरङ्गौ। एवञ्च सत्यन्तरङ्गे बहिरङ्गेण भवितव्यम्। 'पूर्वात्रासिद्धम्' (अ॰ ८.२.१) इति चान्तरङ्गस्य त्रैपादिकस्य सपादसप्ताध्यायीं प्रति असिद्धत्वे जातेऽन्तरङ्गलिङ्गाऽभावात् कथमियं त्रिपाद्यामुपस्थाय बहिरङ्गासिद्धत्व-मापादयेत्। अतः नार्कुटः इत्यादौ विसर्जनीयं वारयितुं किञ्चिद् वचनमेवाऽऽरब्धव्यमिति भाष्याशयं वर्णयति।

---

१. 'वाह ऊठ्' (अ॰ ६.४.१३२) इत्यत्र ज्ञापितत्वादसिद्धपरिभाषा षाष्ठी उच्यते।

# द्वितीयं परिशिष्टम्

## कानिचिद् विशिष्टवचनानि

सम्प्रति वैयाकरणनिकाये प्रचलितानां केषाञ्चित् प्रसिद्धतराणां वचनानां संकलनमात्रं विधीयते–

- अकर्मका अपि धातवः सोपसर्गाः सकर्मका भवन्ति।
- अगत्या खलु परिभाषाश्चाश्रीयन्ते।
- अज्झीनं परेण संयोज्यम्।
- अतन्त्रं तरनिर्देशः।
- अर्थापत्त्या शास्त्रे सिद्धिरुक्तिप्रामाण्यात्।
- अनन्यलभ्यार्थो हि शब्दार्थः।
- अनागमकानां सागमका आदेशा भवन्ति।
- अन्तरङ्गसंस्कारो बहिरङ्गसंस्कारेण न बाध्यते।
- अनियमे नियमकारिणी परिभाषा भवति।
- अनिर्दिष्टार्थे नपुंसकम्।
- अभिधेयवल्लिङ्गवचनानि भवन्ति।
- अभिहिते प्रथमा।
- अभ्यासे भूयांसमर्थं मन्यन्ते।
- असति प्रयोजने खलु ज्ञापकं भवति।
- अस्तिसामानाधिकरण्ये मतुब्विधीयते।
- आकृतौ पदार्थे सकृल्लक्ष्ये लक्षणं प्रवर्त्तते।
- आख्यातं सविशेषणं वाक्यम्।
- आगमादेशयोरागमविधिर्बलवान्।
- आश्रयात् सिद्धत्वम्।
- आसन्नं सन्देहे।
- इष्टे तदधिकाराणां प्रवृत्तिनिवृत्ती।
- उक्तार्थानामप्रयोगः।

- उच्चारितप्रध्वंसिनोऽनुबन्धाः।
- उभयोर्विभाषयोर्मध्ये यो विधिः स नित्यः।
- एकतिङ् वाक्यम्।
- एकवर्णा धातुप्रातिपदिकप्रत्ययनिपाता अर्थवन्तस्ततोऽन्ये वर्णा अनर्थकाः।
- कार्याद् अनुबन्धाद् अधिकारानुवृत्तिः।
- कार्यी निमित्तं कार्यमित्येष निर्देशक्रमः।
- क्वचित् कृताकृतप्रसङ्गिमात्रेण नित्यत्वम्।
- क्विबन्तो धातुत्वं न जहाति प्रातिपदिकत्वं च।
- क्रियावचनो धातुः।
- क्रियाविशेषक उपसर्गः।
- गमकत्वे कार्ययोगः।
- ग्रन्थाधिक्याद् अर्थाधिक्यम्।
- चक्रकेष्विष्टतो व्यवस्था।
- चकारोऽनुक्तसमुच्चयार्थः।
- जलतुम्बीन्यायेन रेफस्योर्ध्वगमनम्।
- तद्गुणसंविज्ञाने हि अवयवेन विग्रहः समुदायः समासार्थः।
- तिङ्समानाधिकरणे प्रथमा।
- द्विर्बद्धं सुबद्धं भवति।
- धातुप्रातिपदिकाद् अनुबन्धप्रातिपादिकं बलीयः।
- धातूपसर्गयोः कार्यमन्तरङ्गम्।
- न कर्मधारयाद् मत्वर्थीयः, बहुव्रीहेश्चेत् तदर्थप्रतिपत्तिकरः।
- नटभार्यावद् व्यञ्जनानि भवन्ति।
- न योगे योगोऽसिद्धोऽपि तु प्रकरणे प्रकरणमसिद्धम्।
- न व्यञ्जनपरस्य एकस्यानेकस्य वोच्चारणं प्रति विशेषोऽस्ति।
- नानर्थके न ज्ञापकम्।
- निरवकाशा हि विधयः सावकाशान् विधीन् बाधन्ते।
- नोभे सप्तमीपञ्चम्यौ प्रकल्पिके भवतः।
- नैकमुदाहरणं योगारम्भं प्रयोजयति।

- पक्षान्तरैरपि परिहारा भवन्ति।
- पदगौरवाद् योगविभागो गरीयान्।
- पदपदार्थसम्बन्धः शक्तिः।
- प्रातिपदिकाप्रातिपदिकयोरेकादेशः प्रातिपदिकवद् भवति।
- पित्स्वरात् चित्स्वरो बलीयान्।
- प्रकृतिप्रत्ययौ प्रत्यार्थं सह ब्रूतः।
- प्रत्यक्षानुमितयोः प्रत्यक्षो बलीयान्।
- प्रतिज्ञानुनासिक्याः पाणिनीयाः।
- प्रतिज्ञास्वरिताः पाणिनीयाः।
- प्रथमं वा नियम्येत कारणाद् वातिक्रमः स्यात्।
- प्रधानशक्त्यभिधाने हि गुणशक्तिरभिहितवत् प्रकाशते।
- प्रधानान्वाचयशिष्टयोः प्रधानशिष्टे सम्प्रत्ययः।
- भवति हि प्रधानसापेक्षस्यापि वृत्तिः।
- भावप्रधानम् आख्यातं सत्त्वप्रधानानि नामानि।
- भाववचनो धातुः।
- भाविनि भूतवदुपचारः।
- भिन्नसम्बन्धे प्रतियोगे प्रतिघाते चाधिकरणानां निवृत्तिः।
- यत एवकारस्ततोऽन्यत्रावधारणम्।
- यदुपाधेर्विभाषा तदुपाधेर्निषेधः।
- यत्रोत्सर्गापवादौ द्वावपि विभाषा तत्रापवादेन मुक्त उत्सर्गो न प्रवर्त्तते।
- यल्लक्षणेनानुपपन्नं तत् सर्वं निपातनात् सिद्धम्।
- युगपद् अधिकरणवचनो द्वन्द्व एकशेषश्च।
- युगपद् बोधनेच्छा हि सहविवक्षा।
- रूढिषु नावयवार्थः प्रकाशते।
- लक्षणान्तरेण प्राप्नुवन् विधिरनित्यः।
- लघ्वक्षरं हि संज्ञा विधानमनित्यम्।
- लिङ्गवती परिभाषा भवति।
- लिङ्गसंख्यान्वितं द्रव्यम्।

- लुप्तोऽप्यनुबन्धः कार्यं प्रति विशेषको भवति।
- विकरणस्वरो लसार्वधातुकस्वरं न बाधते।
- विनाऽपि णिचाऽन्तर्भावितण्यर्थो धातुर्गृह्यते।
- विवक्षातः कारकाणि भवन्ति।
- विवक्षाव्याप्तेरिष्टावसायः।
- विशेषातिदेशे तु सामान्यमप्यतिदिश्यते।
- शब्दान्तरात् प्राप्नुवन् विधिरनित्यः।
- सक्रियाविशेषणं वाक्यम्।
- सति शिष्टस्वरो बलीयान्।
- शब्दान्तरे च प्राप्नुवन् विधिरनित्यः।
- समानाश्रयमसिद्धं व्याश्रयन्तु नासिद्धम्।
- समासवृत्तिस्तद्धितवृत्त्या बाध्यते।
- समुदायो हि अर्थवान् तस्यैकदेशो निरर्थकः।
- समुदाये हि वृत्ताः शब्दा अवयवेष्वपि वर्त्तन्ते।
- सर्वत्र तदन्तविधिरन्यत्र धातुतुक्स्वरसन्धेः।
- सर्वे सर्वार्थवाचकाः सति तात्पर्ये
- सविशेषणानां वृत्तिर्न, वृत्तस्य वा विशेषणयोगो न।
- सहविवक्षायां द्वन्द्व एकशेषश्च।
- सिद्धशब्दोपदेशाद् नेतरेतराश्रयदोषः।
- सिद्धे सत्यारम्भो ज्ञापकार्थो भवति।
- सिद्धे सत्यारम्भो नियमाय भवति।
- सुप्तिङ्चयादिरूपं वाक्यम्।
- सुबसुबोरेकादेशः सुबवद् भवति।
- स्वरभिन्नानां यस्योत्तरस्वरविधिस्तस्य एकशेषः।
- स्वार्थे णिच् नित्यम्।

# तृतीयं परिशिष्टम्

## पारिभाषिक-वर्णानुक्रमणी


| सूत्र सं० | सूत्र | पृष्ठ सं० |
|---|---|---|
| | अ | |
| ११४. | अकृतव्यूहाः पाणिनीयाः॥ | ११९ |
| १४७. | अगत्या हि खलु परिभाषाश्चाश्रीयन्ते॥ | १३२ |
| ८२. | अङ्गवृत्ते पुनर्वृत्तावविधिः॥ | ९३ |
| ७१. | अननुबन्धकग्रहणे न सानुबन्धकस्य ग्रहणम्॥ | ८२ |
| ५४. | अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा॥ | ६३ |
| ८४. | अनन्त्यविकारेऽन्त्यसदेशस्य कार्यं भवति॥ | ९५ |
| १०१. | अनिर्दिष्टार्थाश्च प्रत्ययाः स्वार्थे भवन्ति॥ | ११० |
| १७. | अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति॥ | २३ |
| ११६. | अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम्॥ | १२२ |
| ४. | अनेकान्ता अनुबन्धाः॥ | ७ |
| ४९. | अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब् बाधते॥ | ५८ |
| ४७. | अन्तरङ्गानपि विधीन् बाधित्वा बहिरङ्गो लुग् भवति॥ | ५५ |
| १४९. | अन्ये तु पूर्वं धातुरुपसर्गेण युज्यते पश्चात् साधनेनेत्याहुः॥ | १३३ |
| १२७. | अपवादो यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यते। | १२६ |
| ९७. | अभेदका गुणाः॥ | १०८ |
| ५८. | अभ्यासविकारेष्वपवादा उत्सर्गान्न बाधन्ते॥ | ६६ |
| १२. | अर्थवत आगमस्तद्गुणीभूतोऽर्थवद्ग्रहणेन गृह्यते॥ | १६ |
| १५. | अर्थवद्ग्रहणे नानर्थकस्य॥ | २० |
| १४६. | अर्थवशाद् विभक्तिविपरिणामः॥ | १३२ |
| ८७. | अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी॥ | ९८ |

११२. अवयवे कृतं लिङ्गं तस्य समुदायस्य विशेषकं
भवति यं समुदायं सोऽवयवो न व्यभिचरति॥ ११८
१५२. अव्यक्ते गुणसंदेहे नपुंसकलिङ्गं प्रयोजयेत्॥ १३४
१३९. असति संभवे बाधनं भवति।
अस्ति च संभवो यदुभयं स्यात्॥ १३०
४४. असिद्धं बहिरङ्गमन्तरङ्गे॥ ५२
४५. असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे॥ ५२
२७. अस्त्रीप्रत्ययेनानुपसर्जनेन॥ ३३

आ

११८. आगमशास्त्रमनित्यम्॥ १२२
१११. आगमा अनुदात्ता भवन्ति॥ ११७
१२१. आतिदेशिकमनित्यम्॥ १२४

ई

१३७. इतरेतराश्रयाण्यपि कार्याणि शास्त्रे प्रकल्पन्ते॥ १३०

उ

२३. उणादयोऽव्युत्पन्नानि प्रातिपदिकानि॥ २९
२६. उत्तरपदाधिकारे प्रत्ययग्रहणे स्वरूपग्रहणं
द्रष्टव्यम्॥ ३२
१२८. उपजनिष्यमाणनिमित्तोऽप्यपवाद उपसञ्जात-
निमित्तमप्युत्सर्गं बाधते॥ १२७
८३. उपपदविभक्तेः कारकविभक्तिर्बलीयसी॥ ९४
१२८. उपसञ्जातनिमित्तोऽप्युत्सर्ग
उपजनिष्यमाणनिमित्तेनापवादेन बाध्यते॥ १२७
१०. उभयगतिरिह भवति॥ १३
११०. उभयत आश्रये नान्तादिवत्॥ ११६
६२. उभयनिर्देशे विप्रतिषेधात् पञ्चमीनिर्देशः॥ ६९

ए

३८. एकदेशविकृतमनन्यवद् भवति॥ ४४

१८. एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह
वा निवृत्तिः॥ २५
१९. एकयोगनिर्दिष्टानामप्येकदेशानुवृत्तिर्भवति॥ २५
१०६. एकस्या आकृतेश्चरितः प्रयोगो द्वितीयस्याः
तृतीयस्याश्च न भवति॥ ११३
५. एकान्ता अनुबन्धाः॥ ८

औ
१३०. औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणम्॥ १२८

क
२. कार्यकालं संज्ञापरिभाषम्॥ ४
११. कार्यमनुभवन् हि कार्यी निमित्तत्वेन नाश्रीयते॥ १५
९. कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः॥ १३
२९. कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवति॥ ३६
६०. क्तल्युट्तुमुन्खलर्थेषु वाऽसरूपविधिर्नास्ति॥ ६८
१४२. क्रियाविशेषणानां कर्मत्वं नपुंसकलिङ्गता च॥ १३१
७३. क्वचित् स्वार्थिका अपि प्रकृतितो
लिङ्गवचनान्यतिवर्तन्ते॥ ८४
१२६. क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते॥ १२६
१४१. क्वचिद् विकृतिरपि प्रकृतिं गृह्णाति॥ १३१

ग
११७. गणकार्यमनित्यम्॥ १२२
६७. गतिकारकोपपदानां कृद्भिः सह समासवचनं
प्राक् सुबुत्पत्तेः॥ ७५
१३३. गर्भवट्टाबादयो भवन्ति॥ १२९
९३. गामादाग्रहणेष्वविशेषः॥ १०४
१०८. गुणवचनानां हि शब्दानामाश्रयतो लिङ्गवचनानि
भवन्ति॥ ११५
१६. गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः॥ २१

३२. ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते॥ ४०

च

१२५. चानुकृष्टं नोत्तरत्र॥ १२५

ज

१०४. ज्ञापकसिद्धं न सर्वत्र॥ ११२

ण

१३६. णौ कृतं स्थानिवत्॥ १२९

त

७२. तदनुबन्धकग्रहणे नातदनुबन्धकस्य ग्रहणम्॥ ८२
७९. तदेकदेशभूतस्तद्ग्रहणेन गृह्यते॥ ९०
७७. ताच्छीलिके णेऽण्कृतानि भवन्ति॥ ८८
५९. ताच्छीलिकेषु सर्व एव तृजादयो वाऽसरूपेण न भवन्ति॥ ६७

ध

७८. धातोः कार्यमुच्यमानं तत्प्रत्यये भवति॥ ८९

न

५५. न चापवादविषये उत्सर्गोऽभिनिविशते। ६५
६६. नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः॥ ७३
११९. नञ्घटितम् अनित्यम्॥ १२३
४६. नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः॥ ५४
८५. नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे॥ ९६
६. नानुबन्धकृतमनेकाल्त्वम्॥ ९
७. नानुबन्धकृतमनेजन्तत्वम्॥ १०
८. नानुबन्धकृतमसारूप्यम्॥ ११
१५३. निमित्तिकार्यं न तन्निमित्तस्य॥ १३४
११५. निमित्तापाये नैमित्तिकस्याप्यपायः॥ १२१
१३. निर्दिश्यमानस्यादेशा भवन्ति॥ १८

प

३०. पदाङ्गाधिकारे तस्य तदन्तस्य च॥ ३७
१५४. परार्थाभिधानं वृत्तिः॥ १३४
१३२. पर्जन्यवदिह लक्षणप्रवृत्तिः॥ १२८
१०३. पर्यायशब्दानां लाघवगौरवचर्चा नाद्रियते॥ १११
४०. पुनः प्रसङ्गविज्ञानात् सिद्धम्॥ ४७
५२. पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते न परान्॥ ६२
१४८. पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण॥ १३२
५६. पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः। ६५
१०५. पूर्वत्रासिद्धीयमद्विर्वचने॥ ११३
१३५. पूर्वत्रासिद्धीये न स्थानिवत्॥ १२९
३९. पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः॥ ४५
४८. पूर्वोत्तरपदयोस्तावत् कार्यं भवति नैकादेशः॥ ५७
५७. प्रकल्प्य चापवादविषयमुत्सर्गः प्रवर्तते॥ ६५
८१. प्रकृतिग्रहणे ण्यधिकस्यापि कुत्वं भवति॥ ९२
१२३. प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम्॥ १२४
३७. प्रकृतिवद् अनुकरणं भवति॥ ४३
९९. प्रतिषेधाश्च बलीयांसो भवन्ति॥ १०९
२५. प्रत्ययग्रहणे चापञ्चम्याः॥ ३१
२४. प्रत्ययग्रहणे यस्मात् स प्रत्ययो विहितस्तदादेः तदन्तस्य च ग्रहणं भवति॥ ३०
९०. प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम्॥ १०१
९४. प्रत्यवयवं वाक्यपरिसमाप्तिः॥ १०५
८६. प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः॥ ९७
६३. प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवति॥ ६९

ब

९८. बाधकान्येव निपातनानि॥ १०९

भ

६९. भवति हि बहुव्रीहौ तद्गुणसंविज्ञानमपि॥ ७९

२१. भवत्युकारेण भाव्यमानेन सवर्णानां ग्रहणम्॥ २७

२०. भाव्यमानेन सवर्णानां ग्रहणं न॥ २६

९६. भेदका उदात्तादयः॥ १०७

म

५३. मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्॥ ६३

य

१४. यत्रानेकविधमान्तर्यं तत्र स्थानत एवान्तर्यं बलीयः॥ १८

३. यथोद्देशं संज्ञापरिभाषम्॥ ४

३४. यस्मिन् विधिस्तदादावल्ग्रहणे॥ ४१

१५५. यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यम्॥ १३४

१५६. यस्य च लक्षणान्तरेण निमित्तं विहन्यते तदप्यनित्यम्॥ १३४

५१. **येन नाप्राप्ते यो विधिरारभ्यते** स तस्य बाधको भवति॥ ६०

१०२. योगविभागादिष्टसिद्धिः॥ १११

१२९. यो ह्यनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवत्॥ १२७

ल

९२. लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्॥ १०३

१५०. लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिः॥ १३३

६१. लादेशेषु वाऽसरूपविधिर्न भवति॥ ६८

८०. लुग्विकरणाऽलुग्विकरणयोरलुग्विकरणस्यैव ग्रहणम्॥ ९१

व

१ १ ३. वर्णग्रहणे जातिग्रहणम्।। १ १ ९
२२. वर्णाश्रये नास्ति प्रत्ययलक्षणम्।। २८
१ ३ १. वर्त्स्यर्त्प्रवृत्त्येह कार्याणि क्रियन्ते।। १ २ ८
३६. वाच्छन्दसि सर्वे विधयो भवन्ति।। ४३
५०. वार्णादाङ्गं बलीयो भवति।। ५९
४२. विकरणेभ्यो नियमो बलीयान्।। ४९
१ ४ ४. विधिनियमसम्भवे विधिरेव ज्यायान्।। १ ३ २
१ ३ ८. विधिविधानविधिभाजां त्रयाणां सन्निधाने तदन्तविधिर्भवति।। १ ३ ०
१ ३ ४. विधौ परिभाषोपतिष्ठते नानुवादे।। १ २ ९
६४. विभक्तौ लिङ्गविशिष्टग्रहणं न।। ७१
७४. विभाषा समासान्तो भवति।। ८४
३१. व्यपदेशिवदेकस्मिन्।। ३९
३३. व्यपदेशिवद्भावोऽप्रातिपदिकेन।। ४०
८८. व्यवस्थितविभाषयाऽपि कार्याणि क्रियन्ते।। ९९
१. व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्।। १

श

४३. शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति।। ५०
१ २ ४. शितपा शपानुबन्धेन निर्दिष्टं यद्गणेन च। यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि।। १ २ ४
१ ४ ३. श्रुतानुमितयोः श्रौतः सम्बन्धो बलीयान्।। १ ३ १

स

४१. सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव।। ४८
१ २ ०. संज्ञापूर्वको विधिरनित्यः।। १ २ ३
२८. संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्न भवति।। ३४
१ ४ ०. सत्यपि संभवे बाधनं भवति।। १ ३ १

१४५. संदेहे बहुवचनं प्रयोक्तव्यम्।। १३२
७५. सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य।। ८५
७६. सन्नियोगशिष्टानामन्यतराऽभावे उभयोरप्यभावः।। ८७
१५१. समासकृत्तद्धितेषु भावप्रत्ययेन सम्बन्धाभिधानमन्यत्र रूढि-अभिन्नरूप-अव्यभिचरितसम्बन्धेभ्यः।। १३३
९५. समुदाये वाक्यपरिसमाप्तिः।। १०६
१०७. सम्प्रसारणं सम्प्रसारणाश्रयं च कार्यं बलीयो भवति।। ११४
१२२. सर्वविधिभ्य इड्विधिर्बलवान्।। १२४
१००. सर्वविधिभ्यो लोपविधिर्बलीयान्।। ११०
३५. सर्वो द्वन्द्वो विभाषैकवद् भवति।। ४२
९१. सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम्।। १०२
१०९. सापेक्षमसमर्थं भवति।। ११६
८९. सामान्यातिदेशे विशेषाऽनतिदेशः।। १०१
६८. साम्प्रतिकाऽभावे भूतपूर्वगतिः।। ७८
६५. सूत्रे लिङ्गवचनमतन्त्रम्।। ७२
१५७. स्वरभिन्नस्य प्राप्नुवन् विधिरनित्यो भवति।। १३५
१५८. स्वरविधौ व्यंजनमविद्यमानवत्। १३५

ह

७०. हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवद् भवति।। ८१